Te	22.7×3.5	68–70	6	38	C	G	
,,	22.7×3.5	68–70	6	38	C	G	
,,	22.7×3·5	55–60	6	42	C	G	
,,	22.7×3.5	55–60	6	42	C	G	
,,	32×5.5	Two	13	56	C		
Kan	10×20	9–12	15	18	C	G	
Te	36×3.2	One	6	62	C	D.W	
,,	32×5.5	Two	13	56	C	D.W	
,,	22 7×3.5	48–55	6	44	C	G	
,,	22.7×3·5	94–97	6	36	C	G	
,,	22.7×3.5	48–55	6	44	C	G	

1	2	3	4	5	6
28801	P. 8175 /39c	Tālalakṣaṇavyākhyā			Pl
28802	P. 343	Tālādilakṣaṇam	Bharataḥ		,,
28803	P. 5257/2	Devābhinayaḥ			,,
28804	P. 5257/3	,,			,,
28805	P. 6218	Nāṭyabhedasaṅgrahaḥ			,,
28806	C. 2757/2	,,			P
28807	P. 8175/11	Nāṭyamaṇṭapalakṣaṇam			Pl
28808	P. 8130/1	Nāṭyamudrikā			,,
28809	P. 8130/2	Nāṭyamudrikāṭīkā			,,
28810	P. 472	Nāṭyaśāstram	Bharatamuniḥ		,,
E 28811	P 2555	,,	,,		,,
28812	P 4472/2	,,	,,		,,

7	8	9	10	11	12	13	14
Te	22.7×3.5	94–97	6	36	C	G	
Na	41×3.5	1–4	7	66	C	O D	
Te	19×5.5	One	8	40	Inc. No beginning	G	13th folio
,,	19×5.5	One	8	40	Inc. ,,	G	,,
Gr	46.5×4	14–15	10	100	C	D.W	
D	20.3×10.5	One	17	60	Inc.	G	5th. folio
Te	22.7×3.5	60–61	6	36	C	G	
Na	32×3.8	17–27	8	60	C	G	
,,	32×3.8	17–27	8	60	C	G	In Telugu
Te	41×4	1–86	7	76	Inc. 1-15 adhyāyas	D	
Kan	48×6	1–120	11	112	Inc. 1-34 ,,	G	
Na	37×3	1–15	7	60	Inc. End of Pār śvasvanirūpaṇam	D.W	

1	2	3	4	5	6
28813	P. 5741/3a	Nāṭyaśāstram	Bharatamuniḥ		Pl
E 28814	B. 1062/1	,,	,,		P
28815	P. 5741/3b	Nāṭyaśāstraṭīkā			Pl
28816	B. 1062/2	,,			P
28817	P. 3494/1	Nāṭyādhidevatā nirṇayaḥ			Pl
28818	P. 7107	Nānārthasāra saṅgrahaḥ			,,
28819	P. 905/4	Nāyakādilakṣaṇam			,,
28820	C. 2689	Pañcasvaralakṣaṇam			P
28821	P. 9664/2a	Pāṭākṣatālavyutpattiḥ			Pl
28822	P. 9664/2b	Pāṭākṣatālavyutpatti ṭīkā			,,
28823	P. 8175/27	Pātrālaṅkāralakṣaṇam			,,
28824	P. 8175/28	Pātrālaṅkāralakṣaṇa vyākhyā			,,

7	8	9	10	11	12	13	14
Te	32×5.5	1-6	13	56	Inc. End of Pātra lakṣaṇam	D.W	
Kan	16.5×21	1-148	12	16	Inc. End of Aṅga bhāvalakṣaṇam	G	
Te	32×5.5	1-6	13	56	Inc. End of pātra lakṣaṇam	D.W	In Telugu
Kan	16.5×21	1-148	12	16	Inc. Aṅgabhāva lakṣaṇam	G	In Kannada
Te	35×2.5	Three	4	46	C	O.D	
,,	32.5×4.5	1-3	7	45	C	O.D	In Telugu
Na	35×3.5	107-109?	7	74	Inc.	G	
D	24×8	1-8	7	30	Inc.	O.D	
Te	4 ×3	1-6	5	70	C	G	In Telugu
,,	43×3	1-6	5	70	C	G	In Telugu
,,	22.7×3.5	73-83	6	42	C	G	
,,	22.7×3.5	73-83	6	42	C	G	In Telugu

1	2	3	4	5	6
28825	P. 5741/6	Pādabhedalakṣaṇam			Pl
28826	P. 8175/43	Pūrvaraṅganirūpaṇam			,,
28827	P. 8175/44	Pūrvaraṅganirūpaṇa vyākhyā			,,
28828	P. 9211/1	Praṇayakalahasapta padī			,,
28829	P. 9210/2	Prathamānurāgasapta padi			,,
28830	P. 8175/3	prāṇahastalakṣaṇam			,,
28831	P. 8175/4	Prāṇahastalakṣaṇa vyākhyā			,,
28832	P. 9210/1	Prābodhikasaptapadi			,,
E 28833	A. 618/2	Brahmabharatam			P
28834		Bharataśāstram			
E 28835	P. 3809	Bharatārṇavaḥ		Nandikeśvaraḥ	Pl
28836	A. 618/1	,,		,,	P

7	8	9	10	11	12	13	14
Te	32×5.5	One	13	56	C	D.W	
,,	22.7×3.5	103–105	6	38	C	G	
,,	22.7×3.5	103–105	6	38	C	G	In Telugu
Kan	23×5	17–19	8	45	C	O	
,,	23×5	7–11	8	45	C	O	
Te	22.5×3.5	34–39	6	44	C	G	
,,	22.5×3.5	34–39	6	44	C	G	In Telugu
Kan	23×5	2–7	8	45	C	O	
,,	20×32	37–66 (pages)	20	16	Inc. End of Hastabheda nirūpaṇam	G	
Please see Nāṭyaśāstram							
Te	37×3.5	1–253	6	48	Inc. End of Tālavicāra	O	
Kan	20×32	1–35	20	16	Inc. 1–6 adhyāyas Inc.	G	

1	2	3	4	5	6
28837	P. 4754	Bharatārṇavaḥ			Pl
E28838	P. 5257/1	Bharatārṇavaḥ	Nandikeśvaraḥ		,,
E 28839	P. 5279/1	,,	,,		,,
28840	P. 8175/1	,,	,,		,,
28841	P. 5279/2	Bharatārṇavaṭikā			,,
28842	P. 8175/2	,,			,,
28843	P. 1292/2	Bharataśāstraṭikā			,,
E 28844	A. 66	Barataśāstrasāra saṅgrahaḥ	Candraśekharaḥ		P
28845	A. 69	,,	,,		,,
28846	P. 5741/5	Bhartārthacandrikā saṅgrahaḥ			,,
28857	P. 8175/25a	Bhūmiprārthanā			,,
28848	P. 8175/26	Bhūmiprārthanā vyākhyā			,,

7	8	9	10	11	12	13	14
Te	7×4.5	1–19	7	24	Inc. Hastādhyāya	O.D	
,,	19 3×5.5	1–10	11	36	Inc. 2-5 Adhyāyas	G	
Na	18×3.5	1–29	8	28	Inc. 1–3 ,,	O.D	
Te	22.5×3.5	1–34	6	46	Inc. 1–3 ,,	G	
Na	18×3.5	1–29	8	28	Inc. 1–4 ,, Inc.	O.D	
Te	22.5×3.5	1–34	6	46	Inc. 1–3 ,,	G	
Kan	36×4	1–154	5	54	Inc. End of Hasta caturdaśalakṣaṇam	D.W	
Te	19.5×31	3+1 –77	26	18	C	G	
Kan	20×28.5	1–45	21	18	C	O.D	In Kannada & Telugu
,,	32×5.5	Two	13	56	Inc. Hasta nirṇaya	D.W	
,,	22.7×3.5	One	6	36	C	G	72nd. folio
,,	22.7×3.5	One	6	36	C	G	,,

1	2	3	4	5	6
28849	P. 8175/36	Mukhavīṇālakṣaṇam			Pl
28850	P. 8175/37	Mukhavīṇālakṣaṇa vyākhyā			,,
28851	P. 8175/35	Mṛdaṅgaprāṇaniṣū paṇam			,,
85852	P. 8175/31	Mṛdaṅgotpattilakṣa ṇam			,,
28853	P. 8175/32	Mṛdaṅgotpattilakṣa ṇavyākhyā			,,
28854	P. 8175/29	Melaprāptilakṣaṇam			,,
28855	P. 8175/30	Melaprāptilakṣaṇa vyākhyā			,,
28856	P. 4212/56	Raṅgapātralakṣaṇam			,,
28857	P. 5519	Raṅgapraśamsā			,,
28858	P. 1397/6	Rāganṛttabhedaḥ			,,
28859	P. 1102/2	Rāgal kṣaṇam			,,
28860	P. 8175/12	Rājamaṇṭapalakṣa ṇavyākhyā			,,

7	8	9	10	11	12	13	14
Te	22.7×3.5	91–92	6	42	C	G	
,,	22.7×3.5	91–92	6	42	C	G	In Telugu
,,	22.7×3.5	One	5	34	C	G	91st. folio
,,	22.7×3 5	85–89	6	40	C	G	
,,	22.7×3.5	85-89	6	40	C	G	In Telugu
,,	22.7×3.5	83–84	6	38	C	G	
,,	22.7×3.5	83–84	6	38	C	G	In Telugu
Na	35×3.5	67–68	6	44	C	G	
,,	43×3	1–2	6	90	C	G	
Kan	44×3.5	29–30	6	64	C	G	
Te	35.5×3.5	26–30	5	45	Inc.	D.W	
,,	22.7×3.5	60–61	6	36	C	G	In Telugu

1	2	3	4	5	6
28861		Vāsikalakṣaṇam			
28862	P. 9210/3	Virahasaptapadi			Pl
28863	P. 9210/4	Virahodrekasaptapadi			,,
28864	P.8175/37b	Viṇādhārīlakṣaṇam			,,
28865	P.8175/37c	Viṇādhārīlakṣaṇa vyākhyā			,,
28866	P 8175/33	Vetralakṣaṇam			,,
28867	P. 8175/34	Vetralakṣaṇavyākhyā			,,
28868	P. 8175/23	Śikṣāvidhiḥ			,,
28869	P. 8175/24	Śikṣāvidhivyākhyā			,,
28870	P. 8175/38	Śrutilakṣaṇam			,,
28871	P. 8175/39	Śrutilakṣaṇavyākhyā			,,
E 28872	P. 6730	Saṅgītakalānidhiḥ	Kallināthaḥ		,,

7	8	9	10	11	12	13	14
Please see Vīṇādhāri lakṣaṇam							
Kan	23×5	11-13	8	45	C	O	
,,	23×5	13-17	8	45	C	O	
Te	22.7×3.5	92-93	6	40	C	G	
,,	22.7×3,5	92-93	6	40	C	G	In Telugu
,,	22.7×3 5	90-91	5	34	C	G	
,,	22.7×3.5	90-91	5	34	C	G	In Telugu
,,	22.7×3.5	70-71	6	44	C	G	
,,	22.7×3.5	70-71	6	44	C	G	In Telugu
,,	22 7×3.5	93-94	5	38	C	G	
,,	22.7×3.5	93-94	5	38	C	G	In Telugu
Gr	33×3.5	2-25	8	74	C	G	

1	2	3	4	5	6
E 28873	P. 5114/1	Saṅgitagaṅgādharaḥ	Kalale-nañjarājaḥ		Pl
E 28874	P. 5081	Saṅgitacūḍāmaṇiḥ	Rājājagade-kamallaḥ		,,
28875	P. 1298/1	,,			,,
28876	P. 105/1	,,	Haripāla-mahīpatiḥ		,,
28877	P. 105/2	Saṅgitacūḍāmaṇi ṭīkā			,,
E 28878	P. 2847	Saṅgitadarpaṇam (Saṅgitasaroddhāraḥ)	Haribhaṭṭaḥ (Dāmodaraḥ)		,,
28879	P. 1936	Saṅgitapadyāvaliḥ			,,
28780	P. 4236	,,			,,
28381	P. 6078/1	,,			,,
E 28882	A. 141	Saṅgitamakarandaḥ	Vedaḥ		P
28883	P. 24	Saṅgitaratnākaraḥ	Śāraṅgadharaḥ		Pl
28884	P. 5907/3	,,	,,		,,

7	8	9	10	11	12	13	14
Gr	37×3 5	1–136	7	66	C	O	
Kan	44.5×5	41–54	14	100	Inc.	O	
,,	36×4	1–154	5	54	Inc. End of Hastaca turdaśalakṣaṇam	D.W	
Te	34×3.5	1–54	7	62	Inc.	G	
,,	34×3.5	1–54	7	62	Inc.	G	In Kannada
,,	19.2×4	1–79	7	32	Inc. 1–5 adhyāyas Inc.	D.W	
,,	21×4.5	1–186	8	50	Inc.	O	In Telugu
,,	29×3	1–117	5	28	Inc.	O.D	In Telugu & Tamil
,,	30.5×3.5	1–69	7	36	Inc.	O.D	In Te'ugu
D	19 5×32	1–27	30	25	C	G	
Na	48×3·5	13–22	8	86	Inc. Up to Aṅgabhedanirū-paṇa in 11 taraṅgas only	D	
Tulu	49×5	–53–	9	60	Inc.	O.D	

1	2	3	4	5	6
E 28885	P. 8686/1	Saṅgītaratnākaraḥ	Śārṅgadharaḥ		Pl
28886	P. 1379/1	Saṅgītaratnākara vyākhyā			,,
E 28887	P. 1379/2	,,		Kallināthaḥ	,,
E 28888	A. 67	Saṅgītasamayasāra saṅgrahaḥ	Pārśvadevaḥ		P
28889		Saṅgītasāroddhāraḥ			
E 28890	B. 991	Saṅgītasāroddhāraḥ	Raṅganāthaḥ		P
E 28891	A. 843	Saṅgītasudhākaraḥ	Haripāladevaḥ		,,
28892	P. 4798	Sandeśahastādila kṣaṇam			Pl
E 28893	B. 941	Sadāśivabharatam			P
28894	P. 7106	Sabhāpatilakṣaṇam			Pl
28895	P. 8175/15	,,			,,
28896	P. 8175/16	Sabhāpatilakṣaṇa vyākhyā			,,

7	8	9	10	11	12	13	14
Kan	24×5	1–72	10	40	Inc.	G	56–66 folios missing
Te	44×3.3	35–59 +3	9	100	Inc. Tala to Vādhyādyāya	O D	
,,	44×3.3	1–33	10	110	Inc. Nrttadyaya	O.D	
Kan	20×33	1–149	26	20	C	G	
Please see Saṅgitadarpaṇam also							
Te	16.5×21	1–87	12	16	C	G	Kilaka, Āśvija, Kṛ-9 Śukravāra
D	21×33	1–204	20	16	C	G	Copied from the Adyar library Ms.
Te	16×3	1–59	5	24	Inc.	O.D	
,,	15×20	1–58	12	14	Inc. End of Alokitadṛṣṭi	O	
Te	32.5×4.5	1–17	7	45	C	O	
,,	22.7×3.5	64–65	7	46	C	G	
Na	22.7×3.5	64–65	7	46	C	G	

1	2	3	4	5	6
2889	P. 8175/42	Sabhāprārthanā			Pl
28898	P. 8175/17	Sabhāvāridhilakṣaṇam			,,
28899	P. 8175/18	Sabhāvāridhilakṣaṇa vyākhyā			,,
28900	P. 8175/19	Sabhyalakṣaṇam			,,
28901	P. 8175/20	Sabhyalakṣaṇa vyākhyā			,,
28902	B. 115/1	Svaraprastāraḥ			P
E 28903	P. 3278	Svaramelakalānidhiḥ	Rāmāmātyaḥ		Pl
28904	A. 68	,,	,,		P
28905	P. 10263/2	Svaralakṣaṇam			Pl
28906	P. 5741/4	Hastalakṣaṇam			,,
28907	P. 7239/2	,,			,,

7	8	9	10	11	12	13	14
Te	22 7×3.5	99–103	5	34	C	G	
,,	22.7×3.5	65–67	6	44	C	G	
,,	22.7×3.5	65–67	6	44	C	G	
,,	22.7×3.5	67–68	6	44	C	G	
,,	22.7×3.5	67–68	6	44	C	G	In Telugu
Kan	16×20	1–9	15	18	C	D	
Te	28×3	1–47	5	58	C	O	Contains Tīka in Telugu for 2 prakaraṇas
Kan	20×33	1–5	27	25	Inc. End of Upodghāta	O	
Na	34×3.3	Two	6	78	Inc. From Niṣāda to svarodāhar ṇa	D	
Te	32×5.5	16–21	13	56	Inc. End of Kaṭakamukha hasta	D.W	
Gr	33.5×3.8	Seven	7	62	Inc. From Asamyatahasta to Pādatāla nirṇaya	D.W	

CHANDAŚŚĀSTRAM

1	2	3	4	5	6
CHANDAŚŚĀSTRAM					
E 28908	P. 4507/1	Kāśyapachandaśśāstram	Kaśyapaḥ		Pl
E 28909	B. 519/1	Kṛṣṇarājasārvabhaumavṛttaratnāvaliḥ	Nañjuṇḍakaviḥ		P
28910	B. 519/2	Kṛṣṇarājasārvabhaumavṛttaratnāvali vyākhyā		Aṇṇaṅgarācāryaḥ	,,
28911	C. 2666/2	Gaṇanirṇayaḥ			,,
E 28912	P. 871/1	Gaṇāṣṭakam (Ratnamañjūṣāsūtram, Chandovicitisūtram)			Pl
28913	P. 871/5	,,			,,
28914	P. 871/2	Gaṇāṣṭakavyākhyā			,,
28915	P. 1025/2	,,			,,
28916	A. 487	,,			P
E 28917	C. 1809/1	Chandaḥkaustubhaḥ	Rādhādāmodaraḥ		,,
28918	C. 4214	,,	Bhāskararāyaḥ		,,
E 28919	C. 1809/2	Chandaḥkaustubhabhāṣyam		Vidyābhūṣaṇaḥ	,,

7	8	9	10	11	12	13	14
Na	46.5×3.8	1–13	7	122	Inc. 8th. adhyāya	G	
Kan	15.5×19.5	1–203	12	18	C	G	
,,	15.5×19.5	1–203	12	18	C	G	
D	21×10.5	One	8	28	C	G	
Kan	26.8×5 8	1–25	9	48	Inc. 1–8 adhyāyas	O.D	
,,	26.8×5.8	One	8	12	Inc. 28 sūtras	G	31st. folio
,,	26.8×5.8	1–25	9	48	Inc. 1–8 adhyāyas	O.D	
,,	33×5.3	1–23	8	58	Inc.	D	
,,	19.5×32 3	1–27	20	26	C	G	
D	30×15.5	1–28	18	56	C	G	
,,	25×13	1–79	14	34	Inc.	G	
,,	30×15.5	1–28	18	56	C	G	

1	2	3	4	5	6
28920	P. 9245/1	Chandaḥprastāraḥ	Nārāyaṇakaviḥ		Pl
28921	P. 9245/2	Chandaḥprastāra vyākhyā		Nārāyaṇakaviḥ	,,
E 28922	C. 136	Chandaśśāstram			P
E 28923	C. 176	,, (Ṣaḍadhyāī)			,,
E 28924	P. 5181	,, (Piṅgalasūtram)	Piṅgalāryaḥ (Piṅgalanāgaḥ)		Pl
28925	P. 6704/2	,, ,,	,,		,,
28926	P. 7747/2	,, ,,	,,		,,
28927	P. 8742/8	,, ,,	,,		,,
28928	B. 1118/7	,, ,,	,,		P
28929	C. 481/9	,, ,,	,,		,,
28930	C. 2658	,, ,,	,,		,,
28931	C. 3763/3	,, ,,	,,		,,

7	8	9	10	11	12	13	14
Gr & Te	36.5×3.5	10–17	8	44	C	D.W	
Gr & Kan	36.5×3.5	10–17	8	44	C	DW	
D	29×11.5	Seven	10	28	C	D	From Agnipurāṇa
,,	24×11	1–6	11	30	C	D	From Garuḍa purāṇa
Na	28.5×4	42–46	10	58	C	O	
Kan	37×3.5	Four	5	50	C	W	
Te	48×3.5	1–4	8	100	C	G	
Na	22×3.5	1–3	6	40	Inc. End of Vaidikacchandaḥ	G	
Kan	18.5×14	1–3	17	20	Inc.	G	
D	20.5×10	1–6	8	28	C	G	
,,	24.5×12	1–8	8	22	C	D.W	
,,	20×10	6–8	11	38	C	O	

1	2	3	4	5	6
28932	C. 3796/2	Chandaśśāstram	Piṅgalāryaḥ		P
33	C. 4256/3	,,	,,		,,
28934	P. 10	Chandassūtravṛttiḥ	Halāyudhaḥ		Pl
28935	P. 2875	,,	,,		,,
28936	P. 6793/2	,,	,,		,,
28937	P. 7082	,,	,,		,,
28938	C. 2962/2	,,	,,		P
E 28939	C. 3796/3	,,	,,		,,
E 28940	B. 843/1	,,	Rāmasvāmi dikṣitaḥ		,,
E 28941	B. 843/2	Chandassūtravṛtti vyākhyā (Chandassudhā)		Nārāyaṇa-svāmī	,,
28942	B. 1006	,,		,,	,,
28943	B. 107/1	Chandassūtram (chandovicitiḥ)	Piṅgalanāgaḥ		,,

7	8	9	10	11	12	13	14
D	21×11	1–68	9	32	C	G	
,,	21.5×10.5	8–14	9	30	C	G	
Te	44×4	–26–	9	90	Inc. 1–5 chapters Inc.	G	
,,	37×5	1–25	11	64	Inc.	O·D	
Na	48×5.6	1–4	10	90	Inc. End of Gāyatrīprastāra vivaraṇa	O.D	
Na& Te	32×4	1–70	6	60	C	O.D	
D	23×10	1–53	11	36	C	D.W	
,,	21×11	1–68	9	32	C	G	
Kan	12×17.5	1–44	14	20	C	W	
,,	12×17.5	1–44	14	20	C	G	
Te	16.5×20.5	1–35	12	22	C	G	
,,	15.5×19.5	–160–	11	17	C	G	

1	2	3	4	5	6
E 28944	C. 135	Chandassūtram	Piṅgalanāgaḥ		P
28945	C. 2962/1	,,	,,		,,
28946	C. 3763/4	,,	,,		,,
E 28947	B 107/2	Chandassūtrabhāṣyam		Yādavaprakāśaḥ	,,
E 28948	C. 922	Chandovyākhyāsāraḥ		Kṛṣṇabhaṭṭaḥ	,,
28949	C. 1965/1	Triṃśacchandāṃsī			,,
E 28950	P. 9864/3	Daṇḍakavṛttiḥ			Pl
28951		Dhīśodhanī			
28952		Piṅgalasūtram			
E 28953	C. 2696	Prastārotkarṣasaṅgrahaḥ	Śrīnivāsa kavi sārvbhaumaḥ		P
28954		Maṇimañjarī			
28955		Ratnamañjūṣāsūtram			,,

7	8	9	10	11	12	13	14
D	29×11	1–8	9	30	C	O	
,,	23×10	1–53	11	36	C	D.W	
,,	20×10	Nine	11	38	C	O	
Te	16×21	1–160	11	17	C	G	
D	25×10	1–33	10	40	C	G	
Na	21×8.5	One	9	30	Inc. 21–30 Chandas	G	
,,	15.3×3	One	7	30	C	G	24th. folio
Please	see Vṛttaratnā	karavy	ākhyā				
Please	see Chandaśśā	stram					
D	20×10	1–9	9	30	C	O.D	
Please	see Vṛttaratnā	karavy	ākhyā				
Please	see Guṇāṣṭak	am					

1	2	3	4	5	6
28956		Ratnamañjūṣikā			
E 28957	P. 832	Lakṣaṇadipikā			Pl
28958	P. 5715/3	„			„
28959	P. 8576	„			„
E 28960	P. 871/3	Lagatkriyā			„
E 28961	A. 437/1	Vṛttacintāratnam	Śāntarāja Paṇḍitaḥ		P
E 28962	A. 437/2	Vṛttacintāratna vyākhyā		Devacandra paṇḍitaḥ	Pl
E 28963	C. 1808	Vṛttadarpaṇam	Maithila bhiṣmamiśraḥ		P
28964	A. 907/8	Vṛttapadyasaṅgrahaḥ	Grāmaṇī siṅgraiaṅgāryaḥ		„
E 28965	P. 6217/2	Vṛttabhedasaṅgrahaḥ	Nṛsimhaḥ		P
E 28966	C. 1436	Vṛttamaṇikośaḥ	Śrīnivāsaḥ		P
28967	.4765	Vṛttamaṇimālikā	„		„

7	8	9	10	11	12	13	14
Please see Gaṇāṣṭakavyākhyā							
Na	35.5×5.5	1–11	10	64	C	G	
Kan	23×4	20–27	6	40	C	D.W	
,,	38.5×5 5	Six	10	50	Inc.	D.W	
,,	28.8×5.8	26–27	9	48	Inc. 1–11 ślokas	G	
,,	19×33	1–221	22	24	Inc. End of Varṇa gaṇaprastāra	O	
,,	19×33	1–221	22	24	Inc. ,,	O	
D	28.5×14 5	1–18	14	54	C	G	
Kan	20×32	1–24	36	20	C	O	In Kannada
Gr	46.5×4	One	10	100	C	D.W	9th. folio
Te	31×10	1–9	10	38	C	O	
,,	23×4	1–8	8	24	C	O	

1	2	3	4	5	6
28968	C. 709	Vṛttamaṇimālikā	Śrīnivāsaḥ		P
28969	C. 2912/1	,,	,,		,,
28970	P. 867/2	Vṛttaratnākaraḥ	Kedāraḥ		Pl
28971	P. 1342/4	,,	,,		,,
28972	P. 1515/4	,,	,,		,,
28973	P. 1805/1a	,,	,,		,,
28974	P. 4327/a	,,	,,		,,
E 28975	P. 5047/6	,,	,,		,,
28976	P. 5068/1	,,	,,		,,
28977	P. 5182	,,	,,		,,
28978	P. 5715/1	,,	,,		,,
28979	P. 5793/3	,,	,,		,,

7	8	9	10	11	12	13	14
Te	21×10	1–6	15	30	C	G	
D	21×10.5	32–39	12	32	C	G	
Te	33×3.5	42–51	5	70	C	G	
,,	37×3.5	1–9	7	50	Inc. 1–6 Adhyāyas Inc.	W	
Gr	38.5×3,5	1–19	7	80	C	G	
Te	39.5×3.8	1–45	8	96	C	O. D	
Gr	40.5×4	1–36	9	86	C	D.W	
Te	37.5×4	26–34	7	64	C	G	
,,	43.5×3.3	1–8	6	84	C	G	
Na	28.5×4	47–53	10	58	C	O	
Kan	23×4	7–14	6	40	Inc. 4–6 Adhyāyas	D.W	Folios 10, 15, 16 missing
Te	39×3.5	1–9	6	72	C	D,W	

1	2	3	4	5	6
28980	P. 7747/1	Vṛttaratnākaraḥ	Kedāraḥ		Pl
28981	P. 9 04	,,	,,		,,
28982	P. 9168/1	,,	,,		,,
28983	P. 9255/2	,,	,,		,,
28984	P. 9864/2	,,	,,		,,
28985	C. 789/1	,,	,,		P
28986	C. 2068/1	,,	,,		,,
E 28987	C. 2877/1	,,	,,		,,
28988	C. 2887	,,	,,		,,
28989	C. 3861/1	,,	,,		,,
28990	C. 1805/1b	Vṛttaratnākara vyākhyā (Dhīśodhinī)		Śrīnāthaḥ	Pl
28991	C. 2032	,,		,,	,,

7	8	9	10	11	12	13	14
Te	48×5.5	1–5	8	100	C	G	
Gr	41×4	1–6	9	75	C	G	
,,	35.5×4	1–36	11	60	C	G	
,,	37.5×3.5	1–52	7	48	C	D.W	
Na	15.3×3	7–23	7	30	C	G	
Te	23×11	1–70	9	36	Inc. No End	G	
,,	31×13	1–27	12	42	C	O	
D	21×10	1–13	9	30	C	G	
,,	20.2×10.5	1–19	8	24	Inc. 1–6 Adhyāyas Inc.	G	
,,	29,4×10	1–35	8	52	C	G	Śa–1559, Nandana Mārgaśira, Kṛ–10
Na	39.5×3.1	1–45	8	96	C	O,D	
Te	40×3.5	1–49	7	46	C	D.W	

1	2	3	4	5	6
28992	P. 4327/b	Vṛttaratnākara vyākhyā (Dhīśodhinī)		Śrīnāthaḥ	Pl
28993	P. 6703	,,		,,	,,
E 28994	P.9168/2	,,		,,	,,
28995	P. 9255/1	,,		,,	,,
28996	C.789/2	,,		,,	P
E 28997	P. 5068/2	,,		Nṛsimhasūriḥ	Pl
E 28998	C. 3861/2	,, (Sudhākhyā)		Daivajña cintāmaṇiḥ	P
E 28999	P. 2068/2	,, (Setuḥ)		Bhāskaraḥ	Pl
E 29000	P. 336/1	,, (Maṇimañjari)		Nārāyaṇa purohitaḥ	,,
29001	P. 867/3	Vṛttaratnāvaliḥ	Veṅkaṭeśaḥ		,,
E 29002	P. 4761	,,	,,		,,
29003	P. 5660	,,	,,		,,

7	8	9	10	11	12	13	14
Gr	40.5×4	1–36	9	86	C	D.W	
,,	37×3.5	9–13	8	36	C	W	
,,	35.5×4	1–36	11	60	C	G	
,,	37.5×3.5	1–52	7	48	C	D.W	
Te	23×11	1–70	9	36	Inc. No End	G	
Te	43.5×3.5	9–29	7	100	C	G	
D	29.4×10	1–35	8	52	C	G	Śa 1559
Te	31×13	1–27	12	42	C	G.W	
Gr	24×4	1–25	9	36	C	G	
Te	33×3.5	One	5	82	Inc.	G	52nd. folio
,,	42×4.3	1–8	8	84	C	O	
Gr	41×5	1–3	9	90	Inc. Up to Viṣamavṛtta	O	

1	2	3	4	5	6
29004	P. 5793/4	Vṛttaratnāvaliḥ	Veṅkaṭeśaḥ		Pl
E 29005	A. 248	,,	Sadāśivamuniḥ		P
29006	P. 867/1	Śrutaprabodhaḥ	Ajitasenācāryaḥ		Pl
29007	P. 871/4	,,	Kālidāsaḥ		,,
29008	P. 4833/2	,,	,,		,,
29009	P. 5715/2	,,	,,		,,
29010	P. 5826/4	,,	,,		,,
29011	P. 6455	,,	,,		,,
E 29012	P. 6704/1	,,	,,		,,
29013	P. 7200/2	,,	,,		,,
29014	P. 7238	,,	,,		,,
29015	P. 8078/6	,,	,,		,,

7	8	9	10	11	12	13	14
Te	39×3.5	9–10	6	72	C	D.W	
D	19×32	1–56	28	42	C	G	
Kan	33×3.5	39–42	6	68	C	G	
,,	26.8×5.8	28–29	8	44	Inc. 1–23 ślokas	G	
Na	40×4	One	7	70	Inc. End of Campakamālāvṛttalakṣaṇam	W	2nd. folio
Kan	23×4	17–19	6	40	Inc.	W	
Te	37.5×3	46–47	8	80	C	D.W	
,,	47.5×4	1–3	9	60	C	O.D	
Kan	37×3.5	1–4	5	52	C	W	
Gr	37.5×4.2	One	8	88	C	G	
,,	40×4	30–32	8	92	Inc. 1–40 Adhyāyas	G	
Na	42×2.5	89–91	6	75	C	D.W	

1	2	3	4	5	6
29016	P. 9168/4	Śrutabodhaḥ	Kālidāsaḥ		Pl
29017	P. 9256/2	,,	,,		,,
29018	P. 9455	,,	,,		,,
29019	B. 49/2	,,	,,		P
29020	C. 2666/1	,,	,,		,,
29021	P. 146/2	Śrutabodhaṭikā (Subodhaḥ)		Ajitasenācāryaḥ	Pl
29022		Ṣaḍadhyāyī			
29023	C. 2757/1	Ṣaṭpratyayam			P
29024		Sudhā			
29025		Setuḥ			

7	8	9	10	11	12	13	14
Gr	35 5×4	1–2	11	60	C	G	
,,	27.5×3.5	27–29	9	40	C	O.D	
Kan	39×3.5	2–5	5	38	Inc.	O	
,,	17×21	9–12	19	20	Inc.	G	
D	21×10.5	1–7	8	28	C	G	
Kan	41×5	20–28	9	48	C	G	In Kannada
Please see Chandaśśāstram							
D	20.3×10 5	1–4	18	58	C	G	In Kannada
Please see Vṛttaratnākaravyākhyā							
Please see Vṛttaratnākaravyākhyā							

1	2	3	4	5	6
29016	P. 9168/4	Śrutabodhaḥ	Kālidāsaḥ		Pl
29017	P. 9256/2	,,	,,		,,
29018	P. 9455	,,	,,		,,
29019	B. 49/2	,,	,,		P
29020	C. 2666/1	,,	,,		,,
29021	P. 146/2	Śrutabodhaṭikā (Subodhaḥ)		Ajitasenācāryaḥ	Pl
29022		Ṣaḍadhyāyī			
29023	C. 2757/1	Ṣaṭpratyayam			P
29024		Sudhā			
29025		Setuḥ			

7	8	9	10	11	12	13	14
Gr	35 5×4	1–2	11	60	C	G	
,,	27.5×3.5	27–29	9	40	C	O.D	
Kan	39×3.5	2–5	5	38	Inc.	O	
,,	17×21	9–12	19	20	Inc.	G	
D	21×10.5	1–7	8	28	C	G	
Kan	41×5	20–28	9	48	C	G	In Kannada
Please see Chandaśśāstram							
D	20.3×10 5	1–4	18	58	C	G	In Kannada
Please see Vṛttaratnākaravyākhyā							
Please see Vṛttaratnākaravyākhyā							

APPENDICES

APPENDIX I

EXTRACT

I

Sl. No : 25502 अणुमध्वविजयः **Ms. No : P. 9717/7**

Beginning :

श्रीशप्रीत्यै प्रजातः शुभहितमहिमा यो हनूमान्निदेशात्
रामस्योल्लङ्घ्ताब्धिः सहरिरथ गतः सेतुनापिव्यतुष्टः ।
भूभृन्नीरावणारिं पुरगमुरुदयं शेवधिर्वासशीतं
पश्यन् किंपूरुषे तं सततमपि महान्प्राणमुख्योऽवतान्माम् ॥

End :

सन्मन्त्रे विक्रमार्याद्व्यरचयदनुभाष्यं शतग्रन्थ-
सोदर्यं स्वं × × × र्थम् ।
वारीन्द्रं पद्मनाभे प्रियमथ चरमात्सद्गुणाच्च शिष्यान्
योऽनेकान् सद्गृहस्थानपि च विजयते ×
वेदमानं समवितुमत सो × × ×
श्रुतिविक्करणाक्रु × × स्वम्भित × ॥

Colophon :

— — —

2

Sl. No : 25504 **अणुमध्वविजयव्याख्या** **Ms. No : C. 1465**

Beginning :

इन्दिरापतिमानस्य पूर्णबोधान् गुरूनपि ।
व्याख्यास्यामि पराबोधीं प्रमेयनवमालिकां ।
इहान्वयमुखेनैव श्लोकार्थोऽपि निरूप्यते ।
गूढभावप्रकाशश्च क्रियते प्रीतये हरेः ॥

इह खलु संसारकान्तारसञ्चारोदर्कदुःखानलसन्तप्तसुजनकुमुदवृन्दान्यनुजिघृक्षुर्नारायणपण्डिताचार्यः नि × न सन्ताप शामक—

End :

गण्डवापै गण्डवापराख्यौ विप्रौ यस्य श्रीमध्वस्याङ्गुल्या अङ्गुलिमात्रस्य चालनेन × समर्थौ धरायामङ्गुलिं निक्षिप्येयमुध्रियतामिति श्रीमध्वेनोक्ते × द्धर्तुं कं परेपिरसमर्थाविति भावः । प्राग्वा × ×

Colophon :

— — —

3

Sl No : 25503 **अणुमध्वविजयव्याख्या** Ms. No : C. 1339

Beginning :

इन्दिरापतिमानस्य पूर्णबोधान् गुरूनपि ।
व्याख्यास्यामि यथाबोधं प्रमेयनवमालिकाम् ॥
इहान्वयमुखेनैव श्लोकार्थोऽपि निरूप्यते ॥
गूढभावप्रकाशश्च क्रियते प्रीतये हरेः ॥
इह खलु + + श्रीशस्येति ॥

End :

श्रवणभूषणं सज्जनानां कर्णभूषायितं, एषः नारायाणपण्डिताचार्यः, व्यतनुत कृतवान् । तनु विस्तारे लङ् । × × ×

× मेण विश्वस्य – त्युत्पत्त्यादिकं भवेत् ।

तस्य श्री × नाथस्य पादपद्मं समाश्रये ॥

Colophon :

इति श्रीमहाभाष्य (व्यं) वेङ्कटगिरिरचितप्रमेयनवमालिकाव्याख्या गूढभावप्रकाशिका समाप्ता ॥

4

Sl. No : 25505 अणुजयतीर्थविजयः Ms. No: P. 4001/10

Beginnng :

नत्वा कृष्णं तथा मध्वं जयतीर्थगुरूनपि ।

वक्ष्ये श्रीमज्जयार्याणां स्तोत्रं सर्वसमृद्धिदम् ॥

श्रीमानिन्द्रस्सुधीमान् गिरिशमुनासुरैः प्राच्यमानःसुशात्रं

स्तोत्रं चैकाग्रबुध्या वृषतनुरभवत श्रीमदानन्दतीर्थात् ।

धृत्वा तच्छास्त्रभारं प्रतिदिनमगृणोद्वाच्यमानं सुशास्त्रं

प्रान्तेऽसौ सूपविश्य द्विजगणसहितो ग्रन्थभारं दधानः ॥

End :

चित्रं श्रीमज्जयार्यैः कृतमतविदारं किंरूपं कोऽनु वक्ता

किं × प्यर्धमल्पं गुरुभिरनुदिनं वर्णितं वार्जितं मे ।

तेन श्रीमध्वनाथो यदुकुलतिलको माधवौ मानसिजातु

× यात्प्रीतः समस्ताङ्गेपि गुरुगु कः प्रीतियुक्ते भवन्तु ॥ (?)

Colophon :

इति व्यासतीर्थविरचिताणुजयतीर्थविजयः समाप्तः ॥

5

Sl. No : 25506 अच्युतरायाभ्युदयम् Ms. No : P. 757

Beginning :

× क्षम × काक्षं नागेशयमगेशयम् ।

विपुङ्गवध्वजं धाम पुङ्गवं ध्वजमाश्रये ॥

अव्यादपूर्वो निधिरागमानां

आद्यो वृषाद्रेः पतिरच्युतेन्द्रम् ।

रिरिक्षितुं निस्पृहकाङ्क्षितं यत्
निरञ्जनाभावजनाक्ष × न्त ॥

End :

निशामयामास नृपं प्रशान्तं
निर्भर्त्सयन्ती विनिरुन्धतीव ।
पर्यहार स × प्रयान्त्या
स्तनावभातान्तरळोचरीयौ ॥

Colophon :

इति राजनाथस्य कृतौ अच्युतरायाभ्युदयनाम्नि महाकाव्ये एकादश-
स्सर्गः ॥

6

Sl. No : 25508 अन्यापदेशशतकम् **Ms. No : C. 786**

Beginning :

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन् अनुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन्मृगपतिः ॥

End :

गिरयो गुरवस्तेभ्योऽप्युर्वी गुर्वी ततोऽपि जगदण्डम् ।
तस्मादप्यतिगुरवः प्रलयेऽप्यचला महात्मानः ॥

Colophon :

— — —

7

Sl. No : 25509 अन्यापदेशशतकम् **Ms. No: P. 4416**

Beginning :

पुरा सरसि मानसे विकचसारसालिस्खल-
× सुरभीकृते पयसि यस्य यातं वयः ।

सपल्वलजलेऽधुना मिळदनेकभेकाकुले
मराळकुलनायकः कथय रे कथं वर्तताम् ॥

End :

चम्पकेषु चयोदं × फलस्य च ।
यथेक्षुखण्डमाधुर्यमौदार्यं सहजो गुणः ॥

Colophon :

श्रीमदुपद्रष्टस्वयाम्भोधिकासुधाकरे प्रबन्धनिर्माणधुरीणसर्वतन्त्रस्वतन्त्र विरुदाङ्कितश्रीमच्छिवशङ्करपण्डिरतराणिर्मितमन्यापदेशशतकं समाप्तिमगमत् ॥

8

Sl No 25510 अन्यापदेशशतकम् Ms No: B. 629/5

Beginning :

श्रेयांसि भूयांसि स मे रमेशो
देयान्मुदे यो दिविषज्जनानाम् ।
अन्यापदेशादुदधीशकन्या
विन्यासदेशं हृदयं व्यतानीत् ॥

End:

चिन्तामणिं च सुरभिं हरिचन्दनं च
हन्तादितेयविभवे विभवाय दत्वा ।
आत्माश्रितैरशुचिबाडबजीवनाय
पत्नीस्थजीवनमुपैष्युदधे जडात्मन् ॥
अस्ति स्वस्तिकरः कराञ्चितगळद्धाराळधारामिळ
त्क्षेत्रग्राममलद्भिदोवदं प्रस्तयमानस्तुतिः ।
श्रीमत्कोसलवंशवारिधिशाशिश्रीवेङ्कटक्ष्मापति
स्तत्सन्तोषकृते कृतिं प्रविदधे श्री श्रीनिवासः सुधीः ॥

Colophon :

अन्यापदेशशतकं सम्पूर्णम् ॥

९

Sl. No : 25512 **अन्यापदेशशतकम्** Ms. No : P. 927/1

Begnning :

कोऽयं कारणकरुणः कोकिलकुलनायको मम श्रवसि ।
पञ्चमरुतगळदमृतैस्सिञ्चति कटुफेरवारच × लीते ॥

End :

समुद्रः —
अर्थोल्कण्ठवकुण्ठप्रमुषितविनयैर्लुठ्यतां नाकशुण्ठैः
प्रत्नो रत्नोच्चयः किन्त्वतिविषमदशान्तामनुध्याय खिद्ये ।
सिन्धोर्मन्धाद्रिमाण्डत्तरतरवीचिचय ×

Colophon :

— — —

10

Sl. No : 25514 **अन्योक्तिसङ्ग्रहः** Ms. No : P. 4237/7

Beginnig :

सूर्यान्योक्तयः—
तस्मै वाऽभ्युदयो भूयात् भानोर्यस्योदये सति ।
विकासभाजो भूयन्ते गुणिनः कमलाकराः ॥

End :

महात्यागदयायुक्तः सत्यभामासमन्वितः ।
भवांश्च भगवांश्चेति गतो भेदः परस्परम् ॥

Colophon :

— — —

11

Sl. No : 25515 **अन्योक्तिसङ्ग्रहः** Ms. No : B.394

Begnnng :

× शु × यञ्चोक्तः ।
तस्यैवाभ्युदयो भूयविद्वानोरभ्यातरा (?)

× द्योतो द्योतते × द्यावनोव × ।

× दिते तु सहस्राविखानखद्योतो × न्दमा: ॥

End :

इत्थं स्तो × भक्तजने ×

म्भवमीतिवार्तभिभवावसादीयमिमं यः ।

वि × लि × कं पठति श्रृ × ति ।

× स्मनि चाप्नोति मनुष्यः ॥

Colophon :

— — —

12

Sl. No : 25518 अप्पयदीक्षितचरितम् Ms. No : B. 921

Beginning :

श्रीशिवज्ञानसन्मार्गसंप्रदायप्रवर्तकम् ।
श्रीमदप्पययोगीन्द्रदेशिकेन्द्रमुपास्महे ॥
शिवानन्दाब्धिसञ्जाता श्रीमदप्पयकामधुक् ।
श्रेयस्तनोनु सततं शिवानन्दाभिधस्य मे ॥
इह समनुजिघृक्षोरादृतप्राकृतस्य
प्रथितचरितमसद्गोचरं किं शिवस्य ।
तदपि गुरुवराज्ञाभृच्छिवानन्दनामा
किमपि समभिवक्ष्ये सङ्ग्रहेणैश्वरं तत् ॥

End :

भूरीणि तस्य चरितानि परावरज्ञाः
ग्रन्थाधिकैरकवयन् कवयश्चतुर्धा ।
तत्सारभूतमित्यवयन् सुधीर्मे (?)
काव्यं गुरुं च बहुमानयतीति मन्ये ॥
इत्यष्टाविंशचरितम् ॥

Colophon :

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभस्य श्रीमदप्पयदीक्षितेन्द्रस्य सुचरित काव्येषु पञ्चसु शिवानन्दीयं नाम काव्यं सम्पूर्णम् ॥

13

Sl. No: 25519 **अम्बरीषचरितम्** Ms. No: B. 988

Beginning :

श्रीमन्मार्ताण्डवंश्यादसुरयुधि शुनासीरगोप्तु
नाभागाल्लब्धजन्मा शलभितरिपुतेजोम्बरीषोम्बरीषः ।
आसीदासीमभूमीपतिरतुलयशा विष्णुतद्भक्तभक्तो
साम्राज्ये प्राज्यशर्मण्यपि तरलधिया निर्ममो निर्मलात्मा ॥

End :

भगवति कमलेशे जातभक्तिप्रकर्षो
बहुमुखमिह भुक्त्वा सार्वभौमोऽम्बरीषः ।
निरवधिसुखमन्ते वैष्णवं धाम लेभे
हरिभजनरतानां नैव किञ्चिद्दुरापम् ॥

Colophon :

अम्बरीषचरितं खण्डकाव्यं समाप्तम् ॥

14

Sl. No: 25521 **अमरुकशतकम्** Ms. No: P.1515/1

Beginning:

ज्याकृष्टिबद्धकरकामुखपाणिपृष्ठ
प्रेङ्खन्नखांशुचयसंवलितो मृडान्याः ।
त्वां पातु मञ्जरितपल्लवकर्णपूर
लोभभ्रमद्भ्रमरविभ्रमकृत् कटाक्षः ॥

End :

सालक्तकेन नवकोमलपल्लवेन
पादेन नूपुरवता मदलालसेन ।
यस्ताड्यते दयितया प्रणयापराधात्
सोऽङ्गीकृतो भगवता मकरध्वजेन ॥

Colophon :

अमरुशतकं समाप्तम् ॥

15

Sl. No : 25536 **अमरुकशतकम्** Ms. No : C· 1080

Beginning :

ज्याकृष्टिवद्धकरकामुखपाणिपृष्ठ

\+ \+ \+ \+

लोभाद्भ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥

End :

सालक्तकेन नवपल्लवकोमलेन

\+ \+ \+ \+

त्सोऽङ्गीकृतो भगवता मकरध्वजेन ॥

Colophon :

इति श्रीमच्छङ्करार्यविरचितं अमरग (?) शतकं समाप्तम् ॥

16

Sl. No : 25541 **अमरुकशतकव्याख्या** Ms. No : P.37/2

Beginning :

× ना रचितां शृङ्गाररसात्मिकां शतश्लोकीम् ।

श्रुत्वा विकसितचेताः सदभिप्रायं प्रकाशयान्नेतुम ॥

मूलश्लोकान् स × ×

× × ष्टां शृङ्गादीपिकाम ॥

अवतारोऽथसम्बन्धोऽभिप्रायो भावलक्षणः ।

नायिका तदवस्थाश्च नायकश्च ततो रसः ॥

End :

अत्र नायिका स्वीया धीरा प्रगल्भा च नायकश्शठः ।

ईर्ष्यामानकृतविप्रलम्भश्च × × × ।

क्रोधप्रायन्नर्म आक्षेपो ल × × × ॥

Colophon : — — —

17

Sl. No : 25544 अमरुकव्याख्या Ms. No : P. 1794/2

Beginning :

नायकेन भेदोपायं प्रापिता सखी नायिकामाह — अङ्गुल्यग्रनखेन— सखी नायिकासन्निधौ नायकमाह—दत्तोऽस्याः प्रणयः—

End :

अत्यन्तापराधिनि प्रिये समागते कुपिताया नायिकाया आकारगोपन प्रकारं कविराह—नान्तःप्रवेश – कवेर्वाक्यं – प्रियकृतपट कवेर्वाक्यं— सालुक्तकेन ॥

Colophon :

इति श्री वीरनारायणसकलविद्याविशारदपेद्कोमटिवेमभूपालवि· चिता शृङ्गारदीपिका समाप्ता ॥

18

Sl. No : 25567 आर्याशतकम् Ms. No : C. 2943/1

Beginning :

त्वयि विमुखे मखमुख्ये
सख्ये नान्यस्य कस्य जीवामि ।
जीवामि च भवदर्पितवसना-
शनमात्रजीवनास्सर्वे ॥
परितः पश्यसि परितः + +
न शृणोषि न वीक्षसे न वा वेत्सि ॥

End :

धनुषा रिपुजयधनुषा
रुचिरतराकारनिर्जिताम्बुधारा ।
तरुणारुणनिभचरणा
काचन करुणा रुणाद्धि मे हृदयम् ॥

Colophon :

— — —

19

Sl. No : 25568 **आर्याशतकव्याख्या** Ms. No : C. 2943/2

Beginning :

सीतालतासमासक्तं रामकल्पमहीरुहम् ।
सफलं शीतलच्छायं श्रान्तविश्रान्तिदं भजे ॥
महामुद्गलभट्टेन रामचन्द्रप्रभोः कृता ।
आर्यावृत्तस्तुतिस्तस्याः व्याख्यानं क्रियते स्फुटम् ॥

End :

प्रफुल्लनयनाम्भोजं भजे दशरथात्मजम् ॥
पदार्थद्योतनी चेयं दीपिकार्यानुकूलिनी ।
काकम्भट्टैः सुरचिता स्वसुखाप्त्यै मुदा स्फुटम् ।

Colophon :

इति काकम्भट्टविरचिता पदार्थद्योतनीदीपिका समाप्ता ॥

20

Sl. No: 25569 **आर्यासप्तशती** Ms. No : P. 552

Beginning :

पातय वा पाताले स्थापय वा सकललोकसाम्राज्ये ।
अम्ब त्वत्पदयुगलं नाहं मुञ्चामि नैव मुञ्चामि ॥
पाणिग्रहे पुलकितं वपुरैशं भूतिभूषितं जयति ।
अङ्कुरित इव मनोभूर्यस्मिन्भस्मावशेषोऽपि ॥
मावमसमवृणु विषमिदमिति सा कृतं पितामहेनोक्तः ।
प्रातर्जयति सलज्जः कज्जलमलिनाधरः शम्भुः ॥

End :

जागरयित्वा पुरुषं परं वने सर्वतोमुखं हरसि ।
अपि शारदनुरूपं तव शीलमिदं जातिशीविन्याता ॥
जीवामि लङ्घितावधिदिने लज्जावशेन गेहिन्या ।
मुहुर्निह्नुतोऽपि बाष्पैरसंवरैर्व्यञ्जितो मानः ॥

जाल्मो गुरुषु सुदृष्टो वामेतरचरणभेदमुपदेशः ।
ख्यातिगुणो धवल इति भ्रमसि ×

Colophon :

— — —

21

Sl. No :25570 **आर्योल्लासः** Ms. No : C. 2776

Beginning :

एकमपि विश्वसृष्ट्यै मिथुनीभवति स्म यत्पुरा बहुधा ।
शिवनाम वाग्विभूत्यै कलये तदुपनिषदाशयं द्वन्द्वम् ॥

End :

सरसापि गौः प्रवृत्ता बुधनन्द्या सा प्रभौ स्फुरति ।
न विभाति सिन्धुराजे सुरपुरसेव्या सरस्वती सापि ॥
या श्लाघ्यते स्वशिरसा सुमनोभिः सद्ववी सैव ।
शिवमौलिलालितैव त्रिभुवनगेया सरस्वती ॥

Colophon :

इत्यार्योल्लासः॥ कुण्डलिनः - - - मन्त्रज्ञैः ॥

22

Sl. No : 25571 **ईश्वरशतकम्** Ms. No : C. 4500/1

Beginning :

स वः पापाद्येन नित्येवासुकिर्निजहारतो ।
तपोपायाच्चतक्रोपाद्यः स्मरस्य जहार ताम् ॥
वदामि ते स्वरमयन्नमोहं वहामि संसारमापन्नमोहम् ।
तनुमुन्दायोगवता स्मितेन तनमन्दायोगवता स्मितेन ॥

End :

महामतेमत्रमते परं परं विनाविभेदनिकोतिभूतिमान् ।
कृपाकृते कृतयमायमापते यतेनमोनमोम्रहितेहि पाहि माम् ॥
चतुर्महादेवस्वस्तिकाबन्धः —
भो भो भविभो भावीभभविभावैभविभावैं ।
भवि भावैभवभीभुवः भवावभावि भवासि भवभावभित् ॥

Colophon :

इति श्री महाकव्यवतारकृतमीश्वरशतकं काव्यं सम्पूर्णम् ॥

23

Sl. No : 25572 ईश्वरशतकव्याख्या Ms. No : C. 4500/2

Beginning :

स: व: पायादित्यादि ग्रन्थारम्भे त्रिविधविघ्नोपघातार्थं कविना नमस्कार वाक्यबहुचितं सूचितम्। येन भगवता स्वतन्त्रेण धराधरणयोग्यो वासुकि हारितां नीत: तेन विश्वधारित्वं ध्वनितम्।

End :

तवलीकारस्तस्य यो भावावसत्ता तद्वित् भव वाशब्दो विकल्पे। भो भो इति प्रधानामन्त्रणे। अवक्षत: कृतांतात् मियौ भयस्य भवस्य भू: उत्पत्ति स्थानं तत: व्यक्षरीयं श्लोक: ॥

Colophon :

— — —

24

Sl. No : 25574 उदारराघवम् Ms. No : P. 3036/1

Beginning :

अस्ति प्रशस्तप्रकृते: पुरस्तात्
आद्य: पुमान् केवलचित्स्वरूप:।
स्वानन्दपूर्ण: सदसत्स्वयं च
बाह्यान्तरव्यासबहुप्रकार: ॥

End :

हिरण्मयीं देवपुरीमयोध्यां
अध्यास्यतां ब्रह्मपुरीं विदित्वा।
पूर्णामृताम्भ:परिघापरीतां
प्रजा: परब्रह्मसुखं भजन्ते ॥

Colophon :

— — —

25

Sl. No : 25575 — उदारराघवम् — Ms No : P. 3036/3

Beginning :

ये वाजपेयैरपि वाजिमेधैः
ये राजसूयैश्च सुरानयाजुः ।
ये भुक्तभोगा भुवि तत्र हित्वा
शरीरमन्ते त्रिदिवे रमन्ते ।।

End :

उदपान्नगतोड्डुपानसासौ
× × सीतापगायाः ।
अभयं कुरुतादिनस्त्रयाणां
इति तां सूर्यसुतां सतीं ववन्दे ।।

Colophon :

— — —

26

Sl. No : 25576 — उदारराघवव्याख्या — MS. No :P. 1481/2

Beginning :

पृथ्वीश इति । मुनिसुतस्य वैश्यतपस्विसूनोः घातेन हननेन खिन्नं दुःखितं चेतः मनो यस्य स तथोक्तः । पृथ्वीशो भूपतिः दशरथः तामयोध्यां पुरमधिगम्य शुद्धान्ते अन्तःपुरे शुद्धान्तश्चावरोधश्चेत्यमरः ॥

End :

वायव्यमिति । अम्बुदाभो मेघकान्तिः रघुपतिः रामः × × अविहतं अकुण्ठितं हविर्होतव्यं यस्मिन् तस्मिन् अविहतहविषि सप्ततन्ता वध्वरे सम्पूर्णे सति समाप्ते सति महर्षिः कौशिकः हर्षं सन्तोषं प्राप । स्रग्धरावृत्तम ॥

Colophon ;

श्रीमन्मायितनूभवति श्रीचौडिसूर्ये कृता- (?)
वज्ञानां हृदयान्धकारदलनप्रद्योतनी नामनि ।
भूमौ भास्वदुदारराघवमहाकाव्येऽस्य नित्योल्लस-
द्व्याख्याने विदुषां मनोहरतमस्सर्गो द्वितीयोऽगमत् ॥

27

Sl No : 25577 उदारराघवव्याख्या Ms No: P. 3036/2

Beginning :

प्रशस्तप्रकृते: उत्कृष्टादि + स्या: पुरस्तात् पुरतः आद्यः प्राथमिकः केवलचित्स्वरूपः मुख्यज्ञानस्वरूपः सत् असत् सदसत् तस्य बाह्ये बहिःप्रदेशे . . . . वर्तते ।

End:

हिरण्मयीमिति ॥ हिरण्मयीं स्वर्णमयीं देवपुरीं अध्यासत्यतां (?) पूर्णामृताम्भःपरिघापरीतां अयोध्यापुरीं ब्रह्मपुरीं विदित्वा प्रजाः परब्रह्मसुखं भजन्ते ॥

Colophon :

— — —

28

Sl. No :25578 उदारराघवव्याख्या Ms. No : P.3036/4

Beginning :

ये राजानो वाजपेयैः क्रतुविशेषैः वाजिमेधैरश्वमेधैरपि ये राजानो राजसूयैश्च सुरादीनिन्द्रानयाजुः पूजयामासुः यजतेर्लुङ् . . . . स्वर्गे रमन्ते क्रीडन्ते रमतेर्लट् ॥

End :

नयनिष्ठाः नीतिज्ञाः वरिष्ठाः कार्यकुशलाः यविष्ठाः युवानः . . . . . . प्रक्षुद्राणां यणादिपरं पूर्वस्य च गुण इति अनेन यगिधिपरं व्यज्यते । पूर्वस्य च गुणः एचोयवायाव इत्यनेन ॥

Colophon :

इत्युदारराघवे पञ्चमः सर्गः ॥

[१९४ तमे पत्रे]

29

Sl. No : 25579 उदितोदयचरितम् Ms. No : P. 4882

Beginning :

कल्याणं क्रियतामद्य सुज्ञानोदयदीधितिः ।
कषायाटविदाव × : वृषभेशनखद्युतिः ॥
+ + + +
मङ्गलार्थं नमस्कृत्य देवशास्त्रगुरूनहम् ।
उदितोदयरूपस्य चरितं प्रवादामि भो ॥
हस्तावलम्बं मत्वाहं पूर्वाचार्यपरम्पराम् ।
प्रतरामि कया × उदितोदयभूपतेः ॥

End :

× त्मीरामुनीन्द्रमुखयो ×
विशालबु × लात्म × नाः ।
तदीय × × ला :
× × माणिकण्ठिका स्यात् ॥

Colophon :

इति श्रीचारुकीर्तिपण्डिताचार्यानुचरश्रीशिखामणिशास्त्रिविरचितोदितोदय चरिते उदितोदयनिर्वाणागमन × ॥

30

Sl. No : 25581 उपाहरणकाव्यम् Ms. No : P.6593/1

लक्ष्मीलावण्यपीयूषपानपालायितेक्षणः ।
स नीरनीरदघनश्यामः पातु वो भगवान् हरिः ॥
यत्पादपद्मयुगरेणुनिषेवणेन
सद्यः प्रभूतमतयो भविनो भवन्ति ।
स्कन्दाभिधानगदितं गुरुमद्य मूर्ध्ना
ज्ञानामृतोपनिधिभूमिममुं नमामि ॥

End :

गुणाधिकानाप्रसवापदेश-
स्वतो वियोज्याशु पटुस्तमूच × ।
उदारकीर्तेः स्वमुदस्यतां यशोऽ-
वमानिनी हास्य तथा सदः श्रुतेः ॥

Colophon :

[इति श्रीमत्कविकुलतिलकश्रीमल्लिविक्रमपण्डिताचार्यविराचितोषाहरणे चतुर्थः सर्गः]

31

Sl. No: 25582 उषाहरणम् Ms. No : C. 377/1

Beginning :

विज्ञानपाथेयवतां विपश्चि-
दागन्तुकानामहमात्मशक्त्या ।
आतिथ्यकार्याय फलं रसार्द्रं
काव्याभिधानं लिकुचिः प्रसोप्ये ॥
न प्रौढशब्दापि न चार्थपुष्कला
नचाप्यलङ्कारशुभाकृतिर्मम ।
न श्राव्यवृत्ता रसिकैरुपेक्षिता
नवेति कैश्चित् ह्रियते वधूरिव ॥

End :

उपसृद्य कालमवतंसलीलया
तदुपायविन्नरकभित्स्वमन्दिरम् ।
प्रतिपद्य दीप्तिमतुलामुपाददे
सह बान्धवैः उडुगणैरिवोडुराट् ॥
[द्वितीयः सर्गः]
अथ शुश्रुवुरूर्जितश्रियो
मुदिता द्वारवतीनिवासिनः ।

वसुदेवसुतानुरागिणो
वरयोग्यामिह भीष्मकात्मजाम् ॥
[तृतीयः सर्गः]

Colophon :

इति श्रीमत्कविकुतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यविरचितोपाहरणे महाकाव्ये द्वितीयः सर्गः ॥

32

Sl. No : 25583 **उपाहरणकाव्यव्याख्या** Ms. No : P. 6593/2

Beginning :

श्रीमन्तो जानकीजानेः पदपङ्कजपांसवः ।
जयन्ति सीतावक्षोजकुंकुमश्रीविडम्बिनः ॥ +
यतिः स सुमतीन्द्रराडहमनर्घ्यपद्मक्रम -
त्रिविक्रमकवेः कृगमुपचयं जगत्यां नयम् ।
उपाहरणदीपिकां रसिकरञ्जनीनामिकां
तनोमि सुमनोमनोधनविनोदभावोदयाम् ॥

End :

तथा च तत्रैव युक्तसमं विषमं चायुगं × त्वभेदं नियतता सर्वत्र भिन्नसर्गान्तैरुपेतं लोकरञ्जकं काव्यं कल्पान्तरस्थायीति कविसमयोऽनुगृहीतः ॥

Colophon :

इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यविरचितोपा × × व्याख्यायां रसिकरञ्जनीसमाख्यायां सुधीन्द्रगुरुपादशिष्यसुमतीन्द्र - विरचितायां षष्ठः सर्गः ॥

33

Sl. No : 2558 **एणीपञ्चकम्** Ms. No : C. 3478

Beginning :

अयि कुरङ्ग तपोवनविभ्रमा-
दुपगतासि किरातपुरीमिमाम् ।
किमु न पश्यसि खादय मारय
भ्रमपिचेति शुकोऽपि च जल्पति ॥

End :

मध्ये ज्या त्रुटिता शरासनमहोच्छन्नं दवाग्नेरयात्
निर्यातः शुनकौशसानुमितौ चालाश्वदग्धाः पुनः। (?)
शान्तो वह्निरकालमेघसलिलैरेणीकुटुम्बावृता
याता श्रीशकृपा हि यस्य जननी हन्यास्तमन्याः कथम् ।।

Colophon :

— — —

34

Sl. No : 25587 कलिविडम्बनम् Ms. No : C. 276

Beginning :

न भेतव्यं न बोद्धव्यं न श्राव्यं वादिनो वचः।
झटिति प्रतिवक्तव्यं सभासु विजिगीषुभिः ।।
असम्भ्रमो विलज्जत्वमज्ञानं प्रतिवादिनि ।
हासो राज्ञस्तवश्चेति पञ्चैते जयहेतवः ॥
उच्चैरुद्घुष्य जेतव्यं मध्यस्थश्चेदपण्डितः ।
पण्डितो यदि तत्रैव पक्षपातोऽधिरोप्यताम् ॥

End :

काममस्तु जगत्सर्वं कालस्यास्य वशंवदम् ।
+ प्रपन्नानां कालः किं न करिष्यति ।।

Colophon :

कविना नीलकण्ठेन कलेरेतद्विडम्बनम् ।
रचितं विदुषां प्रीत्यै राजस्थानानुमोदनम ॥

35

Sl. No : 25588 कलिविडम्बनम् Ms. No : C. 784

Beginning :

वाक्खण्डा गण्डशैलाः मृदुलकविहृदामेतदर्था अनर्थाः
व्यङ्ग्यं शृङ्गं खगणां गुरुतरदुरितव्रातपाकश्च पाकः।

सन्दर्भो दर्भरज्जुः कुकविरतितरामीदृशैर्नव्यकाव्यैः
चेतोहारी नराणामहह खलकलिः केन शक्यस्तरीतुम् ॥

End :

नादानं धनिनां कुले पुरवरे लेताक्षये निर्मितं
मन्त्राणामुपदेशतश्च धनिनो नीता न ते शिष्यताम् ।
भूतानुग्रहनिग्रहौ न भवता संशीलितौ साधुना
चित्तं स्यात्तव पापभिरुक कुतोर्न जाने कलौ ॥ (?)

Colophon :

इति नवीनकालिदासकृतौ कलिविडम्बने ।
पञ्चमी डम्भदुर्दान्तपद्धतिः समपूर्यत ॥

36

Sl. No : 25590 कल्याणरामायणम् Ms. No : A. 798

Beginning :

श्रीकृष्णं यदुभूषणं मुररिपुं श्रीशङ्करं षण्मुखं
विघ्नेशं नृहरिं च मत्कुलगुरुं श्रीशिङ्गरादिस्थितम् ।
नत्वाहं तु सरस्वतीं प्रतिदिनं विप्रान् बहून्मे गुरून्
वक्ष्याम्यद्य रघुप्रवीरचरितं कल्याणरामायणम् ॥

\+ \+ \+

वाल्मीकिमुखसम्भूतश्लोकानां सारमुत्तमम् ।
चतुर्विम्शत्सहस्राणि शेषेण रचितं पुरा ॥

End :

यौवराज्यधुरं सर्वं भरते सन्निवेश्य च ।
कृत्वा यागान् बहुविधान् अश्वमेधाननेकशः ॥
सदक्षिणान् यथाशास्त्रं रामो धर्मभृतां वरः ।
दशवर्षसहस्राणि पृथिवीमन्वपालयत् ॥
आञ्जनेयमति पाललाननं + +
भावयामि पवमाननन्दनम् ॥

Colophon :

इति श्रीमत्कल्याणरामायणे युद्धकाण्डे षोडशोऽध्यायः ॥

37

Sl. No: 25594 कविकण्ठपाशः Ms· No: B. 743/1

Beginning:

लीलावासगृहं गिरिक्षतिकरं लक्ष्मीनिवासास्पदं
कोकाह्लादविघातकं परशिशुत्राणप्रवृत्त्यातुरम्।
वक्षोजद्वितयं विभाति हरिणीलोलेक्षणे तावकं
कान्तावत्करिदन्तवत्कमलवत् काकुत्स्थवत् काकवत् ॥

End:

विष्वग्भारतमालयं नवसुधारूपं सुधागौरवं
नालीकेङ्गितसङ्गतं नखरजःश्रीकलिपता!लेपनम् ।
व × कम् क्षोणीवत् क्षणदेशवत् क्षतजवत्क्षीणात्मवत् क्षान्तवत् ॥

Colophon:

इति राधातत्सखीसल्लापरूपेण ककारादिक्षान्ताक्षरक्रमोपमानशब्दप्रासचम त्कृत्या श्री कालिदाससंग्रथिता स्तनवर्णनात्मिका कविकुलकण्ठपाशाख्या कृतिः समाप्ता ।।

38

Sl. No: 25600 कविकण्ठपाशव्याख्या Ms. No: B. 743/2

Beginning:

लक्ष्मीकान्तस्य पादोऽयं भोभूयान्मम सम्पदे ।
विघ्नान्धकारसङ्घानां निरासनदिवाकरः ॥

लीलेति। लीलावासगृहं लिलायाः पत्ररचनायाः वासगृहं, निवासस्थानम् कान्तापक्षे रतिलीलायाः आस्पदं आवासस्थानम् ।।

End:

त्रियामा क्षणदा क्षपा इत्यमरः। तस्याः ईशः प्रभुः चन्द्रः तद्वत् । क्षतजवत् रुधिरवत् । रक्तक्षतजशोणितमित्यमरः । क्षीणात्मवत् योगिवत् । तस्य तनोः कृशत्वादिति भावः। क्षान्तवत् क्षमाशालिवत् भातीत्यन्वयः ।।

Colophon:

कविकुलकण्ठपाशटीका समाप्ता ॥

39

Sl. No : 25602 **कविकण्ठभूषणम्** Ms. No : P. 4387/4

Begnning :

लक्ष्मीं तनोतु महतीं जगतां त्रयाणां
कात्यानीरमणमौलिशशाङ्करेखा ।
मन्दाकिनीसलिलशीकरिणी विधत्ते
या सा विभिन्ननवमौक्तिकशुक्तिशङ्काम् ॥

End :

किमुन्नत्याऽस्थेमापि च किमथ तेषां क्षितिभृतां
किमुक्षाणां भारक्षमबलतया किं घनतया ।
हसन्ते विस्फूर्जच्छितकुलिशधारापि दशित -
पक्षा × मो भुजबलमलं हन्त यदमी ॥
कार्श्यं नाम पतं गतं शचिदपि ते लब्धशिकस्याप्यहो
मौलौ मन्मथवैरिणः पुनस्थातं च वांछा यदि । (?)
बिन्दो मुग्ध शशां × × ×

Colophon :

— — —

40

Sl. No : 25603 **कविकर्णरसायनम्** Ms. No : A. 414/1

Beginning :

विश्वाधिको विश्वमयोऽप्रमेयः
षडङ्गकल्याणगुणाभियुक्तः ।
विधोर्विधातुर्वरदः प्रसन्नः
पायात्पतिश्शैलभुवश्शिवो नः ॥

End :

प्रयच्छन्नर्घ्यं सपदि वनपालाय स पुनः
वसुव्रातैः कुर्वन्विबुधमनस्तृप्तिमधिकाम् ।
सखीभिः सम्प्रेष्य प्रथममबलां भूरिविभवः
करीन्द्रारूढस्सन् पुरमवियथौ चोलनृपतिः ॥

Colophon :

इति सकलभुवनैकवल्लभनिखिललोकनायकनिकायपरिवृढपरमशिवलिङ्गपद-पयोजषट्पदायमानलपदुभयकविविशारद श्री षडक्षरदेवविरचिते चोलराजीये कविकर्णरसायनाख्ये महाकाव्ये जलक्रीडावर्णनं दशमस्सर्गः ॥

41

Sl. No : 25604 कविकर्णरसायनव्याख्या Ms. No : A. 414/2

Beginnig :

+ स्वापरिकीर्तित इति शान्त्यतीतकलायां पञ्चदशभुवनानीत्यादिक्रमेण पञ्चकलाप्रतिष्ठितचतुर्विंशत्युत्तरशतद्वयात्मको भुवनाध्वा। तदुक्तं चतुर्विंशाधिकशतयुग्मेन भुवनाध्वा इति ॥

End :

अनुगताः अनुसृताः कर्कशान्यङ्गानि अवयवाः येषान्ते धानुष्काः धनुर्धराः किराताः तदस्य प्रहरणमित्यर्थे ठकः इमुसुक्तां तत्कथितादेशः। (?) पक्कणं शवरगृहं अभियाताः, 'घोष आभीरपल्ली स्यात्पक्कणश्शबरालयः' इत्यमरः। स्वभावोक्तिरलङ्कारः ॥

Colophon:

[इति समस्तसुजनस्तोमसंस्तूयमाननिस्तुलगुणग्रामाभिरामश्रीमत्याराजकुल कलशशरधिपूर्णकलाधरचन्नबसवनृपतनूभव श्री मुदियभूपालप्रोत्साहित श्री वेङ्कनसुधीविरचितायां कविकर्णरसायनाख्यव्याख्यायां साहित्यसुधोदयाख्यायां प्रथमस्सर्गः ॥]

42

Sl. No : 25605 कविकल्पलता Ms. No : C. 2536/5

Beginning :

गङ्गाबारिभिरुक्षिताः फणिफणैः रुत्पात्य × स्ताधिखा
रत्नैः कोरिकिताः सुधांशुकल × ।
आनन्दाश्रुपरिप्लुता × ×
कल्पलता फलं ददतु वोऽभीष्टं जटा धूर्जटेः ॥

End :

सर्वं विनश्यति विहाय कवित्वमेकं
काव्येन साकमिति कस्य न हिं प्रसिद्धम् ।

एतद्विमृश्य कविकल्पलतासुकाव्य
संपत्तयेऽस्तु कविभिः सततं निषेव्या ॥
देवेश्वरेण × ×
× × कविनायकेन ।
काव्यज्ञमानसमुदेतु भूमा
वाकल्पमेष कविकल्पलतावतारः ।
इति चतुर्थस्तबके सप्तमं कुसुमम् ॥

Colophon :

इति श्रीवाग्भटनन्दनदेवेश्वरकवीश्वरविरचिता कविकल्पलता समाप्ता ॥

43

Sl. No : 25610 कविकौमुदी Ms. No : C. 2362

Beginning :

धन्वी धुन्वीत कोप्यं यः सङ्गरे यस्य दस्युभिः ।
चक्री बभूव चा × यि तद्गुणोऽपि शरोऽपि च ॥
अह्नोबलसुधीगर्भसुधाम्बुधिसुधाकरः ।
कल्पलक्षीनृसिंहार्यः करोति कविकौमुदीम् ॥

End :

त्वद्रूपरेखासौ × × मन्तरे ।
रसगन्धविहीनत्वात् दुःखं कुर्वन्ति केवलम् ॥
त्व × × ×
दृश्यं तेन क्वचिदपि वने ।
पुष्पगु × ×
से वातनोति ॥
केतकेत + + सर्वज्ञेनावज्ञे यत् ॥
अथ समुदायान्योक्तया ॥

Colophon :

— — —

44

Sl. No : 25614 **कविराक्षसीयम्** Ms. No : P.6/2

Begnnng :

सरस्वतीभूतिविजृम्भणाय

+ × × +

भवन्ति मूका अपि वावदूकाः ।

त्रयीयुवतिसीमन्तसीमासिन्धूरबान्धवाः ।

संसाराब्धिं पिबेयुर्वः कंसारेः पादपांसवः ।।

Fnd :

महान् स पुरुषो यस्य यस्य सत्यानुरोधिता ।

आक्षिप्तपारिजातेन बाहुना रक्ष्यते जगत् ।।

Colophon :

इति कविराक्षसीयं मूलं सम्पूर्णम् ॥

45

Sl. No : 25620 **कविराक्षसीयम्** Ms. No : C· 2881

Beginning :

त्रयीयुवतिसीमन्तसीमासिन्धूरबन्धवः ।

संसारब्धिं पिबेयुर्नः कंसारेः पदपांसवः ।।

सुधार्थिवैश्च पद्मैश्च सर्वतोमुखभूमिभिः ।

प्रसारिते मित्रकरे त्यज्यन्ते कोशसंपदः ।।

End :

कुजन्मना कुलीनेन पारुष्यरजसा कृतम् ।

लब्धवर्णस्य न ग्लानिः चित्रस्यैतावता कृता ॥

देवाश्च भूमिदेवाश्च नक्तमप्यमृताशनाः ।

हीयन्ते स्वाधिकाराच्चे ये सेवन्ते नवासवम् ॥

Colophon :

श्री कविराक्षसं समाप्तम् ।।

46

Sl. No : 25621 | कविराक्षसीयव्याख्या | Ms. No : P. 6/1

Begnning :

सरस्वतीभूतिविजृम्भणाय
सरस्वतीं तां शरणं भजामः ।
यस्याः कटाक्षक्षणवीक्षणेन
भवन्ति मूका अपि वावदूकाः ॥
अपूर्वमेतद्विदुषा न केन
व्याख्यायि काव्यं कविराक्षसीयम् ।
तस्माच्छिशूनां सुखवुद्धये तत्
व्याकर्तुमाकांक्षति संविविच्य ॥

End :

अत्रादौ त्वयीत्यादिना भगवत्संकीर्तनरूपमङ्गलाचारः कृतः । मध्ये तु स्वस्थानादवरेऽप्येतेत्यादिना । अन्ते त्वनेन श्लोकेनेति विवेकः ॥

Colophon :

इति श्री भगवन्माहेश्वरस्य देवणाराध्यस्य सूनुना नागणार्येण विरचिता कविराक्षसीयव्याख्या शिष्टार्थदीपिका समाप्ता ॥

47

Sl. No : 25626 | कादम्बरीकथा | Ms. No : P. 1072/1

Beginnig :

कुर्यान्मुदं कुञ्जरराजवक्त्रः
पित्रोर्वसन् प्रीतिभृतोः स मध्ये ।
घ्रातुं स्वमाप्तौ तु कपोलभित्योः
आघ्रापयत्तौ विनमन्मिथो यः ॥
श्रीमान् वेत्रवतीपूरमेखलायां महाभुजः ।
नगर्यां विदिशाख्यायां क्ष्मापतिः शूद्रकोऽभवत् ॥

End :

कादम्बरीकृतित्वेन विद्वन्मणिमुदे क्षितौ ।
बृहत्कथामञ्जरीति नाम्ना ख्याता महत्कृतिः ॥
भट्टबाणेन रचिता जीयाद्रसिकहर्षदा ॥

Colophon :

— — —

48

Sl. No : 25627 कादम्बरीकारिकाः Ms· No : P. 9306/1

Beginning :

कुर्यान्मुदं कुञ्जरराजवक्त्रः
पित्रोर्वसन् प्रतिभृतोऽस मध्ये ।
घ्रातुं स्वमाप्तौ तु कपोलभित्त्योः
आघ्रायय्त्तविनमन्विथो यः ॥ (?)
पुनः स्कन्दः स्थितः प्राह निर्बन्धोऽयं कथं नु ते ।
भुङ्क्ष्व गत्वा श्रियं राजन् न चैदेकां कथां श्रुणु ॥
श्रीमान् वेत्रवतीपूरमेखलायां महाभुजः ।
नगर्यां विदिशाख्यायां क्ष्मापतिः शूद्रकोऽभवत् ॥

End :

पुण्डरीकः चन्द्रशस्तः शुकनासस्य सूत्रताम् ।
वैशंपायननामाऽगात् शुकजन्म ततः परम् ॥
इयमेव कथा भट्टबाणेन बहुलीकृता ।
कादम्बरीकृतित्वेन विद्वन्मणिमुदे क्षितौ ॥
बृहत्कथामञ्जरीति नाम्ना ख्याता महाकृतिः ।
भट्टबाणेन रचिता जीयाद्रसिकहर्षदा ॥

Colophon :

— — —

49

Sl. No : 25629 | कार्तिकेयविजयः | Ms. No : P. 3355

Beginning :

× × शाश्वताय
वदान्यचूडामणिरिन्दुमौलिः ।
दुग्धार्थिने प्रागुपमन्यवे यो
बालाय दुग्धाब्धिमदादयत्नम् ॥

End :

स्वामिन् क्व यूयमखिलागममौलिवेद्याः
काहं तमोगुणनिरस्तमतिस्तथाऽपि ।
भक्त्यैव काव्यमिदमाकलितं किलेति
मय्यस्तु पावकतनूभव तेऽनुकम्पा ॥

Colophon :

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्वाहकश्रीमन्महाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाच्चान्दीक्षितपौत्रस्य श्रीनारायणाध्वरितनयस्य कैय्यटव्याख्यानशिवतत्त्वरहस्याद्यनेकप्रबन्धनिर्मातुः सर्वतन्त्रस्वतन्त्रस्य विशिष्य वश्यवाचः श्रीनीलकण्ठाध्वरिणस्तृतीयनन्दनेन गीर्वाणेन्द्रयज्वना विरचिते कार्तिकेयविजयनाम्नि महाकाव्ये षोडशः सर्गः । समाप्तं चेदं काव्यम् ॥

50

Sl. No : 25631 | काव्यरत्नम् | Ms. No : B. 2802/1

Beginning :

आनन्दसान्द्रत्वमजो विधत्ता-
मनेकदामोदितविश्वभूतः ।
सत्यार्द्रतो वस्सकलेश्वरश्रीः
असावहो मानसपद्महंसः ॥

End :

चारुद्वारवतीपराध्यर्चरितं प्राप्याधिनाथं प्रभुं
तं नागोपपदान्तदा हि मधुरायोध्या विरेजे पुरी ।

51

Sl. No : 25632 | काव्यरत्नम् | Ms. No : A. 432/1

Beginning :

श्रियं स वः श्रीवृषभो विशिष्या-
यस्यालिमालावृतवत्सभायाम् ।
बभौ × तेन्द्रोत्करमौलिनील
प्रभावली लालितमञ्जपीठम् ॥
चन्द्रप्रभं नौमि यदङ्गकान्ति
ज्योत्स्नेति मत्वा द्रवतीन्दुकान्तः ।
चकोरयूथं पिबति स्फुटन्ति
कृष्णे विपक्षे किल कैरवाणि ॥

End :

मिथ्यात्वकर्मपटलैश्चिरमावृते मे
युग्मे दृशोः कुपथयाननिदानभूते ।
आशाधरोक्तिलसदंजनसंप्रयोगै-
रच्छीकृतेऽद्य पृथुसत्पथमाश्रितोऽस्मि ॥

Colophon :

इति अर्हद्दासकृतौ काव्यरत्ने भगवदुभयमुक्तिवर्णनो नाम दशमस्सर्गः ॥

52

Sl. No : 25633 | काव्यरत्नव्याख्या | Ms. No : P. 2802/2

Beginning :

काव्यमव्याजतः श्राव्यकथात्रयवदावदम् ।
कादम्बरीयं चित्रार्थमिदं व्याकुर्महे वयम् ॥
पदभेदपदार्थोक्तिर्विग्रहो वाक्ययोजना । +

अजो वः आनन्दसान्द्रत्वं विधत्तामिति क्रियाकारकयोजना। अजो ब्रह्मा किंविशिष्टः अनेकधामा अनेकमहिमा । उदितविश्वभूतः उदिता विश्वभूतः —

End :

युवदृशां तरुणदृष्टीनां परां प्रीतिं वितेने विस्तारयामास साधुपुरी विरेज इति पूर्वेण सम्बन्धः। आहो इत्याश्चर्यातिशये। अत्र वाच्यप्रतीयमानयोरभेदाध्यवसायेन विरोधाभासकाद्विरोधालङ्कारः। वृत्तं शार्दूलविक्रीडितमिति लक्षणात्।

Colophon :

इति श्री भारतरामायणभागवतसारस्यकाव्यरत्नस्य व्याख्यातार्थप्रदीपिकाख्यायां तृतीयस्सर्गः। काव्यरत्नव्याख्या समाप्ता ॥

53

Sl. No : 25634 | काव्यरत्नव्याख्या | Ms No: A. 4 2/2

Beginnng :

श्रीमद्देवेन्द्रसन्दोहबर्हिणानन्ददायिनम्।
सुवृताम्बुभृतं नौमि दिव्यश्राव्यनिनादिनम् ॥
तस्य गर्भावतारादिपञ्चकल्याणशंसिनः ॥
काव्यरत्नाख्यकाव्यस्य वक्ष्ये टीकां स्वशक्तितः॥
श्रियमित्यादिः —

End :

तस्मिन् निर्मलीकृते सति अद्य संप्रति पृथुसत्पथं संश्रासौ पन्थाश्च सत्पथः पृथुश्चासौ सत्पथश्च तथोक्तस्तं महाजनमार्गं आश्रितः आश्रियतेऽस्म आश्रितः आसेवितः। अस्मि भवामि। असभुवि लिट् ॥

Colophon :

— — —

54

Sl. No : 25635 | किरातार्जुनीयम् | Ms. No: B. 958/1

Beginning :

श्रियः कुरूणामधिपस्य पालिनीं
प्रजासु वृत्तिं यमयुंक्त वेदितुम्।
स वर्णलिङ्गी विदितस्समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥

End :

असंहार्योत्साहं जनितमुदयं प्राप्य तरसा
धुरं गुर्वीं वोढुं स्थितमनवसादाय जगतः।
स्वधाम्ना लोकानामुपरि × हितस्थानममरा
× × × × जगुः ॥

Colophon :

— — — —

55

Sl. No : 25639 किरातार्जुनीयम् Ms No: P. 6842

Beginnng :

श्रियः कुरूणां + + वनेचरः ॥

End:

व्रज जय रिपुलोकं पादपद्मानतः सन्
गदित इति शिवेन-श्लाघितो देवसंघैः ।
निजगृहमथ गत्वा सादरं पाण्डुपुत्रो
धृतगुरुजयलक्ष्मीर्धर्मसूनुं नमामि ॥

Colophon :

इति भारवीये महाकाव्ये अष्टादशस्सर्गः ॥

56

Sl No 25648 किरातार्जुनीयव्याख्या Ms No: P. 5277/1

Beginning :

न वर्जितं अन्यथा दाडिमादिपदवदेकवाक्यता न स्यात् । यथाहुः अर्थैकत्वादेक × न्वर्यगौरवमित्यत्र कथं षष्ठी समासः । पूरणगुणेत्यादिना प्रतिषेधात् । नैष दोषः ।

End :

दुष्प्रनिग्रहभारं तमेव हारभारबोधं स्थिरं स्वधाम्ना स्वतेजसा कृतस्थानं कृतस्थितिं कृतपदं अन्यत्रापरिवर्तमानं तथा लक्ष्यदीप्तं तं × ममरादि सत्कृत × × ×

Colophon :

इति पदवाक्यप्रमाणपारवारपारीणश्रीमहोपाध्याय कोलाचलमल्लिनाथसूरि विरचितायां किरातार्जुनीयव्याख्यायां घण्टापथसमाख्यायामष्टादशस्सर्गः॥

57

Sl. No : 25653 **किरातार्जुनीयव्याख्या** Ms. No: C. 3860/2

Beginning :

अर्द्धाङ्गीकृतदाम्पत्यं अतिगाढानुरागि यत् ।
पितृभ्यां जगतः तस्मै कस्मै चिन्महसे नमः ॥
मल्लिनाथः कविः सोऽयं मन्दात्मानुजिघृक्षया ।
तत्किरातार्जुनीयाख्यं काव्यं व्याकर्तुमिच्छति ॥
अथ तत्र भवान् भारविनामा—

End:

प्रशंसितं प्राप्तुमिष्टं तं शैलं इन्द्रकीलं स्वं आसीयं पुरुषस्य कारः कर्म तं पुरुषमिव अभ्यासमाद । मालिनीवृत्तम् ॥

Colophon :

इति महोपाध्यायकोलाचलकमल्लिनाथसूरिविरचितायां किरातार्जुनीय व्याख्यायां पञ्चमः सर्गः ॥

58

Sl. No: 25656 **किरातार्जुनीयव्याख्या** Ms. No : A. 250/2

Beginning :

आद्यावानन्दिनौ नित्य + मिष्टादायिनौ ।
दिव्यौ तौ सुशुभौ वन्दे दम्पती जगतां पती ॥
भूत्वा च्छद्मकिरातमूर्ति + ।
+ इष्टार्थसिद्धिं शिवः ॥ + +
श्रियः कुरूणामित्यादि । वनेचरः द्वैतवने वने युधिष्ठिरं समाययौ इति योजना ॥

End :

एवमस्माभिरिह प्रसिद्धदोषोद्धरणसङ्गतिकरणार्थस्फुटीकरणालङ्कारप्रकाशा-
दिकं यथावत् कृतमिति सर्वमपि मङ्गलम् ॥

Colophon :

सद्विद्याकुलमन्दिरेण × ×
विद्यामाधवपण्डितेन रचिते × × ।
विद्यामाधवनाम्नि भारवि [य] कृतेर्व्याख्यानवर्ये भवन्
पूर्णःपाण्डु तपःफलासिकथनः मर्गोऽयमष्टादशः ॥

59

Sl. No : 2·657 — कीर्तिपञ्चाशत् — Ms. No : P. 932/1

Beginning :

दूरे याहि पुरन्दरद्विप सदा गन्धं जहीहि क्षितौ
शीतांशो नतिमावहस्व कलाशाम्भोधेऽत्र कस्ते जयः ।
सौजन्यं गिरिजागुरो भज यतः कीर्तिर्व्याप्त ×
× समस्तशस्तपृथिवीपूर्तिस्तथा जृम्भते ॥

End :

कश्चित् गोत्रा × दननामलिनतामार्गश्च कश्चित् परः
कोपी कोऽपि मदान्ध एव जलसंवासी विरूपी परः ।
अन्यः किन्नरसेवितो द्विरसनासङ्गीति सन्त्यज्य तान्
+ कीर्तिरद्य च घनीभूता समास्ते त्वयि ॥
सारूप्यं शीतभानोः भजति सति तथा चित्रभानोस्स्वभानोः स्व ×

Colophon :

— — — —

60

S. No : 25658 — कुचपञ्चाशिका — Ms. No : P. 932/3

Beginning :

भाषाणां शतकञ्च तस्य च पुनस्तालञ्च रागञ्च य-
स्तत्सङ्ख्यानुगुणं व्यधत्त बहुधा सच्छास्त्रपारायणः ।

भाणप्रेक्षणकादिनाटकततिं काव्यञ्च नानाविधं
सोऽस्माकं कविताविधिं वितरतु श्रीरङ्गनारायणः ॥

End :

हृन्मध्येऽजनि सम्भ्रमेण तन्मणीवक्षोजयुग्मं पुनः
मालावन्मकरन्दवन्मनयवन्मौक्तिकवन्मारवत् । (?)
धिग्धिग्राज्यश्रियमपि तथा दिव्यताञ्च प्रशस्तां
धिग्धिग्मान्थान् द्रुहिणपदवीं धिक् च यद्भव्यमन्यत् ॥
यौ तौ लीलाविहरणपदौ माण्डलौ स्वच्छभायौ
वक्षोजौ भो दरघनतरौ यस्य हस्तं गतौ चेत् ॥

Colophon :

इति श्रीवृत्तमणिश्रीरङ्गाधिराजगुरुकुमारस्य श्रीनिवासगुरोर्यवीयसश्शतभाषा-तपत्रसहस्रकिरणस्य + श्रीरङ्गनारायणगुरोस्तनूजेन श्रीनिवासेन निबद्धेयं कुचपञ्चाशिका समाप्ता ॥

61

Sl. No : 25659 कुचेलवृत्तम् Ms No : A. 687

Beginning :

आसीदस्तरजस्तमोगुणकथः शान्तान्तरात्मा वशी
शिष्यः पुण्यदुदारकीर्तितपसः काश्यस्य सान्दीपनेः ।
व्युत्पन्नोपनिषद्विचारसरणिः सब्रह्मचारी हरेः
विप्रः कोऽपि निवृत्तिमार्गकुशलो धीमान् कुचेलाभिधः ॥

End :

इत्थं वसन्नपि गृहे हरिपादभक्त्या
निर्धूतविश्वविषयाभिरतिं क्रमेण ।
पृथ्वी सुरः किमपि धाम जनार्दनाख्यं
तत्त्वं पदार्थपर × मयं प्रपेदे ॥

Colophon :

कुचेलवृत्ताभिधः प्रबन्धः समाप्तः ॥

62

Sl. No : 25661 | कुमारविजयः | Ms. No : P. 4851

Beginning :

अथ कदाचिदगेश्वरनन्दिनी
प्रणयिनं प्रतिपद्य जगत्प्रसूः ।
रहसि बालसुधांशुकलाधरं
वचनमेतदुवाच समर्थता ॥
कृतकथा दकं तमतिप्रियं (?)
सखिषु केवलमेव महाशयम् ।
तनयमेकमयीश विलोक्य मे
चलमभूदिह मानसमन्वहम् ॥

End :

नृपसुन्दरीं वहस्य श्रियमपि
कृतकर्मा देवतो यां शतोऽयं च सः ।
कुरु मामपीह रमणीयं सदा
विहितं च स्मर जयिनि दयाभिख्यः ॥
भ्रमरवर्धिनीवृत्तमिदम् । युग्मपथबन्धश्लोकोऽयम् ॥

Colophon :

इति श्री शिवचरणसरोजरेणुविरचिते कुमारविजये महाकाव्ये एकादशः सर्गः ॥
कुमारविजयाख्यमिदं काव्यं समाप्तिमगमत् ॥

63

Sl. No : 25665 | कुमारविजयव्याख्या | Ms. No : A. 804/2

Beginning :

वस्तु श्रीपुरवास्तव्यमस्तु नः पुरतोऽन्वहम् ।
वामाङ्गीकृतवामाङ्गमपाङ्गापाङ्गितस्मरम् ॥ +
काश्यपान्वय + + कौमुदीम् ॥

अथ तत्रभवान् शिवचरणसरोजरेणुर्नाम महाकविः कुमारविजयकाव्यं चिकी र्षुस्तत्रान्तरायोपशान्तये मङ्गलात्मकमथशब्दं प्रकृतोपयोगित्वेनादौ निबध्नाति ।

End :

शासनमाज्ञामदात् ददौ । 'आज्ञा आसनमादेश' इतिकोशसंग्रहः । स्रग्धरा वृत्तम् । भ्रम्नैर्यानं त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयमिति लक्षणात् ॥

Colophon :

इति श्रीमद् + पारीणश्रीकाश्यपकुलजलधिकौस्तुभश्रीरामसूरिशिरोमणि विरचितायां कुमारविजयव्याख्यायां कविकुलोज्जीविन्याख्यायां पञ्चमस्सर्गः ॥

64

Sl. No : 25667 — कुमारसम्भवम् — Ms. No : P. 5861/2

Beginning :

अथौषधीनामधीपस्य वृद्धौ +
विवाहदीक्षा विधिमन्वतिष्यति ॥

End :

× हितर्कमणिभजनि × तं
कल्पवृक्षमधु विभ्रति द्वयम् ।
गन्धमाधनवनाधिदेवता
त्वमिह × मतमुपागता ॥

Colophon :

— — —

65

Sl. No : 25676 — कुमारसम्भवम् — Ms. No : C. 4428

Beginning :

पाणिपीडनविधेरनन्तरं
शैलराजदुहितुर्हरं प्रति ।
भावसाध्वसपरिग्रहादभूत्
कामदोहदमनोहरं वपुः ॥

End :

इति बहुविधं बालक्रीडाविचित्रविचेष्टितं
ललितललितं सान्द्रानन्दं मनोहरमाचरन् ।
अलभत परां बुद्धिं षष्ठे दिने नवयौवनं
स किल सकलं शास्त्रं शस्तं विवेद विभोरपि ॥

Colophon:

इति श्री कुमारसम्भवे महाकाव्ये कालिदासकृतौ बालक्रीडो नाम एकादशस्सर्गः ॥

66

Sl. No : 25677 कुमारसम्भवव्याख्या Ms. No : P. 3974/2

Beginning :

वन्देऽहं वाचनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लिकाम् ॥

. . . . अत्र तावत् कालिदासः कुमारसम्भवं चिकीर्षुः . . . . वस्तु निर्दिशति । अस्तीति ।।

End :

. . . . कैमुत्यादापततीत्यर्थापत्तिरलङ्कारः । तथा च सूत्रम् । दण्डापूपिकयाऽर्थान्तरापतनमर्थापत्तिरिति । अर्थान्तरन्यास इति कश्चित् । तदुपेक्षणीयम् । युक्तिस्तु विस्तरभयात् नोच्यते । रथोद्धतावृत्तमेतत् ॥

Colophon :

इति श्री पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां कुमारसम्भवव्याख्यायां सञ्जीविनीसमाख्यायां षष्ठः सर्गः॥

67

Sl. No : 25678 कुमारसम्भवव्याख्या Ms. No : P. 5861/1

Begnning :

अथेति । अथेत्यनन्तरं हिमवानोषधीशस्य चन्द्रस्य वृद्धौ शुक्लपक्ष इत्यर्थः । शुभकर्मस्वापूर्यमाणपक्षे प्राशस्त्यार्चिथौ च जामित्रं लग्नारसप्तमस्थानं तस्य गुणशुद्धिः ।

End :

एका दासि सेवागती (?) सशम्भुः समुद्रान्तर्गतः समुद्रान्तवर्तिज्वलनो बडबाग्निस्तस्य समुद्रस्य जलौघैः जलप्रवाहैरिव सुरतसुखैः छिन्नतृषा वृत्ताभिलाषश्च न बभूव किन्तु × सैवावर्धतेत्यर्थः ।

Colophon :

इति पदवाक्यप्रमाणपरावारपारीण श्रीमहोपाध्याय कोलाचलमल्लिनाथ-सूरिविरचितायां कुमारसम्भवव्याख्यायां सञ्जीविनीसमाख्यायां अष्टमस्सर्गः ॥

68

Sl. No : 25686 कुमारसंभवव्याख्या **Ms. No : P. 3636**

Beginning :

वाग्मिनो वागधीशाः व्यापाराणामुपक्रमे ।
यं प्रणम्य कृतार्थाः स्युः तं प्रणौमि गजाननम् ॥
गणनायकमाक्रम्र (?) + मानयामहे ॥
देवी दयापरा नित्या + वायते ।। (?)
कलये कालिदासं तं + विनिर्मितम् ॥
वारिराशिं + + + वस्तुनिर्देशं करोति — अस्त्युत्तरस्यां —

End :

दग्धे दाह्याभावात् पुनरपि शान्ते विश्रान्तिः । तथा × तपस इत्यादिना तस्य शान्ते विश्रान्तिर्दर्शिता च ॥

पुनश्च देव्याः तपश्चरणानुकारं (?) प्राचीनाशक्तिरेवोन्मेषमुपयास्यतीत्यवसेयः ॥

Colophon :

इति श्रीकृष्णशिष्यस्य नारायणस्य कृतौ कुमारसम्भवविवरणे तृतीयः सर्गः ॥

श्रीमासोत्सवचारुकाव्य + अल्पबुद्धिना ॥

69

Sl. No : 25687 कुमारसंभवव्याख्या Ms. No : P. 3722

Beginning :

षट्पदम्मुखरितगण्ड × प्रणमत वारणतुण्डं (?)
पदकमलप्रणंतसकुलसुपिण्ड: ।।
अपारकरुणापूर + कुमारसम्भवव्याख्या: ।
बालप्रबोधनार्थं ललितं करवाणि विवरणं तस्य ।।

+ + इह खलु महाकवि: कालिदास: + + वस्तुनिर्देशं तावत्करोति — अस्तीत्यादि ।।

End :

देव्या अनुवृत्तिः प्रतिपादिता । इत्थमस्मिन् काव्ये बहवः पुरुषार्थाः महाकविना प्रतिपादिता इत्यूहनीयमिति सर्वं सुमङ्गलम् ।।

Colophon :

इति श्रीकृष्णशिष्यस्य नारायणस्य कुमारसम्भवविवरणे अष्टमः सर्गः ।।
सर्गोऽयं चरमो + सर्गो निसर्गोज्वलः ।।

70

Sl. No : 25689 कुलस्त्रीवर्णनम् MS. No : C. 2762

Beginning :

अनुरोधस्थितरसा न च शक्यप्रतारणा ।
साध्वी सरिच्च पत्यौ सा विरसेऽप्यपराङ्मुखी ।।

End :

सुप्ता —
राकं नितम्बफलके विनिवेश्य बाहु -
मन्यं च वेष्टितमधरिशिरसे निधाय ।
श्वासानिलोच्चलितमौक्तिकशोभिनासा
शेतेऽधुना सुखमिदं सरसीरुहाक्षी ।।

Colophon :

— — — — —

71

Sl: No: 25690 **कूष्माण्डिचरितम्** **Ms. No: P. 4921**

Beginning:

श्रीमान् जिनः श्रियं दिश्यत् सतां सन्तोषा
× × पुरुदेवाख्यचन्द्रमाः ॥
नेमिनाथः सन्निदध्यात्परंज्योतिस्वरूपि
× × द्योतते दर्पणे इव ॥

End:

इति परममुदारं दिव्यभोगं स ताभ्यां
सममरवधूभिः सा × मद्भुतश्रीः ।
सितहसितविलासास्पष्टचेष्टा सुशीला
स्वकृतसुकृतपाकादद्रिसानोः शिलायाम् ॥
प्रवरपुण्यमहीरुहसंभवं
फलमिदं मनसि प्रविधाय ये ।
मुनिवरस्य सुदानपरायणाः
यदि भवन्ति भजन्ति शिवं च ते ॥

Colophon:

इति श्रीचारुकीर्ति पण्डिताचार्यानुचर श्रीशिखामणिविरचिते कूष्माण्डयु त्पत्तिवर्णनो नाम द्वितीयः सर्गः ॥

72

Sl. No: 25692 **कृष्णकर्णामृतम्** **Ms. No: P. 1233/1**

Beginning:

चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शीक्षागुरुश्च भगवान् शिखिपिञ्छमौलिः ।
यत्पाद × × ल्लवशेख
लीलास्वयंवररसं लभते जयश्रीः ॥
अस्ति × × ×
× × राग्रविगलत ×

End :

सन्ध्यानां सरसानुलापसरणीमभ्यस्यतां ×
कर्णानां विवरेषु कामपि सुधावृष्टिं महानं मुहुः ।
धन्यानां सदृशां मनोनयनयोः मग्नस्य देवस्य नः
कर्णानां मनसा विजृम्भितमहो कृष्णस्य कर्णामृतम् ।।
विमलकमल × रागसिद्धये ।।

Colophon :

इति लीलाशुकेन विरचिते श्रीकृष्णकर्णामृतं सम्पूर्णम् ।।

73

Sl. No : 25693 कृष्णकर्णामृतम् Ms. No : P. 2321

Beginning :

गजाननकटद्वन्द्वनिःसृता मदनिर्झरी ।
प्रक्षाळयतु नः क्षिप्रं विघ्नसङ्घातकर्दमम् ॥
चिन्ताणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान् शिखिपिञ्छमौलिः ।
यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः ॥

End :

आर्तं पदव्यामवलम्ब्य यानं
पात्रे दधत् केवलमेव पाणिम् ।
प्रियङ्करोऽभूत् फलविक्रयिण्या
धान्यापणादभ्यधिकं मुकुन्दः ॥

Colophon :

— — — —

74

Sl. No : 25694 कृष्णकर्णामृतम् Ms. No : P. 2601/1

Beginning :

चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान् शिखिपिञ्छमौलिः ।

यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः ॥
अस्ति स्वस्तरुणीकराग्र . . . किशोराकृतिः ॥

End :

या प्रीतिर्विदुरार्पिते मुररिपो कुन्त्यर्पिते यादृशी
या गोवर्धनमूर्ध्नि या च पृथुके स्तन्ये यशोदार्पिते ।
भारद्वाजसमर्पिते शबरिकादत्तेऽधरे योषितां
या प्रीतिः मुनिपत्निभक्तिरचितेऽप्यत्रापि तां तां कुरु ॥

Colophon :

कृष्णकर्णामृते तृतीयं शतकं समाप्तम् ॥

75

Sl. No : 25708 कृष्णकर्णामृतव्याख्या **Ms. No : P. 5749/b**

Beginning :

श्रीरामं सीतया सार्धं मुकुन्दं मौनिशेखरम् ।
यज्वानं वा × × यज्ञेशं प्रणतोऽस्म्यहम् ॥
पशुपत्यन्वये जातपापयल्लयसूरिणा । +
कर्णामृतस्य व्याख्यानं क्रियते कृतिनां मुदे ॥ +

चिन्तामणिरिति । चिन्तामणिर्नाम मन्त्रविशेषः । यच्चिन्तनवशा - त्कृति × × भूत्कविः स जयति सर्वोत्कर्षेण वर्तते – इत्यर्थः ॥

End :

पौरुषं पुंस्त्वं गणयामि –– संख्याविषयं करोमि मम हृदयं × × विहाय न प्रवर्तते । योऽन्यत्र गन्तुं न शक्यते त्वयेति भावः ॥

या प्रीतिः जृम्भवने (?) यज्ञपतिभिः आनीयमानान्न इत्यर्थः । अत्रापि मत्प्रणीतकर्णामृतग्रन्थे जनानां प्रीतिरीप्सार्थे द्विर्भावः ॥

Colophon :

इति श्री पदवाक्यप्रमाणपारावारपारीण श्रुपर्तितिरुमलभट्टोपाध्यायपुत्रेण कोण्डमाम्बागर्भशुक्तिमुक्तामणिना पापयल्लयसूरिणा विरचितायां श्रीकृष्णकर्णामृतव्याख्यायां सुवर्णचषकसमाख्यायां द्वितीयोऽध्यायः ॥

76

Sl. No: 25712 कृष्णकर्णामृतव्याख्या Ms. No: P. 7541/2

Beginning:

श्रीरामं सीतया साकं मुकुन्दं मौनिशेखरम् ।
यज्वानं वाजपेयञ्च यज्ञेशं प्रणतोस्म्यहम् ।।
× × पापयल्लयसूरीणा ।
कर्णामृतस्य व्याख्यानं क्रियते कृतिनां मुदे ।।

End:

आश्रमे शबरिकायाः दीयमानः कन्दमूलफलादिरित्यर्थः । या प्रीतिः योषितामधरे गोपस्त्रीजनाधरे या प्रीतिः मुनिपत्नीभिः भक्त्या रचिते या प्रीतिर्वृन्दावने × × × वीप्सार्थे द्विर्भावः, कुरु ॥

Colophon:

इति श्री पदवाक्यप्रमाणपारावारपारीण + + पापयल्लयसूरिणा विरचितायां कर्णामृतव्यायाख्यां सुवर्णचषकसमाख्यायां तृतीयोऽध्यायः ।।

77

Sl No: 25718 कृष्णनृपजयोत्कर्षः Ms No: A. 857/4

Beginning:

गिरिदुहितुरर्धशम्भोः
कुचविको (?) यस्य कुम्भयुगयोगात् ।
प्राक्स्थितिमतीत्य शुशुभे
स्तनन्धयः कोऽपि सोऽस्तु सुखदो नः ॥
भद्राणीह मुहुर्दत्तां रुद्राणीगौरवेण वः ।
पद्मा च विष्णुहृत्सद्मा भारती च प्रभावती ॥

End:

नृपसभयल्लकभूषणवागथ
आर्जवपोषितसकलद्विजनु ।
श्रीकृष्णविभो मयि सूरियते
प्रेमभरितनिरूपरमसुदितीनु ।।

कृष्णजयोत्कर्षाख्या
संस्कृतकर्णाटवाङ्मयश्लिष्टा ।
अन्यादृशी कृतिरियं
सत्प्रीत्यै श्रीनिवासरचिताऽस्तु ॥

Colophon :

+ + + +

कृष्णनृपजयोत्कर्षग्रन्थः सम्पूर्ण ॥

78

Sl. No : 25720 कृष्णभूपालकाव्यम् MS. No : P. 7531/4

Beginning :

आलोकालोकशैलादविरतमुदयन्स्वीयकीर्तिप्रकाशै-
रातन्वन् भूतधात्रीं शशधरनिकरोद्भासमानामिवारात् ।
विभ्यत्सामन्तभूमीश्वरमकुटतटोद्भासिसद्रत्नरोचि-
र्मालानीराजितांघ्रिर्जगति विजयतां कृष्णभूपालवर्यः ॥

End :

श्रीमन् कृष्णवसुन्धरापरिवृढ त्वत्कीर्तिचन्द्रे सदा
सम्पूर्णे निखिलप्रमोदनपटौ लोकेषु सर्वेष्वपि ।
राजत्यद्य किमिन्दुनेति विधिना मत्वा तदन्तर्मषी
न्यस्ता तामिह मन्वते हरिणमित्यत्यन्तमज्ञा जनाः ॥

Colophon ;

— — — — —

79

Sl. No : 25722 भुवनप्रदीपिका Ms. No : A. 478/1

Beginning :

कृष्णः कृष्णाम्बुदाभाङ्गः कृष्णार्तिहरणो विभुः ।
कृष्णराजमहाराजं कृष्णसूतोऽभिरक्षतात् ॥
श्रीमन्महीशूरमहीमघोनः
श्रीकृष्णराजस्य सुधीधुरद्रोः ।

तोषाय सूरिस्तनुते महार्थं
श्रीरामकृष्णो भुवनप्रदीपम् ॥

End :

श्रीकृष्णराजेन्द्रकृपावलम्बिना
श्रीरामकृष्णेन विपश्चिवा कृते ।
सद्‌ज्ञानयोगार्थकथाप्रशंसी
दिशामितोऽभूत् पटलो मनोरमः ॥

Colophon :

इति श्रीरामकृष्णकविकृतायां भुवनप्रदीपिकासमाख्यायां श्रीकृष्णराज गुणरत्नमालायां ज्ञानयोगमहाराजस्तवकथनं नाम दशमः पटलः ॥

80

Sl. No : 25728 कृष्णराजगुणालोकः Ms. No : C. 4709/1

Beginning :

लक्ष्मीमाकलयन् स्थिरां समभवद्यन्मार्गणत्वं गतः
प्राप्तोऽनन्तगुणाभिराममचलं धर्मं दुरापं हि यः ।
आर्थानन्दकरः श्रितो बुधगणैः सद्राजतावासभूः
तं श्रीकृष्णनृपं स रक्षतु चिरं बालेन्दुचूडामणिः ॥

End :

अतीतेषु शकाब्देषु शालिवाहनभूभुजः ।
रत्नाद्रिमुनिभूसंख्येष्वब्दे पैङ्गलनामके ।
इषे शुक्ले सौरिवारसंयुतप्रतिपद्दिने ।
रत्नसिंहासनारूढे श्रीमत्कृष्णमहीश्वरे ॥

Colophon :

कृष्णराजगुणालोकनामा ग्रन्थो विनिर्मितः ।
तनोतु विदुषां चित्ते चमत्कारपरम्पराम् ॥
सम्पूर्णम् ॥

81

Sl. No: 25729 कृष्णराजगुणालोकव्याख्या Ms. No : C. 4709/2

Beginning :

अत्र भवान् नीलकण्ठनामा विद्वान् यद्यद्विभूतिमदिति सामान्यतो नराणां च नराधिपमिति विशेषतश्च स्वोपासनास्थानत्वेन भगवता वासुदेवेन उपदिष्टं + + + + मङ्गलमारचय्य शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति लक्ष्मीमिति ।

End :

कृष्णराजगुणानां आलोकः, कृष्णराजगुरुणालोक इति नाम यस्य सः ग्रन्थः विदुषां पण्डितानां चित्ते चमत्कारस्य आह्लादविशेषस्य परम्परां सन्ततिं तनोतु विस्तारयतु । आशिषि लोट् ॥

Colophon :

बालमुकुन्दाख्यो यः श्री कृष्णक्षोणिपालवर्येण ।
दत्तत्रिविक्रमाख्यो व्याख्येयं तत्कृता चिरं जीयात् ॥
सम्पूर्णम् ॥

82

Sl. No : 25730 कृष्णराजप्रभावोदयः Ms. No: A. 478/3

Beginning :

गौरीस्तन्यप्रदो मेने हितां यस्यैकदन्तताम् ।
तत्वोपदेशी शम्भुश्च भजामस्तं गजाननम् ॥
. . . द्वापरे मधुरापुर्यां श्रीकृष्णः प्राग्बभूव ह ।
स एवाद्य कलौ ज्ञेयः महीशूरपुरे वसन् ॥

End :

कृष्णराजनृपसार्वभौमभाक्
श्रीनिवासकविसार्वभौमवाक् ।
सर्वभूपतिनुतौ वनस्पतौ
ज्यायसी जयतु कल्पवल्लरी ॥

इयं कृष्णप्रभावाख्या कृष्णभूपस्य संनुतिः ।
सतां जनयतु प्रीतिं कृष्णस्य च महात्मनः ॥

Colophon :

इति श्रीनिवासकविसार्वभौमविरचिते कृष्णप्रभावोदयाख्ये प्रबन्धे वाङ्मणिमयच्छत्रसिंहासनादिवर्णनं नाम दशमः स्तबकः ॥

83

Sl. No : 25735 कृष्णराजजयोत्कर्षः Ms. No : A. 478/4

Beginning :

गिरिदुहितुरर्धशम्भोः
कुचविको यस्य कुम्भयुगयोगात् ।
प्राक् स्थितिमतीत्य शुशुभे
स्तनन्धयः कोऽपि सोऽस्तु सुखदो नः ॥

End :

कृष्णजयोत्कर्षाख्या संस्कृतकार्नाटीवाग्द्वयश्लिष्टा ।
अन्यादृशी कृतिरियं सत्प्रीत्यै श्रीनिवासरचिताऽस्तु ॥

Colophon:

कृष्णजयोत्कर्षग्रन्थः सम्पूर्णः ॥

84

Sl. No : 25738 कृष्णाभ्युदयकाव्यम् Ms. No : P. 2920

Beginning :

श्रीबालकृष्णः कंसारिः वसुदेवात्मजो विभुः ।
योगक्षेमं वहतु मे प्रह्लादमुखरक्षकः ॥
राजापि × पप्रच्छ शुकं व्याससुतं मुनिम् ।
श्रीकृष्णस्य कथामद्य कृपयेति वदस्व मे ॥
इति राज्ञो वचः श्रुत्वा + प्रवक्तुमुपचक्रमे ॥

End :

देवक्या जठरोद्भवं विधिमुखैः संप्रार्थितं दैवतैः
भूभारोन्मथनाय कंसशिशुपालादीन् ससैन्यान् मृधे ।

निघ्नन्तं व्रजवल्लवीजनमुखाम्भोजारुणं साग्रजं
श्रीकृष्णं शिरसा नमाम्यनुदिनं भक्तोद्धवाभीष्टदम् ॥

Colophon :

इति श्री कौशिककुलतिलकबालधनुश्रीवेङ्कटाचार्यसूनुना श्रीरङ्गदिव्यनगरवासिना श्रीनिवासराघवाचार्येण विरचिते कृष्णाभ्युदयकाव्ये यौवनलीला नाम चतुर्थः सुर्गः ॥

85

Sl. No : 25739 कृष्णाभ्युदयम् **Ms. No : P. 4568**

Beginning :

श्रियासमालिङ्गितचारु × ।
× मतां शरिरिणाम् ।
नियामकं विश्वसृजोऽपि तं विभुं
दयानिधिं श्रीनरसिंहमाश्रये ॥
पुरातनैः सन्मुनिभिः समीरिता-
मरिष्टहर्त्रीमखिलेष्टदायिनीम् ।
सुधातिमाधुर्यरसां रमापते-
रतीवपुण्यामभिवर्णये कथाम् ॥

\+ \+ \+ \+

End :

क्षीराम्भोनिधि × यनकुचद्वन्द्वाङ्गरागाङ्कित-
श्रीवत्सोज्वलकौस्तुभामलरुचिप्रचोदितोरुस्थलः ।
पङ्केजासनपाकशासनमुखप्रख्यातवृन्दारक-
श्रेणीचारुकीरीटरत्नविततीनीराजितांघ्रि भजे ॥

Colophon :

इति श्रीरामचन्द्राध्वरीन्द्रकृतौ कृष्णाभ्युदये महाकाव्ये दशमः सर्गः ॥

86

Sl. No: 25740 कृष्णामृतमहार्णवः **Ms. No : C. 1050**

Beginning :

अर्चितः संस्मृतो ध्यातः कीर्तितः कथितः श्रुतः ।
यो ददात्यमृतत्वं हि स मां रक्षतु केशवः ॥

तापत्रयेण सन्तप्तं यदेतदखिलं जगत् ।
वक्ष्यामि शान्तये तस्य कृष्णामृतमहार्णवम् ॥

End :

श्रीमदानन्दतीर्थाख्यसहस्रकिरणोत्थितः ।
गोतनीसन्ततं सेव्यः गीर्वाणैः सिद्धिदो भवेत् ॥
यः सर्वगुणसम्पूर्णः सर्वदोषविवर्जितः ।
प्रीयतां प्रीतये वालं विष्णुर्मे परमं सुहृत् ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते कृष्णामृतमहार्णवः सम्पूर्णः ॥

87

Sl. No: 25742 | खण्डप्रशस्तिः | Ms. No : C. 1803 /1

Beginning :

कृतक्रोधे यस्मिन् अमरनगरी मङ्गलरवा
नवातङ्का लङ्का समजनि वनं वृश्चति सति ।
सदा सीताकान्तप्रणतिमतिविख्यातमहिमा
हनूमानव्याद: कपिकुलशिरोमण्डनमणिः ॥

End :

प्रेषद्वाजितुरङ्गमुन्मदगजग्राहप्रगल्भं भर-
व्याव × त्स्फुरपुण्डरीकनिलयं डिण्डीरपिण्डावलिम् ।
म्लेच्छानीकमहार्णवं सुविपुलं सङ्ग्रामकल्पावधौ
यश्च × राग्निरिवभावद्यतु स वः कल्कानि कल्की हरिः ॥

Colophon :

इति दशावतारव्याख्यानेन समर्पिता श्रीखण्डप्रशस्तिवृत्तिः सम्पूर्णा ॥
विधुवारिधि + + लिलेख ॥

88

Sl. No : 25744 | गङ्गालहरी | Ms. No : C. 5373/3

Beginning :

समृद्धं सौभाग्यं सकलवसुधायाः किमपि त-
न्महैश्वर्यं लीलाजनितजगतः खण्डपरशोः ।

श्रुतीनां सर्वस्वं सुकृतमथ मूर्तं सुमनसां
सुधासौन्दर्यं ते सलिलमशिवं नः शमयतु ॥

End :

विश्वेश्वरसमो देवो क्षेत्रं वाराणसीसमम् ।
मणिकर्णिकासमं तीर्थं नास्ति ब्रह्माण्डगोलके ॥

Colophon :

— — —

89

Sl. No : 25745 गीतगङ्गाधरव्याख्या **Ms. No : P. 2764**

Beginning :

× × × महः ॥
विहिनु × नेक्ष्यन्ते यथा × षक वि राम × कुर्मः
× × × × प्राणभङ्गावचिस्तव ॥
× × दूयामहे × दत्तकर्णज्वरा वयम् ।
न वा वदामो वाग्देवि ननु त्वमपि तैर्हता ॥

End :

अस्पृष्टा कलयापि दुष्टवि × लैरज्ञै × कर्णिता
ज्ञानाज्ञानवतां कदाप्यपतिता दूरे ।
× हार्धं कृता स्वैरं रसज्ञैजनैः
प्रत्युक्तिच्यवमान नूतन सुधासारा

Colophon :

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठ × श्रीमदप्पयदीक्षित-पौत्रेण नारायणदीक्षितात्मजेन भूमिदेवीगर्भगङ्गावतरणे भगीरथप्रवेशो नाम अष्टमस्सर्गः ॥

90

Sl. No : 25746 गीतगोविन्दव्याख्या **Ms. No: A. 794/1**

Beginning :

वेदा येन पुरारिणा स्वविभवैरश्वीकृतश्चे कृताः । (?)
किश्वासा × × ॥
यद्भूषा मणिपीठिका विजयते सर्वं × ॥

× × × तयोऽपि शरधिः श्रीमान्
× × × स्वयं वारिधिः ।
किञ्चैतानि × × धीश्वरः ॥

End :

यं वीरेशतनूजसोमप्रकृतिः प्रासूत सूनुं सती
मल्लम्मा प्रमदा च येन विदधे श्री वीरशैवामृतम् ।
तेनाऽनेत कृते नन्दानिकृतिना प्रख्यातगङ्गोदय-
ग्रन्थे सर्वगुणोत्तरेऽत्र नवमो यातः परिच्छेदकः ॥

Colophon :

नारायणोपासक ईश्वरोपास्यानुवर्णनं नाम नवमोऽध्यायः सम्पूर्णः ॥
गङ्गोदयं समाप्तम् ॥

91

Sl. No : 25749 गाथासप्तशती Ms. No : P. 7254/1a

Beginning :

पसुपइणो रोसारुणपडिमा सङ्कन्तगोरिमुहचन्दम् ।
गहिअं सपङ्कअं विअ सं × सलिलंजलिं णवह ॥
पशुपते रोषारुणप्रतिमासंक्रान्तगौरीमुखचन्द्रम् ।
गृहीता सत्यप्यपङ्कजमिव स × सलीलाञ्जलिं नमत ॥
रह केळी हिअ णिवसणा करजुअळणिरूढणभण जुअळं स ।
हरोंदसतइअण अणं पंवइ परिचुम्बिइं जअइ ॥

End :

जेणविणा ण जीविं जइ अणुणिं जअउसोकआवराहोपि ।
पन्तेवि णअरदाहे भण कंसण वल्लहो अग्गी ॥
येन विना जीविष्यते अनुनीयतां स कृतापराधोऽपि ।
प्राप्तोऽपि नगरदाहे भण कस्य न वल्लभोऽग्निः ॥

Colophon :

६१तमपत्रे —

इति सप्तशत्यां असत्यभिसारिकावेश्याजरतीबन्दीपद्धतिर्नाम पञ्चमं शतकं समाप्तम् ॥

92

Sl. No : 25750 गाथासप्तशतीव्याख्या Ms. No : P. 3292/2

Beginning :

नत्वा दुण्ढिपदाब्जं गङ्गाधरभट्टनिर्मिता टीका ।
सप्तशतभावलेशप्रकाशिका शोध्यतां विज्ञैः ॥

अथ तत्रभवान् प्राकृतकविकुमुदिनीनायकश्शालिवाहनश्चिकीर्षितगाथाकोशस्याविघ्नपरिसमाप्तये कृ + मङ्ग × श्रोतृ × तार्थमुपनिबध्नाति ॥ पपुवइणविति ॥ मामुपेक्ष्य कथमयमन्यां ध्यायतीति रोषेणारुणा × मया सङ्क्रान्तं प्राकृते पूर्वनिपातानियमात्—

End :

नायकस्य मनोहरणार्थं दूती नायकाया अनुरागातिशयमाह बहसोऽपीति ॥
बहशोऽपि कथ्यमानं तव वचनं हस्तसंदिष्टम् ।
न श्रुतमिति जल्पन्ती पुनरुक्तशतं करोत्यार्या ।
पुनः पुनः श्रवणानुरागात् श्रुतमपि न श्रुतमित्येव वदतीत्यर्थः ॥

Colophon :

— — — — —

93

Sl. No : 25753 गीतगङ्गाधरः Ms. No : P. 4422/a

Beginning :

श्रीगौरीपरमेशपादकमलद्वन्द्वानुसन्धायिने
सानन्दं स × दाय गुरवे भूयो विधायाञ्जलिम् ।
शृङ्गारैकरसोज्वलैः शिवपरैः × × भिः
गीतव्रातमनोहरं विरचये सङ्गीतगङ्गाधरम् ॥

श्रीशैलजाचरणसारससक्तचित्तः
श्रीकण्ठपादसरसीरुहचञ्चरीकः ।
श्रीवीरराजवसुधाधिपतेः कुमारः
श्रीनञ्जराजसुकविः कुरुते प्रबन्धम् ॥

End :

या सङ्गीतकलारहस्यकलना या साहितीमाधुरी
या च श्रीरखिलावनीविलसिता भक्तिश्च या शाङ्करी ।
तत्सर्वं वरवीरनञ्जनृपतेः साहित्यचूडामणेः
सारज्ञाः परिशोधयन्तु कृतिनः सङ्गीतगङ्गाधरे ॥

Colophon :

— — —

94

Sl. No : 25755 गीतगङ्गाधरव्याख्या Ms. No : P. 3010/2

Begnning :

वन्दे वन्दारुमन्दारं इन्दुचूडस्य नन्दनम् ।
अमन्दानन्दसन्दोहबन्धुरं सिन्धुराननम् ॥
श्रवणानन्दिनी नाम्ना कविभावप्रकाशिनी ।
श्रवणानन्दिनी भूयादशेषविदुषामियम् ॥

इहखलु + देवराजानुजः नञ्जराजनाम ।कविः सङ्गीतगङ्गाधराभिधानं काव्यमारभाणः + प्रतिजानीते श्रीगौरिति ॥

End :

इमां श्रवणनन्दिनीरस × × बुधा
प्रश्रन्नहृदया दयाजलधयो बहूकुर्वते ।
तदीयपदपद्मयोरयमयं प्रणामाञ्जलिः
सरोजमुकुलाकृतिः शिरसि सन्ततं न्यस्यते ॥

Colophon :

इति श्रीकौण्डिन्यकुलतिलक × × काशीपतिपण्डितविरचितायां सङ्गीत गङ्गाधरव्याख्यायां श्रवणानन्दिनीसमाख्यायां षष्ठः सर्गः ॥

95

Sl. No : 25756 **गीतगोविन्दम्** **Ms. No : P. 133/1**

Beginning :

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैः
नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहः केलयः ॥
वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती ।
श्रीवासुदेवरतिकेलिकथासमेत-
मेतं करोति जयदेवकविः प्रबन्धम् ॥

End :

यद्गान्धर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं
× यच्छृङ्गारविवेकतत्त्वमपि यत्काव्येषु लीलायितम् ।
तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः
सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः ॥

Colophon:

इति श्री गीतगोविन्दे स्वाधीनभर्तृकावर्णनं नाम द्वादशस्सर्गः ॥

96

Sl . No : 25767 **गीतगोविन्दम्** **Ms. No : P. 7196/1**

Beginning :

मेघैर्मेदुरमम्बरं + रहःकेलयः ॥
वाग्देवताचरित + जयदेवकविः प्रबन्धम् ॥
+ + + +
माळवरागेण गीयते--- अटताळेन—
प्रळयपयोधिजले धृतवानसि देहं
विहितवहित्र चरित्रमखेदम् ।

केशव धृतमीनशरीर जय जगदीश हरे ॥

End :

साध्वी माध्वीकचिन्ता भवति भगवतश्शर्करे कर्कशासि
द्राक्षे द्रक्ष्यन्ति के त्वाममृत मृतमसि क्षारनीरं रसस्ते ।
माकन्द क्रन्द कान्ताधर धरणितलं गच्छ गच्छन्ति यावत्
भावं श्रृङ्गाररसारस्वतमयजयदेवस्य विष्वग्वचांसि ॥

Colophon :

इति निखिलदुरूहशास्त्रार्थभावतात्पर्यसारविजयदेवकविसार्वभौमविरचितः समस्तजनश्रुतिमनोहरपदचमत्कारैश्वर्यकोमळादिगुणानुबन्धसिन्धुराष्टपद्यभिधेय-प्रबन्धस्समाप्तः ॥

97

Sl. No : 25781 गीतगोविन्दम् Ms. No : C· 2511/2

Beginning :

मेघैर्मेदुर + रहःकेलयः ॥

End :

साधूनां स्वत एव संमतिरिह स्यादेव भक्त्यार्थिना-
मालोच्य ग्रथनश्रमं च विदुषामस्मिन्भवेदादरः ।
ये केचित्परछत्यश्रुयतिपरास्तानर्थये मत्कृतिं
भूयो वीक्ष्य वदं × × मिह चेतसा वासना स्थास्यति ॥

Colophon :

श्रीभोजराजप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य
पराशरादिप्रियबन्धुकण्ठेश्रीं × गोविन्दकवित्वमस्तु ।
जयति श्री गीतगोविन्दे × च्ते ।
सुप्रीतिपतिकरो नाम द्वादशसर्गः ॥

98

Sl. No : 25784 गीतगोविन्दव्याख्या MS. No P: . 1944

Beginning :

वन्देमहि महानन्ददायिनं श्रीपतिं विभूम् ।
बृन्दारकौघसानन्दवन्द्ये हरिपुरे स्थितम् ॥

वेदान्तादिसमस्तशास्त्रनिपुणप्रज्ञामहिम्नार्जित-
व्यासागस्त्यसदृक्षकीर्तिसुभगः साहित्यचिन्तामणिः ।
विश्वामित्रकुलोद्भवः सकलदिग्विद्यार्थिभिः प्रार्थितः
सर्वज्ञो जयतीदृशं सरसवाग × ॥
तस्यात्मजोऽप्रमेयोऽहं सामाध्ययनपारगः ।
करोमि गीतगोविन्दटीकां शृङ्गारमञ्जरीम् ॥

\+ + + +

ಸಕಲ ವಸುಮತೀ ತಳದೊಳಃ ಪ್ರಖ್ಯಾತನಾದ ಮಹಾಕವಿ ಜಯದೇವನೆಂಬ ಮಹಾ ಪುರುಷನು 'ಕಲೌ ಸಂಕೀರ್ತ್ಯ ಕೇಶವಂ' ಎಂಬ ವಾಕ್ಯಾರ್ಥಮಂ ಮನದಲ್ಲಿಟ್ಟು

End:

ಜಯದೇವನ ವಾಕ್ಯಗಳೆಂಬ ಅಮೃತವಂ ಸೇವಿಸುವ ಸತ್ಪುರುಷರುಗಳು ನಿನ್ನನ್ನು ಮನಸ್ಸಿನಿಂದಲಾದರೂ ನೆನೆಯಃವರೆಂದು ತಾತ್ಪರ್ಯ. ಇಹ ಪರಗಳಿಗೆ ಸಾಧನವಾದ ಪರಮ ಸುಖಪ್ರದವಾದ ಜಯದೇವನ ವಾಕ್ಯಂಗಳ ಸದಾ ಆಸ್ವಾದನಂ ಗಯ್ಯಲಕ್ಯದೆಂಬುದು ಅಭಿಪ್ರಾಯಂ.

पाठधारणसौख्याय कर्णाटकगिरा कृतम् ।
बालानाम्नाप्रमेयाख्यशास्त्रिणा सत्यवर्तिना ॥

Colo phon :

इति श्रीमद्भक्तिवर्धनस्थितारविन्दपल्लिकापतेः अप्रमेयस्वामिनः पादारविन्दार्चकेन अय्याजिभट्टारकपुत्रेण अप्रमेयशास्त्रिणा विरचितगीतगोविन्दटीकायां शृङ्गारप्रकाशिकायां द्वादशः सर्गः ॥

99

Sl. No : 25788 गीतागोविन्दव्याख्या Ms No: C. 740/1

Beginning :

चैतन्यपादपद्ममभून्मतेन केनचित् । (१)
टीका संगृह्यते गीतगोविन्दस्य समासतः ॥
स्वयं बोद्धुमभिप्रायं जयदेवमहामतेः ।
टीका चैतन्यदासेन गृह्यते बालबोधिनी ॥

End :

प्रत्यूहेत्यनेन ततो रहः केलयः। इति मनसेत्यन्तेन ततः स्वाधीनभर्तृ-
काया गान्धर्वकलासु इत्यनेनेति।

यद्वच्च बालमुग्धोक्तौ पिता प्रीतिमवाप्यते।
तद्वच्छ्रीतुष्टचैतन्यः प्रीयतां मात्रजल्पितैः॥

Colophon :

श्री गोविन्दपादसेवाप्रभावदुहिता स्वयम्।
चैतन्यदासतो बालबोधिनी स्यात्सतां मुदे॥

100

Sl. No : 25795 गीतगोविन्दव्याख्या Ms· No : P. 1767/2

Beginning :

देहि मत्कन्तुकं राधे परिधाननिगूहितम्।
इति विस्रंसयन्नीवीं तस्याः कृष्णो मुदेऽस्तु नः॥
यद्दानवारिवाहिन्या नित्यं परिणयोऽम्बुधेः।
रामराजस्ततो जज्ञे दानक्षातजनुर्ग्रहम्॥ (?)
+ + + +
सोऽयं तिरुमलक्षोणीपतिश्चूडार्थसंग्रहम।
शृण्वन् मृदुपदं गीतगोविन्दध्वनिमण्डितम्॥
तस्यार्थदीपिकां टीकां करोति श्रुतिरञ्जनीम्॥

End :

साध्वी माध्वीकचिन्ता न भवति भवतः शर्करे शर्करासि
द्राक्षे द्रक्ष्यन्ति × मवृतमृतमसि क्षीरनीरं तनुस्ते।
माकन्द कुन्दकान्ताधरधरणितलं गच्छन्ति याव-
द्भावाः शृङ्गारसारस्वतमयजयदेवस्य विष्वग्वचांसि॥ (?)

Colophon :

इति श्रीमदखिलदेवतासार्वभौमरघुनाथप्रसादलब्धसकलसाम्राज्यसोमान्वया-
भरणधरणीवराहात्रेयगोत्रश्रीरङ्गराजपुत्रतिरुमलराजविरचितायां गीतगोविन्द-
व्याख्यायां श्रुतिरञ्जनीसमाख्यायां द्वादशः सर्गः॥

101

Sl. No : 25793 गीतगोविन्दव्याख्या Ms. No : C. 5030/2

Begnning :

संभ्रान्तो राधिकाया नयनविलसितैः विभ्रमभ्रूविलासैः
किञ्जल्कव्रातकान्तेः × × कृष्टचन्द्रः ।
कन्दर्पाह्लादवर्षी जयति धनवने वृन्दया लक्षितस्सः ।।
इह खलु सकलनववल्लरीवृन्दवदनेन्दीवरशशधर —

End :

श्री भोजदेवेति । इति श्री गीतगोविन्दे सुप्रीतपीताम्बरो नाम द्वादशः सर्गः । श्री राधाया स्वमण्डने वियुक्तस्तेनातिशयेन प्रीतवानित्यर्थः । गीतगोविन्दशति × इत्यभिधानात् ।।

Colophon :

श्रीमद्वृन्दावनेश्वरीप्रियकृच्चरणपङ्केरुहमकरन्दस्वादनपटुचञ्चरिकसंभाषणमध्वानन्दो (?) लचपलहृदयेन श्रीमद्भगवद्दासेन . . . . विरचितेयं रसकदम्बकल्लोलिनी × × × विचारणीया ।।

102

Sl. No : 25796 गीतगोविन्दव्याख्या MS. No : P. 2949/2

Beginning :

धवलजलदवर्णं चन्द्रमःखण्डचूडं
वरदहरिणहस्तं ज्ञानमुद्राभिरामम् ।
भुजगवरविराजत्कङ्कणं × बाहुं
दलितनिजजनार्तिं दक्षिणामूर्तिमीडे ।। +
तेन लक्ष्मीधरार्येण क्रियते श्रुतिरञ्जनी ।।

End :

तथा च मधुरप्रियैः सात्विकैः ऐहिकामुष्मिकसुखार्थिभिः जयदेवसरस्वत्येव आस्वादनीयं वस्त्वन्तरं भवतीति भावः ।।

Colophon :

इति श्रीमदभिनवविद्यापरिवारश्रीमद्दक्षिणामूर्तिमहादेवप्रसादलब्धविद्यापूर्वोत्तरमीमांसाशब्दतर्कसाहित्यसार्वभौमवरकुरुकोट्टैभट्टोपाध्यायानुजेन सर्वाम्बिकागर्भशुक्तिमुक्ताफलेन लक्ष्मणसूरिणा विरचितायां श्रीगीतगतोविन्दव्याख्यायां श्रुतिरञ्जिनीसमाख्यायां द्वादशः सर्गः ॥

103

Sl. No: 25806 गीतगोविन्दव्याख्या Ms. No : C. 767

Beginning :

× द्रावितमनोरथफलश्रीत्वा × रिं निजचित्तानुरञ्जनचतुरं कृष्णम् अनुभवन्ती स्ववशीकुर्वन्ती रमत इति भावः। एवं तस्यान्यासक्ति जानानाऽपि अहमतिचपलं कृतवतीत्याह – आहेति।

End:

मतिप्रसूता गहनार्थशास्त्रैः
संवर्धिता सूक्तिकुमारिकेयम् ।
औचित्यतारुण्यभरोल्लसन्ती
कान्तं पतिं प्राप्य यशः प्रभूतम् ॥

Colophon :

इति श्रीमच्छेषपण्डितकमलाकरविरचितायां गीतगोविन्दव्याख्यायां साहित्य रत्नमालायां द्वादशः सर्गः ॥ समाप्तोऽयं ग्रन्थः ॥

104

Sl. No : 25807 गीतगोविन्दव्याख्या Ms. No : P. 1570/2

Beginning :

शुभं पाशहस्तं सुराणां प्रशस्तं मनोज्ञं प्रशस्तं
महा × शुभ्रवर्णं सुवर्णाबकर्णं भजेहं गणेशम् ॥
ಕುಲದೇವತಾರಾಧನೆಯಿಂ ಮಾಡುವೆನೆಂದು ಯಮುನಾ ನದೀ ತೀರಕ್ಕೆ ಬಂದು ಇದಿಂಥ—ಮಂಗಳಂ ಮಾಡಿಪಂ.

End :

ಜಯದೇವನ ವಾಕ್ಯಗಳೆಂಬ ಅಮೃತಂ ಸೇವಿಸುವ ಸತ್ಪುರುಷರುಗಳು ಎಲೆ ಮಧುಪೆ ನಿನ್ನನು ಮನಸ್ಸಿನಿಂದಲಾದರೂ ನೆನೆಯರು ಎಂಬುದರ್ಥಂ. ಇಹಪರಂಗಳಿಗೆ ಸಾಧನವಾದ ಪರಮಸುಖಪ್ರದವಾದ ಜಯದೇವನ ವಾಕ್ಯಂಗಳೆ ಸದಾ ಆಸ್ವಾದನಂಗಯ್ಯ ಲೆಂದು ತಾತ್ಪರ್ಯಂ.

Colophon:

ಅಂತು ಅಷ್ಟಪದಿವ್ಯಾಖ್ಯಾನ ಅರ್ಥಯುಕ್ತವಾಗಿ ಜಯಮಂಗಳಮಹಾಶ್ರೀ ಶ್ರೀ ಶ್ರೀ ॥

105

Sl No 25814 **गीतवीतरागः** **Ms No: P. 1025/1**

Beginning:

वन्दित्वा श्री वृषभाधीशं वृषभं वृषभध्वजम् ।
सद्‌गीतवीतरागाख्यग्रन्थव्याख्यां प्रचक्ष्महे ॥
विद्याव्याप्तसमस्तवस्तुविसरो विश्वैर्गुणैर्भासुरो
दिव्यश्रव्यवचः प्रतुष्टनृसुरः सध्यानरत्नाकरः ।
यः संसारविषाब्धिपारसुतरो निर्वाणसौख्यादरः
स श्रीमान् वृषभेश्वरो जिनवरो भक्त्यादरात् पातु नः ॥

End:

एवं विधां दिव्यसभां दिनेशो
महार्घरत्नग्रथितां घनेशः ।
समस्तभव्यप्रथमप्रदेशां
विवेश सं × मुखः सुरेशः ॥
त्रिमेखलं पीठमथाधिगम्य
दिव्याम्बुगन्धाक्षतपुष्पहव्यैः ।
दिव्यैश्च धूपैश्च × ×

Colophon:

[इति श्रीमदभिनवचारुकीर्तिपण्डिताचार्यवर्यस्य कृतौ गीतवीतरागे ललिताङ्गस्य वनविहारवर्णनो नाम चतुर्विंशः प्रवन्धः ॥]

106

Sl. No: 25815 **गीतवीतरागः** **Ms No: P. 2721/1**

Beginning:

विद्याव्याप्तसमस्तवस्तुविसहे दिश्यै × णैर्भासुरो
दिव्यश्रव्यवचः प्रतुष्टनृसुरः सुध्यानरत्नाकरः ।
यः संसारविषाब्धिपारसुतरो निर्वाणसौख्याधरः
स श्रीमान् वृषभेश्वरो जिनवरो भक्त्यादरात् पातु नः ॥

End :

स्वस्ति श्रीबेळगुळ दोर्बलिजिननिकटेकुन्दकुन्दान्वयेनो
भूस्तुत्यः पुस्तकाङ्कः श्रूतगुण भरणः स्यातदेशिगणार्यः ।
विस्तीर्णाशेषरीतिप्रगुणरसभृतं गीतयुग्वीतरागं
शस्तादेशप्रबन्धं बुधनुतमतनोत् पण्डिताचार्यवर्यः ॥

Colophon :

इति श्रीमदभिनवचारुकीर्तिपण्डिताचार्यवर्यकृतौ गीतवीतरागाभिधानाअष्टपदी समाप्ता ॥

107

Sl. No : 25816 गीतवीतरागटीका Ms. No : P. 2721/2

Beginning :

वन्दित्वा श्री वृषभाधीशं वृषभं वृषचक्रपम् ।
सद्गीतवीनरागाक्य ग्रन्थव्याख्यां प्रचक्ष्महे ॥

ಯಃ ಆವನೋರ್ವನು ಸಂಸಾರ ವಿಷಾಬ್ಧಿಪಾರ ಸುತರಃ ಸಂಸಾರ ಸಂಸಾರವೆಂಬ ವಿಷ ವಿಷರೂಪವಾದ ಅಬ್ಧಿ ಸಮುದ್ರದ ಪಾರ ತೀರವನು ಸುತರಃ ಲೇಸಾಗಿ ದಾಂಡುವನೊ,

End :

ಸ್ವಸ್ತಿ ಶ್ರೀ ಬೆಳ್ಗುಳೇ ಐಶ್ವರ್ಯದೊಡಗೂಡಿದ ಬೆಳ್ಗುಳ ಗ್ರಾಮದಲ್ಲಿ, ದೋರ್ಬಲಿ ಜಿನನಿಕಟೆ, ದೋರ್ಬಲಿಜಿನ ಶ್ರೀ ಭುಜಬಲಿ ಸ್ವಾಮಿಯ ನಿಕಟೇ, ಸಮೀಪ ದಲ್ಲಿ, ಕುಂದಕುಂದಾನ್ವಯೇನಃ ಕುಂದಕುಂದಾನ್ವಯ ಕುಂದಕುಂದಾನ್ವಯಕ್ಕೆ ಇನಃ ಶ್ರೇಷ್ಠನಾದನ ಅತನೋತ್ ವಿಸ್ತರಿಸಿದನು.

Colophon :

इति गीतवीतरागाभिधानाष्टपदीव्याख्यानं समाप्तम् ॥

108

Sl No : 25818 गुरुवंशकाव्यम् Ms No : P. 2474

Beginning :

× श्रुपुरो तियुगलंविलोलम् ।
विप्रौघान् निगमयितुं पुनश्च पक्षा × वान्यः ॥
विद्यायां मम पितरौ गुरू भवेतं
षव्वक्राण्यपि सफलानि सन्तु नान्यम् ।

यामिति स्वयवचनहर्ष × ×

× × मे षडास्य: ॥

End :

जम्बूद्वीपस्य शोभा गुरुकुलविलसन्मल्लिकामद्य × न

विद्याविद्योतिदीप: रमत विचर × द्रादिमचेंमसिंह: ।

राजद्राजाधिराजावाधि मुकुटमणि: सच्चिदान्दभार-

त्यारव्य: प्ररव्यातकीर्ति: जगति विजयते योगिनां सार्वभौम: ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यपदवाक्यप्रमाणपारावारपारीण × विश्वेश्वरशास्त्रिपुत्रलक्ष्मणशास्त्रिविरचिते गुरुवंशे महाकाव्ये पञ्चदश: सर्ग: ॥ सम्पूर्ण चेदं गुरुवंशमहाकाव्यम् ॥

श्रीज्ञारदा + + मुनीन्द्र: ॥

109

Sl . No : 25823 घटकर्परकाव्यम् Ms. No : C. 2911/2

Beginning :

निचितं स्वमुपेत्यनीरदै:

प्रियहीनाहृदयावनीरदै: ।

सलिलैर्निहितं रज:क्षितौ

रविचन्द्रावपि नोपलक्षितौ ॥

हंसा नदन्मेघभया: द्रवन्ति ×

निशामुखान्यद्यन चन्द्रवन्ति ।

नवाम्बुमत्ता: शिखिनो नदन्ति

मेघागमे कुन्दसमानदन्ति ॥

End :

आदाय चाम्बु तृषित: करकोशपेयं

भावानुरक्तवनितासुरतै: शपेयम् ।

जीवेम येन कविना यमकै: परेण

तस्मै वहेयमुदकं घरकर्परेण ॥

Colophon :

इति कविकुलश्रेष्ठकालिदासविरचितायां घटकर्पराख्यं काव्यं समाप्तम् ॥

110

Sl. No : 25825 घटकर्परव्याख्या Ms. No : C. 2911/3

Beginning :

अथ कलिफाया: कविकल्पितपदं यमककाव्यं घटकर्परं सम्यक् चिकीर्षुः शिष्टाचारप्राप्ततया कृतं भक्तिप्रधानातिशयपूर्वकं कलानतिस्तुतिलक्षणं मङ्गलं मनसि निधाय प्रतिपाद्यं प्रतिजानीते – निचितमिति ॥

End :

दिनेषु दिवसेषु सेन्द्रायुधाम्बुधरगर्जितदुर्दिनेषु सेन्द्रायुधाः इन्द्रचापसहिताः ये अम्बुधराः जलधराः तेषां गर्जितानि शब्दितानि दुर्दिनानि घनतिमिराणि च येषु तेषु सत्सु इत्यर्थः ॥

Colophon :

घटकर्परटीका समाप्ता ॥

111

S. No : 25826 चण्डिकाविजयः Ms. No : P. 5901

Beginning :

श्रीरामचन्द्रेण परेण तारा
मोदप्रदात्रा हरिणाश्रितेन ।
चेतो युनक्त्यात्मगभस्तिभिन्न
प्रोद्यत्तमस्तोमनिशाचरेण ॥

\+ + + +

End :

श्रीमत्केशवसूरिसूनुरुदभून्नारायणो नामतः
साध्यार्धीतयजुःश्रुतिस्सुकविताप्राज्यलब्धोदयः ।
तेनाशेषगुणान्वितेन रचिते हृद्यार्थपद्योज्वले
काव्येऽस्मिन् श्रितचण्डिकाविजयके सर्गोऽत्यगाद्द्वादशः ॥

Colophon :

[काव्येऽस्मिन् श्रितचण्डिकाविजयके सर्गोऽत्यगाद्द्वादशः ॥]

112

Sl. No: 25829 — चन्द्रप्रभचरितम् — Ms. No : P. 9279

Beginning :

श्रियं क्रियाद्यस्य सुरागमेनो-
त्सुन्रेद्रनेत्रप्रतिविम्बलोडिता ।
सभा बभौ रत्नमयी महोत्पलैः
कृतोपहारेव स वोऽग्रजो जिनः ॥

End :

संशष्टामथ तस्य भूधरयतेश्चैत्यालयोद्वासिनः
पूते मूर्धनि साधका[ग]कशतोत्सेधां तदीयां तनुम् ।
× × × भिः प्राप्तोरुपुण्योदयाः
कल्याणं प्रविधाय पञ्चममगुः स्वं स्वं पदं स्वर्गिणः ॥

Colophon :

इति वीरनन्दिकृतौ उदयाङ्के चन्द्रप्रभचरिते महाकाव्ये अष्टादशः सर्गः ॥

113

Sl. No : 25830 — चन्द्रप्रभचरितव्याख्या — Ms. No : P. 1026

Beginning :

वन्देऽहं सहजानन्दकन्दलीकन्दबन्धुरम् ।
चन्द्राङ्कं चन्द्रसङ्काशं चन्द्रनाथं स्मराहरम् ॥
चन्द्रप्रभार्हधीशस्य काव्यं व्याख्यायते मया ।
विश्वमन्वयरूपेण स्पष्टसंस्कृतभाषया ॥
श्रियमित्यादि ॥ यस्य स्वामिनः । सुरागमे सुराणामागमस्तस्मिन् ॥

End:

महतां पुण्यानां शुभकर्मणां उदयो यैस्तैः । स्वर्गिणो देवः । पञ्चमं परिनिर्वाणाख्यं कल्याणं मङ्गलकार्यं प्रविधाय । स्वं स्वं स्वकीयं स्वकीयं । पदं स्थानं । अगुः ययुः । लुङ ॥

Colophon :

इति वीरनन्दिकृतौ उदयाङ्के चन्द्रप्रभचरिते महाकाव्ये तद्व्याख्याने च विद्वन्मनोवल्लभाख्ये अष्टादशः सर्गः ॥

114

Sl. No : 25835 | चन्द्रसन्देशः | Ms. No : B. 1056

Beginning :

नयति विततिं स्वाचार्य × कृतं
कृतमपि प्रारब्धैः तव शेषमशेषतः।
प्रपदनविधौ पश्चाद्भाति प्रमादवशार्जितम्
विदितपि निह्नूय श्रेयश्शिखाभिधायिनि ॥
का चित्कान्ता कनकतटिनीतीरवानीरकुञ्जे
दूरे धाम्नि स्थितमसुलभं चिन्तयन्ती स्वकान्तम् ।
प्राचीनक्ष्माधरवरमहामेखलापद्मरागं
सान्द्रानन्दप्रमदसुमतां बालमिन्दुं ददर्श ॥

End :

श्लोकास्तत्र प्रतिपदमनोहारिणः शत × णा वसानाः ।
त्रय्या सख्या कथमपि कृता मां क्षन्तमीशो
तावत्संख्यां तदनु दयितं प्रापय त्वं निवृत्तः ॥
बद्धोरिन्दोरिव परवति × क्तः ।
रा × विहर हरिणीपोतलक्ष्मानुसायम्
× × × त स्थलीषु ॥

Colophon :

इति चन्द्रसन्देशः समाप्तः ॥

115

Sl. No : 25839 | चोरपञ्चाशत् | Ms. No: P. 4860/7

Beginning :

मल्हणो बिल्हणश्चैव द्वाविमौ सरसौ कवी ।
तत्रापि बिल्हणो नाम कविराट् कथ्यते बुधैः ॥

End :

सुसेनराज्ञा कविना कुमारी
लक्ष्मीगृहे नाम्नि पुरे च नित्यम् ।
स्वकीयराज्यं परिपाल ×
लक्ष्मीपतिश्चानुदशावतस्थः ॥ (?)

Colophon :

इतिं श्री कविराजविरचिते शृङ्गारशास्त्रे विल्हणनाटकाख्यं नाम चोरपञ्चाशत् समाप्ता ॥

116

Sl. No : 25845 जम्बूस्वामिचरितम् **Ms. No : B. 108**

Beginning :

श्री वर्धमानतीर्थेशं वन्दे मुक्तिवधूवरम् ।
कारुण्यजलधिं देवं देवाधिपनमस्कृतम् ॥
\+ \+ \+ \+
अथ प्रसादादेतेषां वक्ष्ये चरितमुत्तमम् ।
श्री जम्बूस्वामिनः सारं मुनेः केवलिनो वरम् ॥
विख्यतोऽस्ति महान् द्वीपो जम्बूनामाति शोभनः ।

End :

जम्बूस्वामिजिनाधीशो भूयान्माङ्गल्यसिद्धये ।
भवतां भुवि भो भव्याः श्रीवीरान्तिमकेवली ॥

Colophon :

इति श्रीजम्बूस्वामिचरित्रे भट्टारकश्रीसकलकीर्तिशिष्यब्रह्मचारिजिनदासविरचिते विद्युच्चरमहामुनिसर्वार्थसिद्धिगमनं नमैकादशः सर्गः ॥

117

S. No : 25846 जगन्नाथविजयकाव्यम् **Ms. No : C. 2020**

Beginning :

जयतु जलधर × × नीपा
× × बहुलतनूभा भासमानो समानः ।

जनकदुहितृवक्षोजातशैलावमर्दे

परिणतगजराजः प्रौढसाकेतराजः ॥

End :

आश्चर्ययोगे—

चित्रं यत्र भवा × च त्वमशङ्क्ष्यधारिहुम् ।

किमुशब्दयोगे—

को हि जा × नस्तत्वं किं किमौहिष्यधा इति ॥

यदियद्यदायोगे —

यदि रोचिष्यथाश्चित्ते यदा मोदिष्यथा युधि ।

यदा स्पन्दिष्यथा + ष्टि सुधां तत्र व + स्थिराः ॥

Colophon :

इति श्रीमद्रामपुराधीश श्री रघुनाथचरणद्वन्द्वाराधनलब्धसम्पत्सारस्वत + + + श्री वेङ्कटाचार्यविरचिते श्रीमति महाकाव्ये जगन्नाथविजये + + + सप्तविंशोल्लासः ॥

118

Sl. No : 25848 जयतीर्थविजयः Ms· No : B. 285/2

Beginning :

लक्ष्मीमुखाम्भोजविराजहंसं

प्रक्षीणदोषं परमं पुमांसम् ।

जगन्निवासं हरिनीलभासं

श्रीवेङ्कटेशं शरणं प्रपद्ये ॥

End :

सकलालंकृतिलेखनाद्यघण्टां

निशिताग्रां द्रुहिणप्रियावरिष्ठाम् ।

परिशोधनसाधनं च पूगं

प्रददौ तस्य निरीक्ष्य भक्तियोगम् ॥

Colophon :

इति श्रीमज्जयतीर्थपूज्यचरणशिष्यव्यासतीर्थकृत श्रीमज्जयतीर्थविजये पञ्चमः सर्गः ॥

119

Sl. No : 25849 जयतीर्थविजयः Ms. No : A. 858/1

Beginning :

रमासमाश्लिष्टतनुः स माऽव्या-
दव्यंसदव्याजकृपाकटाक्षः ।
दशोक्षहृच्चामरसाग्रवासो
हरिः दशस्यन्दननन्दनाग्र्यः ॥

End :

वीक्ष्य स्वमन्त + नै सौ तथैव
चित्रं प्राप्तश्चिन्तयंस्तन्महत्वम् ।
नानासम्पच्छाल्यपि प्राप्तधैर्यो
मत्सौख्याशामत्यजीच्छ्रीशचेताः ॥

Colophon :

२१तमपत्रे —
शेषाचार्यसुतः श्रीमत्सङ्कर्षणकृते शुभे ।
जयतीर्थार्यविजये सर्गः प्राथमिकोऽजनि ॥

120

Sl. No : 25856 जयीन्द्रोदयः Ms. No: B. 209

Beginning :

लक्ष्मीपतिर्नारदवाक्यहेतोः
कुतूहलाद्वेङ्कटभूधरेन्द्रम् ।
संप्राप्य भक्तेष्टमना वृषाद्रेः
चकास्ति भद्रं दिशतात्मनो यः ॥
दरवोर्मिकं भूमितनूभवायै ।
+ + + +
ज्ञानं ममासौ हनुमान् गुणाब्धिः ॥

End:

श्रीश्रीनिवासः कृतवान् शुभाय
श्रीमज्जयीन्द्रोदयनाम काव्यम् ॥
तन्नाम्ना तनयेन साधुरचिते काव्ये जयीन्द्रोदये
प्रीत्यै माधवमध्वयोर्विरचितः सर्गश्च षष्ठोऽभवत् ॥

Colophon :

इति श्रीमज्जयीन्द्रोदये षष्ठः सर्गः ॥

121

Sl. No : 25858 टोडरमल्लकाव्यम् Ms. No : P. 4819

Beginning :

श्रीमद्दिव्यसुवर्णरत्नरुचिरस्तम्भैर्महामण्डपैः
व्याप्तानन्तगरुत्मदादिविततां क्रीडासरोभिर्युता ।
आनन्द × × सद्दक्सुरूपविलसन्मुक्तावलीसंयुता
श्रीवैकुण्ठपुरी यथा विजयते भोगीन्द्रशैलस्थली ॥
अहिपतिकुत्किलालयमहिभोजनवाजनं सभाजनभाजम् ।
नतजीवं जीवानां जीवनजैवातृकं तमीडे देवम् ॥

End :

शुष्मा युष्मत्सदनलिनेनम्रो भूताज्ञात सेदिश × × × हव्यं द्विजहुत
सिन्द्रादिभ्यो दत्ते तत्फल मपि तेषां तेषाम् ॥
दित्रीशस्ते चरणसरोजे नामं नामं वसति पुरस्तात् ।
रक्षत्याशां सुचिरमवाचिं भक्तिं धत्ते भवति × ॥

Colophon :

— — —

122

Sl. No: 25861 तीर्थप्रबन्धः Ms. No : C. 1670/1

Beginning :

हरिक्षीराम्बुधेस्स्वैरं भवधर्मरिपोर्मनः ।
विहराहरहश्चित्रचरित्रचतुरोर्मिषु ॥

End :

पद्मानि प्रथितापगाच्युतयशोहृद्यानि ता खण्डिता-
वद्येनामलवादिराजयतिना मस्यो क्तिशुद्धात्मना । (?)
बद्धान्यध्वरसिद्धसत्क्रतुचयोद्रिक्तोरुपुण्यप्रदा-
न्यद्धा यः पठते शृणोति स भवेदुद्दामधामाश्रियः ॥

Colophon :

इति श्रीमद्वादिराजयतिविरचिते तीर्थप्रबन्धे दक्षिणप्रबन्धस्समाप्तः ॥

123

Sl. No : 25862 **तीर्थप्रबन्धव्याख्या** Ms. No : C. 1670/2

Beginning :

तपोविद्याविरक्त्यादिसद्गुणौघाकरानहम् ।
वादिराजगुरून्वन्दे हयग्रीवदयाश्रयान् ॥

हरिक्षीराम्बुधेरिति । हे मनः त्वं स्वस्य विष्णुभक्त्या × नः सदृशसकलविष्णुभक्तमनसां विहरणयोग्यत्वस्यापि लोभेन ग्रन्थस्य साधिकारत्व-सूचनाय चेयं सम्बुद्धिः ।

End :

पद्यानीति ॥ प्रथितापगाच्युतहृद्यानि प्रथितानां पुराणादिप्रसिद्धानां आपगानां नदीनां अच्युतस्य श्रीनारायणस्य च कीर्तिभिर्हृद्यानि मनोहराणि × उद्दामधामा उत्कृष्टवासः भवेत् । जायते ॥ तस्मिन् सर्वसम्पदः सन्निहिताः भवन्ति । + +

तपोविद्याविरक्त्यादिसद्गुणौघाकरानहम् ।
वादिराजगुरून्वन्दे हयग्रीवदयाश्रयान् ॥

Colophon :

इति श्रीमत्कविकुलतिलकवादिराजकृततीर्थप्रबन्धटीकायां लक्ष्मीपतिसूनुना नारायणेन कृतायां दक्षिणप्रबन्धः समाप्तः ॥

124

Sl. No : 25863 **दशरथनन्दनचरितम्** Ms. No : A. 837/1

Beginning :

वीरभुजशाणकोणोत्तेजनजनितप्रगल्भपरभागम् ।
वाल्मीकिवचनमौक्तिकमालारत्नं नतोऽस्मि कपिरत्नम् ॥

प्रणतोऽस्मि गामदुष्टां प्रथमं प्राचेतसेन परिपुष्टाम् ।
यत्पीयूषमशेषाः कवयः पीत्वा प्रयान्ति परितोषम् ॥

End :

विहरतु नन्दकुमारे विहतिविदूरे व्रजाङ्गनाजारे ।
महति श्रुतिततिसारे मनसि मनो मे मनोहराकारे ॥

Colophon :

श्रीमच्चामुण्डिकाचरणसरसिजशेवासमासादित + + +
कृष्णराजकण्ठीरवस्य कृतौ दशरथनन्दनचारित्रे युद्धकाण्डः सपूर्णः ॥

125

Sl. No : 25865 दशावतारपद्धतिः Ms. No : B. 48

Beginning :

ब्रह्माण्डकुम्भपीठस्थं ब्रह्मेन्द्रादिसुरार्चितम् ।
ब्रह्माण्डकारणं नौमि ब्रह्मानन्दसुखास्पदम् ॥

End :

मन्दीभूतसमस्तधर्मनिगमैर्वृद्धिं गते दुष्कृते
कल्यन्ते दनुजांशसम्भवजनाक्रान्ते महीमण्डले ।
पादक्रूरखलाग्रमर्दितबलत्रातस्स भाविप्रभुः
पायान्नः कमलामुखाब्जमधुपो कल्क्यावतारो हरिः ॥

Colophon :

इति दशावतारपद्धतिः ॥

126

Sl. No : 25866 दारुकावनविलासकाव्यम् Ms. No: B. 1045

Beginning :

कविः प्रारीप्सितस्य प्रबन्धस्य निर्विघ्नेन परिसमाप्त्यर्थं प्रबन्धप्रतिपाद्य
देवताकर्तृकमाश्रितात्मकमङ्गलं ग्रन्थतो निबध्नाति श्रीमदिति ॥
श्रीमद्रौप्यगिरौ शिवातनुरयं भद्रासने सुस्थितं
पायाद्योषितया समं गिरिजया बालेन्दुचूडामणिः ।
लोकान् श्रीकरवीक्षणैरनुदिनं छन्दोमयः शङ्करः
साक्षी सर्वजगत्पतिः पदनतब्रह्मेन्द्रमुख्यामरः ॥

End :

समुवाच—

श्रीगुरुरत्नकविताहंस सुजनवदनकमल रे ।

विहरतु सततं पादविलासैः जनयतु मोदं शङ्करे ॥

समुवाचताम्—

रतिमन्दिरे पशुपतिरधिवसतीन्दिरे । अष्टपदी ।

Colophon :

इति दारुकावनविलासे श्रीरत्नआराध्यगुरुकृतौ महाकाव्ये + दिगम्बरो नाम द्वादशः सर्गः ॥

127

Sl. No : 25867 **दिव्यसूरिचरितम्** Ms. No : P. 1111

Beginning :

प्रभार्काविव संपृक्तौ भवभीतिनिवृत्तये ।

रक्षितारौ त्रिजगतां लक्ष्मीनारायणौ भजे ॥

क्व दिव्यसूरिचरितं क्व च मे मन्दशेमुषी ।

नियन्तुकामोऽस्मि गजं साहसात् बिसतन्तुना ॥

End :

इत्याशास्य सरश्शठान्तकमुखश्रीदिव्यसूक्त्याकृतीः

अर्चा स्वस्य च तत्प्रबन्धनिवहैः सार्धं प्रतिष्ठाप्य सः ।

श्रीरङ्गादिमधामसु स्वयमभूच्छ्रीदिव्यसूरिप्रजैः

तैस्साकं परमं पदं जिगमिषू रामानुजाख्यो मुनिः ॥

Colophon :

इति श्रीकाश्यपकुलतिलकस्य रङ्गाधिपारोग्यशालावल्लभस्य कविवैद्यपुरन्दर नामधेयस्य गरुडवाहनपण्डितस्य कृतौ दिव्यसूरिचरिते महाकाव्ये अष्टादशः सर्गः ॥

128

Sl. No : 25871 **दुर्गतिपञ्चाशत्** Ms. No : P. 932/4

Beginning :

मात्राव्यञ्जनबिन्दुहीनकमहो कर्तृक्रियावञ्चनं

नानालापि कथापि + + मनिशं व्याधत्त निस्सङ्ख्यकम् ।

विंशत्यर्थविशेषपद्यमपि यस्सच्चित्रबन्धं पुनः

सोऽस्माकं कविताविधिं वितरतु श्रीरङ्गनारायणः ॥

End :

एतत्पण्यवदाचरेयमियता हा कौशलं कीर्तये

स्वस्यैवं × याशु मूढमपि मां × ठते केवलम् ।

आज्ञादुर्ललितं स्वभावपरुषं दुर्मानिनं पत्रिणां

मत्तं स्त्रैणमपायनं परधनप्रीतं पुरोभागिनम् ।

पापिष्ठं परनिन्दमुन्नतशिरं × कृतघ्नं खलं

त्वत्कारुण्यतरङ्गितार्थिवलनैः लक्ष्मीपते रक्ष माम् ॥

Colophon :

इति श्री वृत्तमणि श्रीरङ्गाधिराजगुरुकुमारस्य + श्रीरङ्गनारायण गुरोस्तनूजेन श्रीनिवासेन व्याहारितेयं दुर्गतिपञ्चाशत् ॥

129

Sl. No : 25874 धन्यकुमारचरितम् Ms. No : P· 1119

Beginning :

नमः श्रीवर्धमानाय पञ्चकल्याणभागिने ।

जिनाय विश्वनाथाय मुक्तिभर्त्रे गुणाब्धये ॥

चरित्रं पावनं धन्यकुमारस्य शुभावहम् ॥

End :

सर्वे तिर्थकरा जगत्रयहिताः सिद्धा अनन्ता विदः

पञ्चाचारपरायणाश्च गणिनः सत्पाठकाः साधवः ।

सम्यक्त्वादिसुखाधिकावरतपोयुक्ताश्च वन्द्यास्सुताः

अग्योवृक्ष्च ममादिशन्तु विशदं सन्मङ्गलं मेऽत्र वा ॥

भवेयुः श्रीमतो धन्यकुमाराख्यस्य योगिनः ।

चरित्रस्याखिलाः श्लोकाः सार्धाष्टशतसंख्यकाः ॥

Colophon :

इति धन्यकुमारचरित्रे श्रीसकलकीर्तिविरचिते धन्यकुमारमुनिसमर्थसिद्धिगमनवर्णनं नाम सप्तमाधिकारः ॥

130

Sl. No : 25875 — धर्मशर्माभ्युदयम् — Ms. No: P. 9280

Beginning :

श्रीमद्धर्मजिनेन्द्रस्य महाकाव्यं सकौतुकम् ।
संपूर्णानेन तत्तं च (?) पठितुं लिख्यते मया ॥
एतत्काव्यस्य धर्मशर्माभ्युदयमिति नाम ।
श्रीनाभिसूनेश्चिरमंघ्रियुग्म-
नखेन्दवः कौमुदमेधयन्तु ।
यत्रानमन्नाकिनरेन्द्रचक्र-
चूडाश्मगर्भप्रतिबिम्बमेणः ॥

End :

इत्थं वारिविहारकेलिगलितश्रोणीदुकूलाञ्चलाः
प्रेक्ष्यैताः परयोषितः सुकृ × धुर्यो जगद्बान्धवः ।
तद्दोषापचयप्रमार्जनविधौ रक्ताशयः सांशुको-
प्यब्धिं सातुविवापरं (?) दिनमणिस्तत्कालमेवागमत् ॥

Colophon :

इति महाकविश्रीहरिचन्द्रसूरिविरचिते धर्मशर्माभ्युदये महाकाव्ये जल-
विहारवर्णनो नाम त्रयोदशः सर्गः ॥

131

Sl No : 25876 — धर्माशर्माभ्युदयम् — Ms. No : P. 10733

Beginning :

नोचेदिति च आक्षेपवचनम् । चेद्यदि नैतत्पूर्वोक्तं घटत इत्यनुमानेन द्रढयन्नाह — कथं केनप्रकारेण तर्हि तत् इन्दुकुटुम्बं चन्द्रगोत्रं आसीदभवत् इदं हि लग्नं तत्पादप्रणतितत्परं नखच्छलादुद्वृत्तकान्तिमन्नखव्याजात् ।

End :

अभ्युदयदिति — अथानन्तरं भगवान् मोक्षलक्ष्मीमयं शिश्राय । किंविशिष्टः। हरिचन्द्राराधितः शक्रशशिसेवितः कैः वाक्यप्रसूनोपचारैः स्तुतिभिरष्टविधपूजाभिश्च तदनु पश्चात् तदनुयायी तत्सेवातत्परः सन्,

कृतिनिर्वाणकल्याणमहोत्सवोपार्जितपुण्यराशिर्निजं निजं स्थानं चतुर्णिकायाम-रसङ्घातो जगाम ॥

Colophon :

इति श्रीमन्मण्डलाचार्यललितकीर्तिशिष्यपण्डितश्रीयशःकीर्तिविरचितायां सन्देहध्वान्तदीपिकायां धर्मशर्माभ्युदयटीकायामेकविंशतितमः सर्गः ॥

132

Sl. No : 25880 नलायनकाव्यम् Ms. No : A. 639

Beginning :

जयति जयदेवः केवलज्ञानमूर्तिः
मदमदनविजेता शाश्वतो वीतरागः ।
यतिकुमुदशुभ्रा भारती सूरिभावा
जयति कविकुलानां कोमलो वाक्प्रपञ्चः ॥ + .
नित्यं मङ्गलमातनोतु भवतां राजा नलो नैषधः ॥

End :

उत्पत्तिदौत्यवरविड्वरशीलसूचा
संयोगराज्यभवनिर्वणाभिधेयाः ।
स्कन्धा भवन्ति दश यस्य नलायनस्य
पूर्णं तदेतदधुना धनदप्रसादात् ॥

Colophon :

इति नलायने निर्वहणस्कन्धे चतुर्थः सर्गः । समाप्तं नलायनं नाम कुबेरपुराणम् ॥

133

Sl. No : 25881 नलोदयकाव्यम् Ms. No : P. 4611/1

Beginning :

हृदयसहायादवतः पापाटव्या दुरासदायादवतः ।
अरिसमुदायादवतः त्रिजगन्मागाः स्मरेण दायादवतः ॥
यो जनिना गोपीतश्चचार यो वल्लवाङ्गनागोपीतः ।
तूर्येनागोपीतः कंसाद्यो द्वेषमेव नागोपीतः ॥

End :

नलेन पूर्यतायतायतायतायता चिशय च ।
सदायमुन्ममामहामहामहास्त्रसम्पदम् ॥

Colophon :

इति नलोदये चतुर्थाश्वासः ॥

134

Sl. No : 25898 नागकुमारकाव्यम् **Ms. No : B. 113**

Beginning :

श्रीनेमिजिनमानम्य सर्वसत्त्वहितप्रदम् ।
वक्ष्ये नागकुमारस्य चरितं दुरितापहम् ॥
कविभिर्जयदेवाद्यैः गद्यैः पद्यैर्विनिर्मितम् ।
यत्तदेवास्तिचेदत्र विषमं मन्दमेधसाम् ॥

End :

श्रुत्वा नागकुमारचरितं श्रीगौतमेनोदितम्
भव्यानां सुखदायकं भवहरं पुण्याश्रवोत्पादकम् ।
नत्वा तं मगधाधिपो गणधरं भक्त्या पुरं प्रागमत्
श्रीमद्राजगृहं पुरन्दरपुराकारं विभूत्या समम् ॥

Colophon :

इत्युभयकविचक्रवर्तिश्रीमल्लिषेणसूरिविरचितायां नागकुमारपञ्चमीकथायां पञ्चमः सर्गः ॥ नागकुमारचरितं समाप्तम् ॥

135

Sl. No : 25900 निसर्गमधुरकाव्यम् **Ms. No : B. 981**

Beginning :

वचनतो मधुरामृजुमर्थतः
श्रुतिसतीमुपयन्प्रकृतिस्त्रियाम् ।
नखमुखोल्लसनैरुतिमेति यः
समहमाकलये पुरुषं हृदि ॥

श्रियमुदार तमभिय
स्वयमुद्दारमुतः प्रतनः पुमान् ।
उपळ जीवननिचधिशेषणा
प्रथितदिव्यनरेन्द्रपदान्तनः ॥ (?)

End :

सुरसम्भवप्रमदमन्धरो
वपामृदुलो मरून्मरुस्तुतिः ।
स्वसखात्मजातपरितोषवर्धिता:
प्रचकाशिरेऽग्नि निचया × ॥
सुतसंभवः × ×

Colophon :

इति श्रीसीतारामकविकृतौ निसर्गमधुरे प्रथमस्सर्गः ॥

136

Sl. No : 25940 नैषधम् Ms. No : C. 1063/1

Beginning :

निपीय यस्य क्षितिरक्षणः कथां
तथाऽऽद्रियन्ते न बुधाः सुधामपि ।
नळः सितच्छत्रितकीर्तिमण्डलः
स आविरासीन्महसां महोज्वलः ॥

End :

श्रीहर्षं कविराजराजिमकुटालङ्कारहीरस्सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वाविंशो नवसाहसाङ्कचरीते चं × कृतोऽयं गतः
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्वलः ॥
यं प्रासूत + + + नीराजितोऽभूत् ॥

Colophon :

इति श्रीनैषधीये महाकाव्ये द्वाविंशः सर्गः समासः ॥

137

Sl. No : 25956 नैषधव्याख्या Ms. No : C. 1063/2

Beginning :

पारं प्रबन्धाम्बुनिधेः प्रयातं
यत्नः किल स्वान्ततवैष हन्त ।
निःश्वासलीलाविहतान्तराये
हेरम्बमालं वनमाश्रयेथाः ॥

× × × अत एव रसवत्त्वातिशयेन निपीयेत्युक्तिः । निपीयेति ॥

End :

द्वाविंशतेः पूरणः द्वाविंशः . . . तस्य नलीयं चरितं यस्मिन् काव्ये तस्मिन् ।

यं प्रासूत त्रिलिङ्गक्षितिपतिसततारधितांघ्रिस्स्वयम्भूः
पातिव्रत्यैकसीमा स कविनरहरिं नालमायच्च माता ।
यं विद्यारण्ययोगी कलयति कृपया तत्कृतौ दीपिकायां
द्वाविंशश्चारुसर्गः × यशोधामनीराजितोऽभूत् ॥

Colophon :

इति श्री नैषधीयमहाकाव्ये द्वाविंशः सर्गः समाप्तः ।
एतत्कृतं काव्यं विदग्धैरादतस्स्वात् . . . समाप्तम् ॥
श्लोकसंख्या २४२५६ ॥

138

Sl. No : 25961 नैषधव्याख्या Ms. No : C. 4071/2

Beginning :

इदनीं इन्द्रादिपञ्चनलीसंज्ञं त्रयोदशं सर्गमारभते । कल्पद्रुमेति । अथ विमानधुर्याः शिविकावाहिनः तां भैमीं राजकाद्राजसमूहात् अपगमय्य निवर्त्य ॥

End :

श्रीहर्षमिति । क्रमोत्तरेण अतिभूयसा रसेन स्वादौ अमृतरूपे नलीयचरिते पञ्चाधिकानां दशानां पूरणः पञ्चदशः । स्वादाविति भाषितपुंस्कम् ॥

Colophon :

इति श्रीवेदरकरोपनाम श्रीमन्नरसिंहपण्डितात्मजनारायणकृतौ नैषधीय प्रकाशे पञ्चदशः सर्गः ॥

139

Sl. No : 25968 नैषधव्याख्या Ms. No : P. 2140/2

Beginning :

निपीयेति —

बृन्दारका यत्र भवन्ति भृङ्गाः
मन्दाकिनी यन्मकरन्दबिन्दुः ।
तवारविन्दाक्ष पदारविन्दं
वन्दे चतुर्वर्गचतुष्पदं तत् ॥
आलम्बे जगदालम्बं लम्बोदरपदाम्बुजम् ।
शुष्यन्ति यद्रजःस्पर्शात् सद्यः प्रत्यूहवार्धयः ॥

End :

वैन्यः पृथुः । तद्वत् तेन तुल्यंक्रिया चेद्वतिः । प्रत्याहृतोऽपि स्मर्यमाणो ऽपि अभीष्टदः इष्टार्थप्रदः तम् । स्वगमनस्य— स्वयात्रायाः । अफलतां— वैफल्यम् ॥

Colophon :

इति पदवाक्यप्रमाणपारवारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरि विरचिते नैषधव्याख्याने जीवातुसमाख्याने तृतीयः सर्गः ॥

140

Sl. No : 25992 नैषधव्याख्या Ms. No: P. 145/2

Beginning :

रङ्गद्भङ्गितरङ्गक्रमकलितमहावक्रनक्रप्रसङ्गः
शृङ्गारश्रीश्रिताङ्गः प्रतिपदविलसत्तर्कसत्कर्कटौघः ।

नानासद्व्यक्तिशुक्तिः ध्वनिरसभरितानूनसच्छब्दरत्नः
श्री श्रीहर्षौक्तिवार्धिः न वितरति मुदं कस्य वाशस्यवेधः ॥

द्रुतविलम्बितमाह नभोभराविति लक्षितेन द्रुतविलम्बितवृत्तेन चतुर्थसर्गः उपक्रमते। तत्र सर्गेऽस्मिन् + विप्रलम्भरस एव निर्वर्ण्यते । अथेति ॥

End :

श्रीहर्षमिति । नवसाहसाङ्कस्य नूतनविक्रमादित्यस्य परिणयानन्दे विवाह सन्तोषनिषेक एवोत्सवो यस्मिन् । प्राप्ता सहस्रधारस्य कलशस्य श्रीः शोभा येन स तादृशः । कृतौ नलीयचरिते महाकाव्ये निसर्गोज्वलोऽयं द्वादशः सर्गो गतः समाप्तः ॥

श्रीहर्षात् कविराजतः कृतिरभूत् सा कापि लोकोत्तरा
यस्याश्लि × भूर्मनीषिहृदयप्रासादशृङ्गस्थली ।
नैषध्यस्य विधिर्न पार्थघटनासख्यो × ×
× × शब्दनयं वरपतिश्चैषस्वयं नैषधः ॥

Colophon :

इत्याचार्यविश्वेश्वरसूरिविरचितायां नैषधचरितटीकायां पदवाक्यार्थ पञ्चिकायां द्वाविंशः सर्गः ॥

141

Sl. No : 25997 **नैषधव्याख्या** **Ms. No: P. 1776**

Beginning :

× यं प्रामूत वसिष्ठवंशतिलकश्रीप्र × नारायणा-
चार्यः श्रीकविराजकेशव × योद्भूता भवानी च यम् ।
× तेन विरच्यतेष्टसुधिया सर्वज्ञसंज्ञाजुषा
टीका कामदुधा × नल × न्याश्रयव्यञ्जिनी ॥

श्रीमु × मल्लिनाथपुरोद्भवश्चकास्ति कविराजोयं प्राज्ञस्सर्वज्ञमाधवः । शक्तः प्रणेतुं × ×

+ आसीद्राजा नलो नाम विरसेनसुतो बली इत्यादिना सन्दर्भेण श्रीमहा भारत × नलस्यैव ख्यापितत्वात् + ॥ निपीयेति ॥

End :

चम्पकमालाभिः कृता रज्जुः ×

× प्रीतया वरं गुरुच्या कञ्चुकितश्चकास्तु यथा ।

स मेरुशिखया मेरुश्रृङ्गेणालिङ्गितं ×

Colophon :

प्रथमसर्गसमापनवाक्यं यथा— इति श्रीमद्वसिष्ठकुलतिलक कविराजप्राज्ञ सर्वज्ञमाधवकृते कामधेनुनाम्नि नैषधकाव्यव्याख्यानिबन्धने प्रथमस्सर्गः ॥

142

Sl. No : 26005 पञ्चार्थानुसन्धानकाव्यम् Ms. No: P. 5131

Beginning :

श्रीमानर्हत्पुरुतिरतदयं श्रीश्रितोरोवरोच्यं

सम्यग्धर्मामृतरसभरं भव्यसस्यावलीषु ।

प्रावर्षद्यः शुभरसघनः कुन्थुनाथः स शान्तिः

स श्रेयोभां श्रियमुरुतमां सन्मतिर्वो विधेयात् ॥

End :

भूयो भक्त्या सपदि च भुवि तत्प्राप्तिमोक्षान्तकाले

मायाकारं परमलयजाद्यैस्तदङ्गप्रमाङ्गम् ।

संसंस्कृत्यामृतशुभमिहाधाय धन्या बुधेन्द्राः

स्वं स्वं स्तुत्वा पदमगुरपीतीद्धसिद्धे नमस्ते ॥

× × परमानन्दकरणस्वरूपे ॥

Colophon :

स्वस्ति श्रीदाक्षिणात्यकविचक्रवर्ति + श्रीशान्तराजसमानन्दित-पञ्चार्थानुसन्धान + पुण्यतमदिव्यकाव्ये + षोडशोल्लासः ॥

143

Sl. No : 26009 पादरेणुसहस्रम् Ms. No : A. 208/1

Beginning :

श्रीपादाब्जरजो विष्णोः तनोत्वाश्रितमङ्गलम् ।

अनन्यकामा यत् प्राप्तं तेपे मङ्गलदेवता ॥

सुहृदांश्चरणेषु विद्विषोऽग्रे + +

अपृथक्सिद्धविशेषणत्वभाजः ॥

End :

पुण्यैनैव फलोन्मुखेन निखिला रक्षन्ति देवाश्रितं
त्वं नैतत्करणे करोषि करुणामात्रेण पापात्मनः ।
× × × × ×
तद्वद्दिष्टपचक्षुषः किमु भवेत् शेषाद्रिराट्पद्रजः ॥

Colophon :

— — —

144

Sl. No : 26010 पादरेणुसहस्रव्याख्या Ms. No : A; 208/2

Beginning :

श्रीपादेति विशेषणभेदव्यपदेशाभ्यां च नेतरौ इति सूत्रवाक्यार्थः। कस्मिन् भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति एकविज्ञानेन सर्वविज्ञानप्रश्न–

End :

तत्वमेको महायोगी हरिर्नारायणः परः इति वेदव्यासभगवच्छ्रीसूक्ति रनुसृता । एवं वेङ्कटदशकं गाथाव्याख्यातम् ॥

Colophon :

इति श्रीमदाचार्यनिष्ठायां सुदर्शनदासलिखितायां प्रथमं प्रकरणम् ॥

145

Sl. No : 26016 पद्मनाभोदयः Ms. No : P. 3699/1

Beginning :

कथा यदीयाऽमृतवर्तिकेव
प्रसादयत्यात्मविबोधदृष्टम् ।
यदिन्दिराकेळिरसैकलोलं
तेजस्तदीडे परमब्जनाभम् ॥
यत्पादपाथोजमरन्दभाजां
भूयो न मातुर्जठरे निवासः ।
आत्मानुभूतेरविशेषरूपां
वन्दे भवानीं करुणारसार्द्राम् ॥

End :

देवः श्रीमान् पद्मनाभोऽपि नित्यं
भक्तान् रक्षन् शेषशय्याशयानः ।
जागर्ति श्रीभूमिनीलासमेतः
वञ्चीन्द्राणां क्षेमकारी च भूयः ॥
श्रीमान् मार्ताण्डभूपो जयतु बुधजनानन्दकारी नितान्तं
काव्यं चेदं मदीयं कलितहरिकथासारवत्त्वात्सुधीन्द्राः ।
शृण्वन्त्वा चन्द्रतारं भवतु च धरणौ वञ्चिवंशोऽतिदीर्घः
ब्रह्मानन्दामृताब्धौ मम हृदयमिदं मज्जतां निर्विशेषम् ॥

Colophon :

— — — —

146

Sl. No : 26017 पद्मनाभोदयव्याख्या Ms. No : P. 3699/2

Beginning :

यमिह देवमनन्यतया भजन्
न पुनरेव भवं प्रतिपद्यते ।
निजसुखामृततृप्तमसौ जनः
तमहमीश्वरमादिममाश्रये ॥
कश्चित्कविः केन चिदादरेण
श्रीपद्मनाभोदयमेव काव्यम् ।
चकार तस्यास्य करोति टीकां
सदा रतिर्मे भगवत्यतस्स्यात् ॥
इह खलु कश्चित्कविः + अनुबन्धचतुष्टयमप्यर्थात्सूचयति– कश्चेति ॥

End :

तथाचोक्तं भागवते—
स्वस्त्यस्तु विश्वस्य खलः प्रसीदतात् + ।
कालं कश्चित भ्रमित्वा पुनरपि मनुते स्वप्नवद्बोधतोऽदो-
वन्देऽहं स्वानुभूतिप्रहतगुणमलं विष्णुमाकाररूपम् ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीमद्ब्रह्मानन्द यतीश्वरचरणारविन्दनिष्यन्द मानमकरन्दपानतृप्तस्वान्तेन शोणप्राकारपुरवासिना कृष्णेन विरचितेयं पद्मनाभोदयनामकस्य काव्यस्य टीका समाप्ता ।।

(वेदान्त + + रजोभ्य: ॥)

147

Sl. No : 26018 पद्यचूडामणिः Ms. No : P. 2837

Beginning :

कारुण्यवल्लोलितदृष्टिपातं
कन्दर्पदर्पानलकालमेघम् ।
कैवल्यकल्पद्रुममूलकन्दं
वन्दे महः कन्दलमर्कबन्धुम् ॥

End :

× स्थितां स बोधिप्रमदां
निवेश्य सुदृशं श्रीबोधिमूले परम् ।
सिद्धार्थश्चिरवासनापरिगतानुच्छिद्य दोषद्विषो
मुक्तिक्षेत्रकुटुम्बरक्षणविधौ मूर्धाभिषिक्तोऽभवत् ।।

Colophon :

इति बुद्धघोषाचार्यविरचिते पद्यचूडामणिनाम्नि महाकाव्ये सिद्धार्थचरिते दशमः सर्गः ।।

147

Sl. No: 26022 पारिजातहरणम् Ms. No : P. 3211/1

Beginning :

वन्दे धामा—तं दधन्तं पुरुषोत्तमं त्रिधामानं तम् ।
सुधामानं तं दैत्यानां दैत्यानां व्यधाद्युधामानं तम् ।
गौः सह राजतानि प्राणिष्वपयानि बहुधराजतानि ।
येन सुराजतानि श्रमालधारिश्च तेषु राजतानि ॥

End :

निजे पदे सनन्दकः सुनन्दनन्दनन्दनः ।
तरुश्रियास्तनन्दनो ननन्द नन्दनन्दनः ॥

Colophon :

इति श्रीवेदव्यासप्रियशिष्य श्रीमदानन्दतीर्थभगवत्पादाचार्यशिष्यश्रीमत्त्रिविक्रमपण्डिताचार्यसुत श्रीनारायणपण्डिताचार्यविरचिते पारिजातहरणे तृतीया. श्वासः । समाप्तोऽयं ग्रन्थः ॥

149

Sl. No : 26025 पार्श्वाभ्युदयकाव्यव्याख्या Ms. No : B. 213

Beginning :

श्रियं विदध्याद्विमलां सतां स
श्रीपार्श्वनाथो नतसेन्द्रनाथः ।
यद्देहमावेष्ट्य रराज भोगी
क्षणप्रभे वासितनीरवाहे ॥
जिनसेनमुनीशेन कृतस्य कविवेधसा ।
पार्श्वाभ्युदयकाव्यस्य टीकां वक्ष्ये स्वशक्तितः ॥

End:

मुनीश्वरस्तेन । परिवेष्टितमेघदूतं । परिवेष्टितमाकलितम् । मेघदूतं तन्नाम काव्यं येन तत्तथोक्तं । काव्यं एतत्पार्श्वाभ्युदयसंज्ञं काव्यं । व्यधायि अकारि ॥

Colophon :

इत्यमोघवर्षपरमेश्वरपरमगुरु श्रीजिनसेनाचार्यविरचित मेघदूतवेष्टितवेष्टिते पार्श्वाभ्युदये तद्व्याख्यायां च सुबोधिकाख्यायां भगवत्कैवल्यवर्णनं नाम चतुर्थः सर्गः ॥

150

Sl. No : 26026 पूर्णबोधगुरुवंशकथाकल्पतरुः Ms. No : C. 2335

Beginning :

भविष्यति × पश्चाद्गन्ता भवाम्यहम् ।
इत्थं पुत्रवचः श्रुत्वा सन्तु × तरावुभौ ॥
कालान्तरे परः पुत्रो भवत्पूर्वोक्तवत्त्वयोः ।
अतः स वासुदेवस्तौ हित्वैकादशवार्षिकः ॥

End :

तदीयहृदयाम्भोजवासिनौ मध्वराघवौ ।
भवतः परमप्रीतौ स्वत एव न संशयः ॥
द्विजः पठन् वेदविदां वरिष्ठः
क्षोणीपतित्वं नृपवंशजातः ।
वैश्यो धनी पादभवो महत्त्वं
पुमर्थपूगा निखिला भवेयुः ॥

Colophon :

इति श्रीमद्वेणुपल्ली श्रीनिवासाचार्यात्मज वेङ्कटाचार्यपादपद्माराधक बाहुपल्ली कृष्णाचार्यान्तेवासि दैवज्ञभीम विरचिते पूर्णबोधगुरुवंशकथाकल्पतरौ सत्य बोध श्रीपाद श्रीनिवासकथावर्णनं नाम त्रयस्त्रिंशच्छाखासर्गः ॥

151

Sl. No : 26029 प्रपन्नपारिजातम् Ms. No : P. 3658/5

Beginning :

वन्देहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः संजीवयति मामपि ॥
आचार्यार्यमपादेभ्यो नमस्यामस्ततिं दधे ।
यदासंगवशात्पुंसां मनःपद्मं प्रबुध्यते ॥
अमंगुरुकलादान + + लक्ष्मीचक्षुः— ॥

End :

अशेषापेक्षितं यत्र परितो जायते सताम् ।
प्रपन्नपारिजाताख्यः प्रबन्धः कथितो भुवि ॥
प्रपन्नपारिजातेऽस्मिन् वरदाचार्यनिर्मिते ।
संख्या जयति पद्यानां शतोत्तरचतुश्शतम् ।

Colophon:

इति फलोदयपद्धतिः दशमी ॥

152

Sl No : 26033 प्रपन्नामृतम् Ms No : P. 2991

Beginning :

मिथ्यावादिमदान्धसिन्धुरघटासंरम्भकुम्भस्थली
निर्भेदोद्भवसूक्तिमौक्तिकमणिश्शुभ्रीकृताभ्रस्थलिः ।
सत्तर्कस्फुरदत्युदग्रनखरो वेदान्तशैलाश्रितः
श्रीरामानुजकेसरी विजयते प्रोद्दण्डविक्रीडितः ॥
नाधीतानि च शास्त्राणि न कृतं गुरुपूजनम् ।
वक्ष्यामि कृपया विष्णोः अनुगृह्णन्तु देशिकाः ॥
+ + अस्ति वैकुण्ठनगरं सर्वलोकेषु विश्रुतम् ।
नित्यैर्मुक्तैस्सेव्यमानं विष्णोः प्रीतिकरं शुभम् ॥

End :

गोविन्दपादसरसीरुहषट्पदाय
रामानुजार्यकरुणामृतवर्धिताय ।
कूरेशवंशतिलकाय महात्मकाय
श्रीभट्टदेशिकवराय नमो नमस्ते ॥

Colophon :

इति श्रीप्रपन्नामृते रामानुजचरित्रे भट्टार्यवेदान्तिसंवादे रामानुजार्यदिव्याव
तारकथनं नाम पञ्चदशशततमोऽध्यायः ॥
प्रपान्नामृतं सम्पूर्णम् ॥

Extra Information :

ग्रन्थसमाप्त्यनन्तरं ग्रन्थकर्तुः स्वनामसङ्कीर्तनपरमिदं पद्यं यथा—
श्रीशैलरङ्गेशगुरूत्तमस्य
शिष्यो महान् कश्चिदनन्तसूरिः ।
ग्रन्थं प्रपन्नामृतनामधेयं
चकार रङ्गेशकटाक्षलेशात् ॥

153

Sl. No: 26035 | प्रभुलीला | Ms. No A: . ४६8

Beginning :

श्रीकण्ठः परमानन्दमूर्तिरद्रिसुतः पतिः ।
योऽस्ति त्रिदेवताजन्महेतुस्तं नौमि शङ्करम् ॥ +
प्राच्योऽद्य वर्तिनश्शम्भुसद्भक्तान् भाविनश्शिवान् ।
सम्भाव्य स्वान्तपद्मेऽहं रचयाम्युत्तमां कृतिम् ॥ +
तादृग्योगिजनप्रेमा प्रभुनामा महेशिका ।
चकाशेऽद्वयशास्सोमभास्वदग्निविलोचनः ॥

End :

यत्कुक्षौ वसति समस्तमन्त्रमाला
यन्मूर्तिर्भवति शिवातिशातशाला ।
तां वन्दे निरुपमितां निरुत्तराङ्गीं
ह्रीश्रीलक्ष्म्युपगतनामधेययुक्ताम् ॥

Colophon :

इति श्रीपरमगुरुशिवलिङ्गप्रसादितप्रसन्नहृदयगुरुसिद्धशिवयोगीन्द्रभक्ति विरचिते प्रभुलीलाख्ये महाकाव्ये कुसुमवाटयनिमिषदर्शनगोग्गयबोधप्रभुपन्नता वर्णनं नाम अष्टमस्सर्गः ॥

154

Sl. No : 26036 | प्रश्नाभिन्नोत्तररत्नमालिका | Ms. No : A 478/5

Beginning :

कंसंजघान कृष्णः काशीतलवाहिनीगङ्गा ।
केदारपोषणरताः कम्बलवन्तं न बाधते शीतम् ॥
यास्याद्विशेषगुणिका
सकलैः देशाधिपैश्च दिक्पतिभिः ।
तां श्रीनिवासकविरथ
प्रश्नाभिन्नोत्तरावलीं भणति ॥

End :

श्रीनिवासकविसार्वभौमवाक्
सर्वभूमिविजिता जयत्यसौ ।
यत्र् समं फणितुमुत्तरावलिं
नामराश्च पटवः क्व पामराः ॥

Colophon :

इति प्रश्नाभिन्नोत्तरावलिः समाप्ता ॥

155

Sl. No : 26041 प्रश्नाभिन्नोत्तररत्नमालिकाव्याख्या Ms. No : A. 706/7

Beginning :

वाग्देव्याः पादयुगलं ध्यात्वा वङ्गाख्यसूरिणा ।
सुलभा क्रियते व्याख्या प्रश्नाभिन्नोत्तरावलेः ॥

श्रीमत्यमरसिंहभूपतौ चोलराष्ट्रमनुशासति सति विद्वन्मण्डनायमानेन पञ्चनदक्षेत्रवासिना भाष्यकुप्पाभिधानसूरिणा × श्रीनिवास महाकविः + कृतिमद्भुतां रचयति स्म ॥

End:

उत्तरावलिं उत्तरपरम्परां यत्समं येन सदृशं यथा तथा फणन्तु न पटवः न समर्थाः । ये वसन्ति पामराः क्व प्राकृतजनाः तस्यां धुरीत्यर्थः । काव्यर्थापत्तिरलङ्कारः । कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते इति लक्षणात् ॥

Colophon :

इति प्रश्नाभिन्नोत्तरावलिव्याख्या सम्पूर्णा ॥

156

Sl. No : 26046 प्रश्नोत्तरश्लोकद्वयम् Ms. No : A. 339/1

Beginning :

कान्तां निनाय गहनं वद राम भद्रः
कामं ददाह स पुरा कसुमासहायः ॥

का पूः परन्तु भुवने सुजनैरगम्या
का गीर्बुधेन विदुषां परिषद्यवाच्या ।

End :

कं नाभिपद्ममुकुले जनयत्युपेन्द्रः
कं कं वने रघुवरः कृपयोद्दधार ॥
कं दर्पवन्तमबला कुरुते स्वनिघ्नं
कं पान्ति भूरि पथिका भुवने तृडार्ताः ॥

Colophon :

— — — —

157

Sl: No : 26051 बालकृष्णायनम् Ms. No : P. 9556/5

Beginning :

पार्थसारथिमानम्य लक्ष्मीं तस्य च वल्लभाम् ।
गुरूणां कृपया कृष्णकथा संक्षिप्यते मया ॥
पुरा प्रायोपविष्टेन विष्णुपद्यां परीक्षिता ।
पृष्टः कृष्णकथां पुण्यां प्रहृष्टः प्राह वै शुकः ॥

End :

इत्थं हरेर्भगवतो रुचिरावतारं
वीर्याणि बाल्यचरितानि च शन्तमानि ।
अन्यत्र चेह च श्रुतानि गृणान् मनुष्यः
भक्तिं परां परमहं सुगतौ लभेत ॥

Colophon :

इति श्रीभाष्यश्रीनिवासार्यविरचितबालकृष्णायनं सम्पूर्णम् ॥

158

S. No : 26053 बालभारतम् Ms. No : C. 230

Beginning ;

अस्त्यत्रिनेत्रप्रभवः कलात्मा
शशीति नक्षत्रगणस्य नाथः ।

यं निजश्रीवरमाप्तवाचो
वामं हरेर्लोचनमामनन्ति ॥
न जाह्नवीयैर्नच यामुनैश्च
न चापरासां सरितां पयोभिः ।
यस्योदयेनैन सुजातसाम्नो
बहीयसीमृद्धिमुपैति वार्धिः ॥

End :

नृपाय कल्पद्रुमपुष्पगन्ध-
मुपानय त्वं गमयाम्बभूव ।
पश्चाल्यथ × धृतै × कर्णादिभिर्भ्रातृभिः
स्वयमागतैरभिष्टुतयशा दिव्यैश्च तैर्बन्धुभिः ।
सिद्धा दिग्गजदानगन्धपयसि त्यक्त्वा वपुर्मानुषं
× × स विदधे धर्माणि धर्माकृतिः ॥

Colophon :

इत्यगस्त्यकृतौ बालभारते विंशः सर्गः ॥

159

Sl. No : 26062 बालभारतव्याख्या Ms. No : P. 2295

Beginning :

वन्देमहि महीयांसं अंसलम्बिजटाभरम् ।
यत्कङ्कणझणत्काररवश्शब्दानुशासनम् ॥
बालभारतकाव्यस्य टीकां सर्वमनोहराम् ।
साळ्वतिम्मचमूनाथो विधत्ते विदुषां मुदे ॥
इह खलु पदवाक्यप्रमाणज्ञस्तत्रभगवान् अगस्त्यपण्डितनामा महाकविः बालभारताख्यं काव्यं चिकीर्षुः मङ्गलमादौ निबध्नाति अस्तीत्यादि ॥

End :

विधेर्लिङ् । पृथ्वीवृत्तम् । जसौ जसयलायपुगृहयतिश्च पृथ्वी गुरुः इति लक्षणात् ॥

Colophon :

इति श्रीमद्राजाधिराजराजपरमेश्वर कर्णाटकेश्वर श्रीबुक्करायशूरप्रधान सकलागमपारावारपारीणश्रीसाल्वतिम्मणदण्डनाथविरचितायां बालभारत व्याख्यायां मनोहराख्यायां चतुर्दशस्सर्गः ।।

160

Sl. No : 26064 | **बालहरिवंशः** | **Ms. No : P· 3082/1**

Beginning :

श्रीनाभिरूप्यातिशयस्य धाम्नि
चित्रार्पितेवोरसि यस्य भाति ।
श्रेयांसि भूयांसि ममातनोतु
श्रीवत्सलक्ष्म्याश्रितवत्सलस्सः ।। +
हरेरपारः क्व नु नाम वंशो
मतिर्मदीयः क्व नु चातिमन्दा ।
अथापि तं वर्णयितुं प्रवृत्ते
हरिस्मृतेरेव विचित्रशक्तिः ।।

End :

अपि दयति कवीनां वाक्प्रसूना × हाराः
कति कति × × सुकुमार × पहाराः ।
उ × भवतु तेषामेव काव्योपहारो
मयि च भवतु भूयांस्तावताऽस्य प्रसा × × ।।

Colophon :

इ × × र्णा × त्सेघपूर्णेन्दुयज्ञेश्वरभट्टारकतृतीयकुमारेण श्रीनीलकण्ठयज्वान्तेवासिना श्रीमदनन्तनारादणकविना विरचिते बालहरिवंशनाम्नि महाकाव्ये पञ्चविंशस्सर्गः ।। समाप्तं चेदं काव्यम् ।।

Extra Information :

ग्रन्थप्रतिकारवाक्यं यथा ग्रन्थान्ते —
श्रृङ्गपादपदवाक्यवीथिका + + दयार्द्रचेतः ।।
शिवगर्भदासकुलजन्मनिर्मलस्तरुणेन्दुभूपपदभक्तिधूर्वहः ।
पुनराख्ययाऽपि किल शङ्करस्सुधीः लिखति स्म सर्गमिह पञ्चविंशकम् ।।

161

Sl. No : 26065 बिल्हणचरितम् Ms. No : P· 104/1

Beginning :

पृथ्वीमण्डलनाभिभूतकनकाद्रीन्द्रोत्तरस्यां दिशि
प्रायस्सज्जनसङ्कुराजितमहापाञ्चालदेशोऽभवत् ।
लक्ष्मीमन्दिरनामपट्टणमिदं नानासुखैकास्पदं
तत्रासीन्मदनाभिरामनृपतिः भूपालचूडामणिः ॥

End :

तद्वाक्यैरेव बुद्ध्वा तदुभयहृदयं भूमिपालो युवां वै
नीत्या × × भूत्या सुखमनुभवतं तौ तथेतीत्यगाताम् ।
प्राज्यं राज्यं गजाश्व प्रकरममलिनं भूषणं सौधगेहान्
प्रादादिष्टार्थसिद्धिर्भूवि विपुलतरासक्तयोश्चित्रमेतत् ।।

Colophon :

इति श्रीबिल्हणकाव्यं सम्पूर्णम् ॥

162

Sl. No : 26067 बिल्हणचरितम् Ms. No : P. 2021/1

Beginning :

तर्कस्तनीं सरसकाव्यकळाधरोष्ठीं
त्रैय्यन्तकुन्तळभरामितिहासहासाम् ।
पाणीभवत्प्रबलपाणिनितन्त्रमालां
बाणीं भजे निगमबाह्यमनःकृपाणीम् ।।
पृथ्वीमण्डलनाभिभूतक + भूपालचूडामणिः ॥

End :

सुखेन राजा कविराट्कुमारी-
लक्ष्मीगृहाख्ये नगरे च नित्यम् ।
स्वकीयराज्यं परिपाल्य साक्षा-
ल्लक्ष्मीपतेश्चारुदशाऽवतस्थुः ॥

Colophon :

इति बिल्हणनाटकं सम्पूर्णम् ॥

163

Sl. No : 26072 **बिल्हणचरितम्** Ms. No : P. 9864/8

Beginning :

पृथ्वीमण्डलनाभिभूतकनकाद्रीन्द्रोत्तर
+ धराजिमहापाञ्चालदेशोऽभवत् ।
+ पत्तनवरो नानासुखैकास्पदः
तत्रासीन्मदना + भूपालचूडामणिः ॥
मन्दारमाला तस्य + सीत् महिषी ॥

End :

तेजस्वी भव जीव वत्सरशतं शाम्यन्तु सर्वापदः
कामिन्यो हि मदालसाः स्मरसुखं कुर्वन्ति नित्यं स्तवम् ।
नाशं यान्तु रणाङ्गणे रिपुभटाः स्वच्छत्रपाताहताः
रक्ष × जान् मदनाभिराम नृपते पार्थेदिशं मेखलाम् ॥

Colophon :

— — —

164

Sl. No : 26079 **भद्रबाहुचरितम्** Ms. No : A. 439/1

Beginning :

सद्भयोऽथ भानुनाद्रित्वात् जनानामान्तरं तमः ।
यःसंमतित्वमापन्नः सन्नतिः सन्मतिं क्रियात् ॥
वृषभं बृषभं वन्दे वृषभाङ्कं बृषार्चितम् ।
वृषतीर्थं प्रणेतारं भेत्तारं कर्मविद्विषाम् ॥

End :

भद्रादेश्चरितं वक्तुं शक्यतेऽल्पधिया कथम् ।
तथाप्यविस्तरं दृष्टं ह्रीरकार्योपरोधनः ॥
श्वेतांशुकमथोद्भूतिं मूलादाज्ञापयितुं जनान् ।
व्यरीरचमिमं ग्रन्थं न स्वपाण्डित्यगर्वतः ॥

...

Colophon :

इति श्रीभद्रबाहुचरिते आचार्यरत्ननन्दिविरचितं श्वेताम्बरमतोत्पत्ति +
आपालिसंघोत्पत्तिवर्णनो नाम चतुर्थः परिच्छेदः । भद्रबाहुचरितं समाप्तम् ।।

165

Sl. No : 26085 भद्राद्रिरामायणम् Ms. No : P. 2524/1

Beginning :

श्रीमाधवप्रणयभूमाभिवर्धितं धीमाननीयशठजि —
त्प्रेमात्तजन्मभृतसामान्यबुद्धिभृतकामादिदोषविततिः ।
भूमानवोच्चशितभीमाघहारिनिजनामातिवेलमहिमा
रामानुजो वचनसीमानुवर्तिधनधामा विभुर्विजयते ।।

End :

त्वामाशरः स्वपुरसीमाविरोधिबलभूमान्वितं शुकमुखा-
दाज्ञा × वाशिजनताज्ञातये विशदमाज्ञाय सारणशुकौ ।
नाभ्यां कपित्वपिहिताभ्यां विभीषणश्रुताभ्यां त्वया समहि—
ताभ्यां समीक्षितबलाभ्यां × विवेदसकलम् ॥

Colophon :

— — — —

166

Sl. No : 26087 भागवतदशश्लोकी Ms. No : C. 2539/29

Beginning :

जन्माद्यस्य यतोऽन्वयादितरश्चार्थेष्वभिज्ञस्स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यं सूरयः ।
तेजोवारिमृदां + + सत्यं परं धीमहि ॥

End :

योगेश्वराय कवये शुकाय ब्रह्मणे नमः ।
संसारसर्पसन्दष्टं विष्णुरातममूमुचत् ।।
इति श्रीमद्भागवतमहापुराणे द्वादशस्कन्धदशश्लोकी समाप्ता ।।

Colophon :

व्यासशिष्यलक्ष्मीवल्लभयतीन्द्रकृतप्रथमस्कन्धादारभ्य द्वादशस्कन्ध पर्यन्त
दशश्लोकी समाप्ता ।।

Colophon :

ವ್ಯಾಸರಾಯರ ಶಿಷ್ಯರಾದ ಲಕ್ಷ್ಮೀವಲ್ಲಭಯತೀಂದ್ರಕೃತ ಪ್ರಥಮಸ್ಕಂಧದಾರಭ್ಯ ದ್ವಾದಶಸ್ಕಂಧ ಪರ್ಯಂತ ದಶಶ್ಲೋಕೀ ಸಮಾಪ್ತ ॥

167

Sl. No : 26091 | भारतचन्द्रिका | Ms. No : P. 7252

Beginning :

सीआए रहुणाहं सणम्मा जेहिज्ञअं कअम् ।
बालाणं पाअड क एक आहरअचन्दिमा ।।
अङ्गीकुणन्तु विपुहा महकव्व महा × लुहम ।
भारअं वुहि सज्ञाअं संवरोअ महोसहे ।।
पोमिसारण्ण मुणिहिं सूओव अइजा × ओ ।
कहं परिछिहअ कए वेसम्पा अण बोहिअम् ।।
चन्द्रवंसपलीवेसु जएसु बहुराअसु ।
जाओ सन्तणु णामो हि राआ संवुन्ति मुन्तिमो ।।

End :

भीमार्जुनादयस्सर्वे धर्मजाज्ञानुवर्तिनः ।
छायेव कल्पवृक्षस्य जनसौख्यकराः स्थिताः ।।
तस्मिन् काले सर्वलोकास्सारोग्यायुष्यवैभवाः ।
स्वस्वधर्मरता नित्यं नारायणपराः स्थिताः ।।

Colophon :

इति श्रीमुष्णनगरनिवासि कौण्डिन्यश्रीवीरवल्लीवरदनारायणसुत श्रीनिवास विबुधविरचितायां भारतचन्दिकायां देशीयद्वितीयभागप्रकाशिका छाया चतुर्दशीकला सम्पूर्णा । समाप्तोऽयं ग्रन्थः ।।

168

S. No : 26092 | भारतमञ्जरी | Ms. No : P. 7251/5

Beginning :

सोहग्गेक्कणिहाणं अण्णोण्ण
गुणाणुराअमिळिअसरिरम ।
धामं हो उसरण्णं गिरिआ
गिरिसाहि हाणअं भुवणाणम् ।। + +

अह तं स पुढमसीसो पण्डिअ
नाराअणो कअञ्जलि उइओ।
लन्धकईसाणं तीतण्णिम्माणं
सविण्णवेइ णिअगुरुम् ।।
अह सोऽवि भरिअलवाहं तण
धरिआणन्दओ रहस्सलीलम् ।
भार गमञ्जरीणामं कव्वं
ललिअरथ अंविविहभासाहिम् ॥
णेमिसरण्ण गएहिं
दीहरसत्तेहि पुच्छिओ तह सूओ ।
वईसंपाअणकहिअं कहं
कहेइ जनमेअस्स कुरूणम् ।।

End :

पुळिलयहळिसुतामहि
ता एह सुजअण उज्ञजेपि अरुवलम् ।
तसु सरजाळगळिओ सिन्धो
विवहदि विअ मौसवणिगइ सिबिले ॥
सम्महु विणिअं तोशं
शन्त असंवसा औविणिओ ।
आससो विहअं तोअं धाणि × ×

Colophon :

समाप्तः पञ्चमाश्वसः ।।

169

S. No : 26103 **भावशतकम्** Ms. No : P. 8424

Beginning :

श्रीस्तनस्तबकन्यस्तकस्तूर्यध्यस्तकौस्तुभम् ।
निस्तुलोरस्स्थलं शस्तं वस्तु स्वस्तिकृदस्तु नः ॥

लक्ष्मीनृसिंहकरुणारसलब्धसर्व-
तन्त्रस्वतन्त्रकवितार्किकसिंहलक्ष्मा ।
श्रीशैलबुक्कनगरान्वयवेंकटार्यः
श्रीकृष्णसंस्मरणमातनुते मिषेण ॥

End :

तन्वीपल्लवपुष्पपुञ्जरचिते शय्यातले शायिनी
सख्या वीजितताळवृन्तपवना मुग्धा मुहुर्निन्दति ।
× मं वानरयूथपं मुररिपुं मारस्य मौर्वीरवम्
कुम्भोद्भूतमुनीश्वरं पुरहरं राहुं रवेस्सारथिम् ॥

Colophon :

इति श्रीशैलवंशसुधाम्भोनिधिपूर्णचन्द्रस्य प्रचण्डोद्दण्डपण्डिताखण्डितमण्डली सार्वभौमस्य सर्वतन्त्रस्वतन्त्रशिरोमणेः श्रीमदण्णयदीक्षितेन्द्रनन्दनस्याभिनव कवितार्किककण्ठीरवाद्यनेकबिरुदाङ्कितस्य सूरपुरी वेङ्कटाचार्यस्य कृतिषु भावशतकं सम्पूर्णम् ॥

170

Sl. No : 26108 — **भिक्षाटनकाव्यम्** — **Ms. No : P. 5140**

Beginning :

कल्याणमावहतु वः शिवायोस्तदेतं
गोत्रं यदिमसितच्छविकण्ठमूलम् । (?)
वामेतरेऽपि कुरुते सितभासि भानोः
× प्रारब्ध × तनयापराणशङ्काम् ॥
कार्श्यं क्षि × तु भवता परमेश्वरस्य
भिक्षाटनं तदनुसंहितदेहिशब्दम् ।

End :

सा पार्वती जगति विश्रमजन्मभूमिः
म × याचते स गिरीशः सुरसङ्घमध्ये ।
य सेव्यलितमभवन्मदनाङ्गदाहा
त्तत्क्रम्यतामिति करग्रहोच्चलेन ॥ (?)

Colophon :

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटने × × पद्धतिश्चत्वारिंशत् ॥

171

Sl. No : 26109 भिक्षाटनकाव्यम् Ms. No : P. 8817

Beginning :

सद्यस्तुषारगिरिजौषधिसेवयैव
य: स्वोरभुक्तगरलं शमयांचकार ।
अन्यै × × ×
× × यादयमादिवैद्य: ॥

End :

सा पार्वती जगति विभ्रमजन्मभूमि-
र्या याचते स्म गिरिशं सुरसङ्घमध्ये ।
यन्मे व्यलीकमभवन्मदनाङ्गदाहा-
त्तत्क्षम्य × ग्रहणच्छलेन ॥
इति गौरीप्रशंसापद्धतिश्चत्वारिंशत् ॥

Colophon :

इत्युत्प्रेक्षावल्लभ: ॥

172

Sl. No : 26111 भिक्षाटनकाव्यव्याख्या Ms. No : P. 5142

Beginning :

नित्यांगीकृतमन्मथाक्षमपि यत् पद्मेषवन्मन्मथे
ब्रह्मद्रोह्यपि कल्मषैर्विरहितं शूल्यप्य × ।
सर्वैश्वर्यनिधानमप्यनुगृहं भिक्षामटन् दीनवत्
दिग्वासोऽपि गतत्रपङ्क्तिमपि तत्तेज: परं भावये ॥
शिवभिक्षाटनाख्यस्य काव्यस्य सुधिया मुदे ।
वाक्यं विख्यातरसं कुरुते भावदीपिकाम् ॥

End :

स: चन्द्र: निजपराजयस्य स्वपराजयस्य मूलसूतं आदिकारणभूतमादि कारणत्वं प्राप्तमित्यर्थ: । तस्या: पुनर्निक्रुत्तापा: मुखं न विवृणोति न प्रकटी करोति । स्वमुखं चन्द्रस्य पराजयकारणमित्यज्ञान × यदि तथैव गच्छन् चन्द्रो लज्जितस्सन् तन्मुखकान्तिपूरनिमग्नस्सन् स्वयमेव न प्रकाशेतेति भाव: ॥

Colophon :

इति श्रीमन्महामण्डलेश्वरगेणांकचक्रेश्वरजवाजीकोलाहालपेसलिहनुमार संकसूनुगारगेजबँटेकारमंगपजपालविरचितायां शिवभिक्षाटनव्याख्यायां प्रदोषोक्तिपद्धतिरेकत्रिंशत् ॥

173

Sl. No : 26116 मणिमञ्जरी Ms. No : P. 5477

Beginning :

वन्दे गोविन्दमानन्दज्ञानदेहं पतिं श्रिय: ।
श्रीमदानन्दतीर्थीयवल्लभं परमक्षरम् ॥
ससर्ज भगवानादौ त्रीन्गुणान्प्रकृते: पर: ।
महत्तत्वं ततो विष्णु: सृष्टवान्ब्रह्मणस्तनुम् ॥

End :

व्यद्योतिष्ट विचित्रवृत्तरचितस्सम्पूर्णविद्याकर:
कृष्णस्याद्भुतवीर्यवर्णनपरो नानार्थसङ्घोज्वल: ।
शर्वेन्द्रादिसुवन्द्यलालितपदो मायाविनां भीषण:
श्री मध्वो विजयी च मध्वविजयो नारायणप्रोद्भव: ॥

Colophon :

इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायण पण्डिताचार्यविरचितायां मणिमञ्जर्यामष्टमस्सर्ग: ॥

174

Sl. No : 26118 मणिमञ्जरीभेदिनी Ms. No B: . 726

Beginning :

जयतु जयतु रामस्सर्वलोकैकराम:
तनुजितनवकामस्तारिताक्ष्यङ्घ्रिराम: ।

क्रुतनतजनकामः क्रूरशत्रोर्विरामः
सकलगुणिललामस्सर्वविद्याभिरामः ॥ +
शङ्करादीन् गुरून्नत्वा तथा तच्छिष्यसन्ततिम् ।
मणिभेदननामेदं वक्ष्ये काव्यं यथामति ॥

End :

जयतु जयतु जीवो ब्रह्मरूपश्चिदात्मा
जयतु जयतु भाष्यं शाङ्करं भूसुरेषु ।
जयतु जयतु नित्यं तत्त्वमस्यादिवाक्यं
जयतु जयतु शुद्धाद्वैतमाचन्द्रतारम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादपूज्यचरणानुग्रह-लब्धाध्यात्मविद्यावैशद्यस्य श्रीमदखिलभुवनवलयपरिपालनचातुरीधुरीणकल्याण गुणगणाभिरामपरमप्रसादसमधिगतकविताचातुर्याभिरामस्य श्रीरामयोगीन्द्रस्य कृतिषु मणिमञ्जरीभेदिनीनामकग्रन्थस्समाप्तः ॥

175

Sl. No : 26122 मणिमञ्जरीव्याख्या Ms. No : P· 5475

Beginning :

विश्वाख्योदयमातनोति तदनु त्राणं विधत्ते पुन-
स्सौख्यप्रीतरहर्निशाधनमलं वक्ति श्रुतिव्यञ्जयन् ।
स्वा × प्रापयति समापहृदये कल्पावसाने च यः
तं देवं पितरं पतिं गुरुतमं वन्दे रमावल्लभम् ॥

नारायणपण्डिताचार्यो मणिमञ्जर्याख्यकाव्यनिर्माणायादौ स्वेष्टदेवतावन्दनं वाचा करोति– वन्द इति ॥

End :

नारायणप्रोद्भवः नारायणेन नारायणपण्डिताचार्येण प्रोद्भवः मध्वमाहात्म्य सहितः मध्वविजयः मध्वविजयाख्यमहाकाव्यम् × भादीपौ कर्तरि लिट् आत्मने पदम् । प्रथमपुरुषैकवचनम् ॥

Colophon :

ङविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यसुत श्रीमन्नारायणपण्डिताचार्य विरचितायाः मणिमञ्जर्याः व्याख्याने अष्टमस्सर्गः ॥

176

Sl. No : 26125 मद्रकन्यापरिणयः Ms. No : P. 3786/3

Beginning :

कल्याणमव्याहतमातनोतु
संव्यानलीलाकृदभूद्रजास्यः ।
कर्णानिलेनापसृतेंऽशुकान्ते
× वल्लभायाः स्मितपल्लवेन ॥

End :

यत्रावासममन्थताब्धिसुतया सत्रान्तरीपे हरिः
सुत्रामप्रमुखास्सुधामधिगमन्वित्रासिता दानवैः ।
वृत्रारे रचितार नमभजन्वत्रावनेतोद्यताः
सत्रासं गिरियः स्सष सुमहच्चित्राकरस्सागरः ॥

Colophon :

इति श्रीमदुदयकुलकलशजलनिधिचन्द्रमसः पण्डितमण्डलीमान्यस्य दत्तात्रेयविपश्चितस्सुगृहीतनाम्नः तनयेन गङ्गाधरकविना विरचिते मद्रकन्यापरिणये प्रथमरसोल्लासे पूर्णः प्रथमोल्लासः ॥

177

S. No : 26127 मधुरोष्ठीसन्देशः Ms. No : P. 3786/1

Beginning :

बर्हितानवरोचिषातदनतां कलेवनीं श्रीपतेः
तन्वन्मुत्पलिनीमुपेत्य च नमोवाकं ब्रुवन् चक्रिणा ।
की कीन्महिकृतोसि गोपतरुणीसन्धानचातुर्यभाक्
प्रागद्यागमनं वदेति गदितो वा × बाणादिमाम् ॥ (?)

End :

कुचेलमुनये पुरा प्रसृतिमानधनामुचे
श्रियं धनददुर्लभां श्रितनिलिम्पसालप्रभो ।

अदास्त्वमिति मानसं सरसमर्पयन्तीं जवात्
विधेहि परिरभ्यतां सुखितचेतसं प्रेयसीम् ॥

Colophon :

इति—
मधुरोष्ठीसन्देशं माधवगुणयोगनिचितमाधुर्यम् ।
रसिकाः प्रसवलुच्छंभ्रमरवदास्वादयन्तु निरसूयाः ॥ (१)
गङ्गाधरकविरचितः शृङ्गाररसैधमानपरभागः ।
सन्देशोऽयं सरलः कन्दरयतु नन्दनन्दनामोदम् ॥

178

Sl. No : 26131 मध्वविजयः Ms. No : P. 9144

Beginning :

कान्ताय कल्याणगुणैकधाम्ने
नवद्युनाथप्रतिमप्रभाय ।
नारायणायाखिलरक्षणाय
श्रीप्राणनाथाय नमस्करोमि ॥
अनाकुलं गोकुलमुल्लासात्
कृष्णाय कृष्णारमणप्रियाय ।

End :

नमस्तुभ्यं भीमप्रबलतमकृष्णे ×
स्वामिन् मध्व प्रदिश सुदृशं नो जय जय ॥
इति निगदितवन्तः तत्र वृन्दारकेन्द्राः
गुरु विजयमहं तं लालयन्तं महान्तम् ।
ववृषुरखिलहर्षं पुष्पवारं सुगन्धं
हरिदयितवरिष्ठे श्रीमदानन्दतीर्थे ॥

Colophon :

इति श्रीमत्कविकुलतिलक श्रीमत्त्रिविक्रमपण्डितसुतनारायणपण्डिताचार्य विरचिते मध्वविजयमहाकाव्ये आनन्दाङ्के षोडशः सर्गः ॥

179

Sl. No: 26138 **मध्वविजयव्याख्या** Ms. No: A. 820

Beginning:

कान्तायाखिललोकानां कारणायार्कतेजसे ।
नारायणाय कृष्णाय श्रीनाथाय नमो नमः ॥ + +
श्रीमध्वविजयं काव्यं पूर्वव्याख्यानुसारतः ।
आनन्दतीर्थनामाऽहं लक्ष्मीनृहरिनन्दनः ।
श्रीशप्रीत्यै व्याकरिष्ये यथामति यथान्वयम् ॥

End:

श्रीमन्मध्वजयाख्यकाव्यविवृतौ श्रीरङ्गसंख्यावतः
श्रीमद्वेङ्कटशैलराजचरणद्वन्द्वाब्जसेवाहृदः ।
जातायां गुरुसच्चरित्रविवृतौ श्रीकान्तसम्पूर्णधीः
तीर्थाचार्यदयाकृतोऽगमदसौ सर्गः शिवः सप्तमः ॥

Colophon:

सप्तमः सर्गः समाप्तः ॥

180

Sl. No: 26141 **मध्वविजयव्याख्या** Ms. No: C. 1706

Beginning:

देवान् गुरून्मूलादिपरमान्वन्दे विद्यागुरूंश्च मे ।
छलारीनृसिंहार्यशिष्यः शेषाभिधो बुधः ।
प्रवक्ति मध्वविजयं मन्दोपकृतये स्फुटम् ॥
अथ यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ॥
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इत्युक्तेः —

End:

पावकाः आहवनीयगार्हपत्यदक्षिणाग्नय इव । पुनः कथं भूताः सकल भृतः सकलं समस्त प्र × बिभ्रन्तीति तथा । के इव त्रयो लोका इव स्वर्गमर्त्यपातालसंज्ञकभुवनानीव ॥

Colophon :

इति श्रीमत्कविकुलतिलकत्रिविक्रमण्डिताचार्यसुतनारायणपण्डिताचार्यविर चितमध्वविजयव्याख्याने छलारीये अष्टमः सर्गः ।।

181

Sl. No : 26143 मध्वविजयव्याख्या Ms. No: A. 287/2

Beginning :

नमो जयात्मनियन्त्रे द्विजराजस्यरच्छूये ।
हरेःजस्य प्रियते हरये देवतात्मने ।। (?)
कृष्णाय वासुदेवाय श्रीवेदव्यासाय च ।
नित्यं सततम् । अनाकुलं गोकुलं अविनाशिवाग्जातं वेदं ॥

End:

कृत्वाणुमध्वविजयं व्यधितास्यकिञ्चि-
द्भावप्रकाशनमिदं हरये नमोऽस्तु ।
त्रिविक्रमविपश्चितो गुणनिधेः सुशिष्याः सुताः
सतामभिमतास्त्रयोऽत्र × नारायणः । +
मध्वविजयं गुरुगिरिसदनानन्ददः
प्रसीदतु ततःसदा शमतिः स नारायणः ।। (?)

Colophon :

इति श्रीमध्वविजयटीकायां भावप्रकाशिकायां षोडशः सर्गः।।

182

Sl. No : 26149 मध्वविजयव्याख्या Ms. No : P. 3215

Beginning :

अथेति । अथ कतिपयवर्षान्तरं मंगलानन्तरारभ्यप्रश्नकात्स्न्र्येष्वथो अथेत्यमरः । कदाचन कस्मिश्चित्काले सुन्दरनन्दनस्मितमुखेन्दुदृशां — सुन्दरः मनोहरः मन्दगः सहर्षकः + नौ हर्षकश्रुत्येत्यमरः । सुन्दरश्चासौ नन्दनश्च सुन्दरनन्दनः ।।

End :

तत्राश्रमे–व्यासाश्रमे तावत्य × तव्यम् । अतोपमानानि × इति परममंगलम् । वृत्तन्तु स्वागताख्यम् ; तल्लक्षणमभाणि कालिदासेन । अक्षरं शमं नवमं च व्यत्य × ति । यत्र विनीते प्राक्तनेद्यनुनयने × द्येव स्वागतेति कथिता कविभिः स्यादिति ।

Colophon :

इति श्रीमन्मध्वविजयाध्व × श्रीरंगसंस्था × श्रीमद्वेंकटशैलराजचरण-द्वन्द्वाब्जसेवा × जातायां गुरुयच्चरित्रविवृतौ श्रीकान्तयं पूर्णधीः × कृतेऽगमद × शिवः × सप्तमः । सप्तमः सर्गः समाप्तः ।।

183

Sl. No : 26155 मध्वविजयटीकाविवृतिः Ms. No: P. 9178

Beginning :

श्रीमन्तं विठलं नत्वा पूर्णबोधेष्टदैवतम् ।
श्रीमध्वविजयव्याख्यादीपमुद्बोधयाप्यहम् ॥

नरायणपरमानुग्रहपात्रभूतस्य सकसुरवरगुरोः श्रीमुख्यप्राणस्यावतारलीलां वर्णयितुकामाः नरायणपण्डिताचर्याः–

End:

श्रवणं गुरुमुख्याच्छास्त्र + श्रोत्रेण श्रवणं तस्य मननं मनसा ध्यानं तच्च कीर्तनं वाचा कथनं तच्च तैः अभीष्टं अविगणितानि प्रतिददति प्रच्छतीति अमराः देवाः प्रकीर्तयन्ति तं तथा । ददाम शिष्या इत्यादि नोक्तं उपसंहरति × ×

Colophon :

इति श्रीमद्वेदाज्ञतीर्थकृतश्रीमध्वविजयटीकाविवृतौ विश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायां सप्तमः सर्गः ।।

184

Sl. No : 26159 महानाटकम् Ms. No : B. 995

Beginning :

विश्वामित्रवसिष्ठगौतमशतानन्दोपदेशक्रमा-
त्कृत्वा ते मधुपर्कमाशु जनको रामाय रामान्वितः ।

सालङ्कारमलङ्कृताय च ददौ धर्मप्रजासिद्धये
देवब्रह्मसभान्तरे दुहितरं लक्ष्मीपतेर्मूर्तये ॥

End :

नागानामयुतं तुरङ्गानयुतं सार्धं रथानां शतं
पत्ति × शतकोटियोगिपतिते नृत्यत्कबन्धं रणैः ।
एवं कोटिकबन्धनर्तनविधौ किं चिरकर्णकिंकिणिः
पायान्नः परमात्मनो रघुपतेः कोदण्डचण्डध्वनिः ॥

Colophon :

इति श्रीमदिम्मडिदेवराजविरचिते महानाटके युद्धकाण्डस्समाप्तः ॥

185

Sl: No : 26160 महानाटकरामायणम् Ms. No : P. 9610

Beginning :

विघ्नेशो वः स पायाद्विहृतिषु जलधीन्पुष्कराग्रेण पीत्वा
यस्मिन्नुद्धृत्य हस्तं वमति तदखिलं दृश्यते व्योम्नि देवः ।
काप्यन्तः क्वापि विष्णुः क्वचन कमलभूः काप्यनन्तः क्व च श्रीः
काप्यौर्वः क्वापि शैलः क्वचन मणिगणाः क्वापि न क्रादिसत्त्वाः ॥
× × कान्तार कान्तिचुदौ
वैदेहीकुचकुम्भकुङ्कुमरजःपङ्कारुणेनाङ्कितौ ।
लोकत्राणविधानसाधु × प्रारम्भयूपौ भुजौ
दद्यातामुरुविक्रमौ रघुपतेः श्रेयांसि भूयांसि नः ॥

End :

श्रुत्वा राम च × सं को विस्मयं नेष्यते
ज्ञात्वा चैव विरिञ्चिना त्रिभुवनप्राणाय यो निर्मितः ।
अश्रोत्रः फणिपस्तदेवमुचितं नोचे × मिना
निर्धूते शिरसि क्ष्मभृश्च गिरयस्त्वेते दिशां नायकाः ॥

Colophon :

इति श्रीबोधायनाचार्यकृतौ महानाटकरामायणे सूक्ति × युद्धकाण्डः समाप्तः ॥

186

Sl. No : 26161 **महानाटकसूक्तिसुधानिधिः** **Ms. No : P. 4884**

Beginning :

विघ्नेशो वस्स पायात् विहृतिषु जलधीन् पुष्कराग्रेण पीत्वा
× नुदधृत्य हृतं वमति तदखिलं दृश्यते व्योम्नि सर्वैः ।
क्वाप्यम्भः क्वापि विष्णुः क्वचन कमलभूः क्वाप्यनन्त क्व च श्रीः
क्वाप्यौर्वः क्वापि शैलः क्वचन मणिग × क्वापि नक्रादिसत्वाः ॥
वाल्मीकिस्मृतिमन्दरेण मथितः सीतारमासम्भवः
सुग्रीवामरभूरुहोऽङ्गदगजः सौमित्रिचन्द्रोदयः ।
वातोत्पन्नग × विभीषणसुधः पौलस्त्य हालाहलः
श्रीरामायणदुग्धसिन्धुरमनो भूयात्स वः श्रेयसे ॥ +
लक्ष्मीधाम परं ललामरचनाभूमेरयोध्या पुरी ॥

End :

नमोऽस्तु रामाय सलक्ष्मणाय
देव्यै च तस्यै जनकात्मजायै ।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो
नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः ॥
श्रीमानिम्मडिदेवरायनृपतिः स्वर्लोककल्लोलिनी
क × × × सूक्तिविभवो × प्रार्थितः ।
श्रीमानेष च षष्ठकाण्डविषयान् व्य × न्महानाटक
श्लोका × × × तराह + + प्रभुः ॥

Colophon :

इति श्रीमद्राजाधिराजपरमेश्वर श्रीमदिम्मडिदेवरायमहारायविरचिते महा
नाटकसूक्तिसुधानिधौ युद्धकाण्डः षष्ठः समाप्तः ॥

187

Sl No 26167 **महिषीशतकम्** **Ms No: C. 1131**

Beginning :

स्वस्त्यस्तु प्रथमं समस्तजगते शास्ता गुणस्तोमतः
सन्तो ये निवसन्ति सन्तु सुखिनः तेऽमी दिवानुग्रहात् ।

धर्मिष्ठे पथि सञ्चरन्त्ववनिपाः धर्मोपदेशादृताः
तेषां ये भुवि मन्त्रिणः सुमनसः ते सन्तु दीर्घायुषः ।।

End :

राजा धर्मपरः परस्परधृतस्नेहाश्च तन्मन्त्रिणः
राजन्वत्यवनावना × अपभया भवन्तु क्षितौ ।
पुष्टाङ्गाः पशवश्चरन्तु भजतां दुर्भिक्षवार्ता लयं
वाञ्छानाथकवेः कृतिश्च कुरुतां निर्मत्सराणां मुदम् ।।

Colophon :

— — — —

188

Sl. No : 26169 महिषीशतकव्याख्या Ms. No : P· 7130

Beginning :

वन्दे धुण्डि महालिङ्गं विश्वेशं मणिकर्णिकाम् ।
ईश्वरश्रीनिवासाख्याहोबलाख्यगुरूत्तमान् ॥ + +
अथात्रभवान् श्रीवाञ्छेश्वरकविः + महिषप्रबन्धमहाकाव्यं चिकीर्षुः
+ आशीर्निर्देशमुखेन प्रबन्धतात्पर्यविषयीभूतमर्थं सङ्गृह्णाति– स्वस्मीति ॥

End :

राजा धर्मपरः परस्परधृतस्नेहाश्च तन्मन्त्रिणः
राजन्वत्यवनीवनीपकजना आढ्या भवन्तु क्षितौ ।
पुष्टाङ्गाः पशवश्चरन्तु भजतां दुर्भिक्षवार्ता लयं
वाञ्छानाथकवेः कृतिश्च कुरुतां निर्मत्सराणां मुदम् ।।

Colophon :

— — —

189

Sl. No : 26174 माणिक्यमञ्जरी Ms. No : P. 7901/7

Beginning :

गङ्गायामिव लोचनाग्नितपनाच्छौष्क्यं गतायां जटा-
वल्ल्यै गाण्डिवभेदनिम्नमिषतो निर्माथतोयाशयम् ।

सेक्तुं तां शिरसीव यस्य निहितश्चन्द्रः पृथासूनुना
प्रज्ञानेन्दुकलावतंसितशिराः श्रेयांसि दद्यात्स नः ॥

End :

अवतारान्तरं श्रीमच्छङ्कराचार्ययोगिनः ।
विद्यारण्यस्स दयतां मयि शङ्करकिङ्करे ॥

Colophon:

— — —

190

Sl. No : 26175 माणिक्यमञ्जरीव्याख्या Ms. No : P. 7907/2

Beginning :

चक्रामासतुरठिजकाशुभहयाभासुरस्समस्तागमा
सूतामास पयोजभूः पृथुरथामासावनिर्यत्प्रभोः ।
वाहामास सुरालयो दृढगुणी मासाहिराडच्युतो
बाणीभास पुरत्रयं लघुशरव्यामास पायात्सवः ॥
अथ तत्र भगवान् शङ्करकिङ्करो विद्वान् + + मङ्गल माचरतीति ॥

End :

तनश्चौपाधिकत्वेनातात्विकस्सर्वोऽपि द्वैतपञ्चः सत्यं परमद्वितीयमखण्डैक-रसंब्रह्मैवेति सिद्धं शिवम् ॥

Colophon :

इति शङ्करकिङ्करप्रणीतमाणिक्यमञ्जरीव्याख्यायां भावदीपिकाख्यायां विद्यारण्य विजयो नाम चतुर्थाश्वासः । ग्रन्थश्चायं समाप्तः ॥

191

Sl. No : 26177 मार्कण्डेयोदयः Ms. No : B. 1065/a

Beginning :

अथ घरेनजनीमवलोक्य तं
मुनिमनुग्रहशंसि मितस्मितम् ।
सकरुणं रुणतः किल पैतृका-
दिति मुमुक्षुमजीगददादरात् ॥

End :

अनेन सन्तापभरेण किं जही-
ह्यनेन सन्तावदवेत्कुतो न माम् ।
× × कृतं किमिन्दुना
मयाऽपराद्धं विधुमौळये किमु ॥

Colophon :

इति श्रीमदक्षिन्तलकुलललामवेङ्कटरामनामसूरिविरचिते मार्कण्डेयोदये महाकाव्ये द्वितीयस्सर्गः ॥

192

S. No : 26182 मुद्राराक्षसकथासारः Ms. No : Sl. B. 1105

Beginning :

स्वभावमहितैः वेषैः पुष्णन् विबुधसम्पदम् ।
ख्यापितो गीर्भिरग्र्याभिः श्रीमन्नारायणो जयेत् ॥
बुद्धिरेव जयत्येका पुंसः सर्वार्थसाधनी ।
यत्फलादेव किं किं न चक्रे चाणक्यभूसुरः ॥
चाणक्यस्य कथा सेयं × विद्यारूपिणी ।
अद्य तां पद्यतां नेतुमुद्यतो रविकर्तनः ॥

End :

स चन्द्रगुप्तोऽपि विधाय भाग्यवान्
योग्यां पितृभ्रातृवधप्रतिक्रियाम् ।
गुणोत्तरं राक्षसमाप्य मन्त्रिणं
नवे वयस्यन्वभवन्महीसुखम् ॥

Colophon :

इति मुद्राराक्षसकथासारः समाप्तः ॥

193

Sl. No : 26184 मृच्छकटिककथासंग्रहः Ms. No : P. 7145/3

Beginning :

केयं धन्या स्थिता ते शिरसि शशिकला किन्नु नामैव तस्याः
नामैवास्यास्तदेतत्परिचितमपि ते विस्मृतः कस्य हेतोः ।

नारीं पृच्छामि नेन्दुः कथयतु विजया न प्रमाणं यदीन्दुः
देव्या निह्नोतुमिच्छोः इति सुरसरितं शाठ्यमव्याद्विभोर्नः ॥

End :

वाराहीमात्मयोनेः तनुभवनविधावास्थितस्यानुरूपं
यस्य प्राग्दन्तकोटिं प्रलयमुपगता शिश्रिये भूतधात्री ।
म्लेच्छैरुद्विज्यमाहुज × मधुना संश्रिता राजमूर्तेः
स श्रीमद्बन्धुभृत्यश्चिरमवतु महीं पार्थिवश्चन्द्रगुप्तः ॥

Colophon :

सप्तमोऽङ्कः ॥

194

Sl. No : 26190 मेघसन्देशः Ms. No : P. 6163

Beginning :

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः
शापेनास्तं गमितमहिमा वर्षभोग्येन भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥

End :

श्रुत्वा वार्तां जलदकथितां तां धनेशोऽपि सद्यः
शापस्यान्तं सदयहृदयः संविधायास्तकोपः ।
संयोज्योभौ विगलितशुचौ दंपती हृष्टचित्तौ
भोगानिष्टानुपचितसुखान् प्रापयामास शश्वत् ॥

Colophon :

इति कालिदासस्य कृतौ मेघसन्देशे महाकाव्ये द्वितीयः सर्गः ॥

195

Sl. No : 26197 मेघसन्देशव्याख्या Ms. No : P. 267/6

Beginning :

मातापितृभ्यां जगतो नमो वामार्धजानये ;
सद्यो दक्षिणदिक्पातसंकुचद्वामदृष्टये ॥

अत्रभवान् कालिदासः मेघसन्देशाख्यं काव्यं चिकीर्षुः अशीर्नमस्क्रियावस्तु निर्देशो वापि तन्मुखं इति वचनात् काव्यारम्भे वस्तु निर्दिशति - कश्चिदिति ॥

End :

अन्ते काव्यस्य नित्यत्वे कुर्यादशिषमुत्तमम् ।
सर्वेष्टावाप्तये विद्वान् नामकेच्छानुरूपिणम् ॥

इति सारस्वतालङ्कारे दर्शनात् काव्यान्ते नायकेच्छानुरूपोऽयमाशीर्वादः कृत इत्यनुसन्धेयम् ॥

जगति निखिलविद्या + विमृग्यम् ॥

Colophon :

इति पदवाक्यप्रमाणपारवारपारीणश्रीमन्महोपाध्यायमल्लिनाथसूरिविरचितायां मेघसन्देशव्याख्यायां सञ्जीविनीसमाख्यायां द्वितीयस्सर्गः। समाप्ता च टीका ॥

196

Sl No : 26202 मुनिसुव्रतकाव्यम् Ms No : B. 45/1

Beginning :

श्रियं स वः श्रीवृषभो विशिष्या-
दस्यालिमालावृतवत्सछायाम् ।
बभौ नतेन्द्रोत्करमौलिनील
प्रभावलीलायितमब्जपीठम् ॥

चन्द्रप्रभं नौमि यदङ्गकान्ति
ज्योत्स्न्येति मत्वा द्रवतीन्दुकान्तः ।
चकोरयूथं पिबति स्फुटन्ति
कृष्णेऽपि पक्षे किल कैरवाणि ॥

End :

अथामरेन्द्रेण गजेन्द्रतो जिनः
स नीयमानः प्रतिपाण्डुकं महत् ।
निराकृतोऽग्रो मधुनेव मन्मथो
नितम्बमुच्चैरशुशुभे हराचलात् ॥

Colophon :

— — —

197

Sl. No : 26203 मुनिसुव्रतकाव्यम् Ms. No : B. 46/1

Beginning :

नगेन्द्रफालस्थलबद्धपट्टिका-
शिरोपरि स्थापित एव जिष्णुना ।
जिनार्भकः प्रोतपुरन्दरोपल-
स्फुरन्मनीषामपुषद्दिवौकसाम् ॥

End :

मिथ्यात्वकर्मपटलैश्चिर मां वृते मे
युग्ये दृशोः कुपथयाननिदानभूते ।
आशाधरोक्तिलसदञ्जनसप्रयोगैः
अञ्जीकृतेऽद्य पृथुतत्पथमाश्रितोऽस्मि ॥

Colophon :

— — — —

198

Sl No : 26204 मुनिसुव्रतकाव्यव्याख्या Ms No: B. 45/2

Beginning :

श्रीमद्देवेन्द्रसन्दोहबर्हिणानन्ददायिनम् ।
सुव्रताम्बुभृतं नौमि दिव्यश्राव्यनिनादिनम् ॥
तस्य गर्भावतारादिपञ्चकल्याणहासिनः ।
काव्यरत्नाख्यकाव्यस्य टीकां वक्ष्ये स्वभक्तितः ॥

चिकिर्षाविषयीभूतस्य काव्यग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं इष्टदेवतानां नमस्कुरान् श्रियमित्यादि श्लोकैर्दशभिः प्राह—

End :

प्राप्यमाणः निराकृतोग्रः निराक्रियते स निराकृतः — पराभूतः उग्रो रुद्रो येन सः पक्षे निराकृतो निर्धूतो उग्रो रौद्ररसो येन सः तथोक्तः नि उग्रश्शूद्रासुते क्षत्राद्रुद्रे पुंसि त्रिषूत्कट इति विश्वः । उन्मत्त इत मनो मथ्नातीति मन्मथः उच्चैः अत्यन्तं सुशोभे बभौ । शोभ दीप्तौ लिट् । उत्प्रेक्षालंकारः ॥

Colophon:

— — —

199

Sl. No : 26209 यतीशानदिव्यचरितम् Ms. No : P. 9168/14

Beginning :

सूनपाळी गळं नव्य धूळी समं चर्म धूळीमिद्दद्भृङ्ग केळी शुक्रोय-पन्पतोळी वृतोंद्या चेळी कचाभ्यां कपाळी दिदृक्षा कराळी कृतां चन्मराळी विवक्षा निचोळी कुबानां गनाळी कृदुस्तुङ्ग नाळीकवल्ली समा लीढ —

End :

सल्लाप निर्लेपसाश्चर्यं चर्या विलासाय दासानुदासोल्लसच्छ्रीनिवासप्रसाद प्रवेशाय विद्यानिवेशाय तस्मै यतीशाय ते श्रीमते धीमते ॥

Colophon :

इति श्रीमता श्रीनिवासेन कृतयतीशानदिव्यचरित्राभिगुप्तम् भवाब्धौ लुठन्तोऽपि नित्यं पठन्ते श्रयन्ते बुधाःतत्सम्पदं च ॥

200

Sl. No : 26209 यमकभारतम् Ms. No: C. 1866/1

Beginning :

ध्यायेत् परमानन्दं यन्माता पतिमयदपरमानन्दम् ।
उज्झितपरमानन्दम् यत्याद्याश्रमैः सदैव परमानन्दम् ॥

End :

कृष्णकथेऽयं यमिता सुखतीर्थेनोदिता नतेयं यमिना ।
सक्तिमता परमेशो सर्वोद्रेकात्सदा नुता परमेशो ॥
इति नारायणनामा सुखतीर्थपूजितः सुरायणनामा ।
पूर्णगुणैरधिकपूर्णः ज्ञानेच्छाभक्तिभिः स्वधिकपूर्णः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितं यमकभारतं सम्पूर्णम् ॥

201

Sl. No: 26216 यमकभारतव्याख्या Ms. No : C. 1934/2

Beginning :

नारायणमतं पूर्णप्रज्ञार्यपरमप्रियम ।
नमामि सच्चिदानन्दतनुं क्षीराब्धिजापतिम् ।।
श्लोकरूपस्य यमकभारतस्य जयत्यलम् ।
या टीका साल्पमतिभिर्दुर्बोधा सपदि स्फुटम् ॥
अतः प्रकाश्यते तस्य वाक्यैरश्लोकलक्षणैः ।
अशक्तो यः स एवार्थः सुखमल्पधियं धिये ।।
ध्यायेदिति । सुधीः परमानन्दं ध्यायेत् ।

End :

तथाच सुरायणः सुधाधारःपुरुषश्च स तथेति समासो बोध्यः । एतस्मिन् पक्षे अकेत्यत्र अकार लोपोवाच्यश्चेति । +

आसीद्भास्करभट्टतनुजस्तिम्मणभट्टाभिधः
कृष्णायाःकरहाटकाभिधमहासस्तहणे तीरणे ।
तत्पुत्रोद्युकरोदिदं विवरणं तम्मण्णभट्टाह्वयः
श्रीमद्भारतनिर्णये यमकवत्यजः सुखं वित्तये।। (?)

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं श्रीमन्महाभारत तात्पर्य-निर्णययमकभारततात्पर्यविवरणं श्रीमद्रघूत्तमतीर्थचरणशिष्यतम्मण्णभट्टविरचितं सम्पूर्णम् ॥

202

Sl. No : 26220 यमकभारतविवरणम् Ms. No : C. 1478/2

Beginning :

श्रीमन्महाभारतनिर्णयांबुधे-
रुद्धृत्य दिव्यं लघुभारतामृतम् ।
सौवानपीय्यत्सततं मनस्य
× चार्य धन्वन्तरिराविरासीत् ॥

तत्कृपालवमाश्रित्य तत्प्रदर्शितया दृशा ।
नारायणेन क्रियते टीका यमकभारते ।।

End :

तस्मादेवेत्याध्याहारेणैव तथा व्याख्यातमिति अखिलमतिमंगलम् ।।
इति सुरवरवाण्याशेषभावस्य मध्वो-
दितयमकसमुच्चद्भारतस्यास्य टीका ।
निजमतिमनुसृत्याल्पज्ञनारायणेन
व्यरचि गुरुवरो नः प्रीयतां भारतीशः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य यमकभारतस्य विवरणं श्रीमद्विश्वनाथसूरिसूनुनाराणपण्डिताचार्यविरचितं समाप्तम् ।।

203

Sl: No : 26221 यमकभारतटीका Ms. No : C. 3046/3

Beginning :

श्रीमुखाम्भोजहंसाय संसारभयसेतवे।
सोमवंशावतंसाय नमः कंसाद्यसद्भिदे ॥
व्यासं भारतकर्तारं + वेदेशयोगीशः +
+ + टीकेयं क्रियते मया ॥
इह सकलसुजनानां प्रत्यहं पठनेन भारतपठनजनित × सुजनं शिक्षयति —ध्यायेदिति ॥

End :

तत्करुणया कृतिरीषदियं मम × ।
व्यासं सर्वगुणावासं वासवीनन्दनं प्रभुम् ।
श्रीनिवासं सदा वन्दे भासमानं हृदम्बुजे ।।

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरत श्रीमद्यमकभारतटीका श्रीमद्वेदेश तीर्थश्रीपादशिष्येण यदुपतिना विरचिता समाप्ता ॥

204

Sl. No : 26226 यमकरत्नाकरः Ms. No: P. 2005/1

Beginning :

पद्माक्षमानमेतं प्रसन्नतो यदगतिस्वभावस्थम् ।
पद्माक्षमानमेतं प्रसन्नतो यदगतिस्वभावस्थम् ॥
मायाहीनः ज्यायान् एतावानित्यमेयोत्यः ।
मायाहीनः ज्यायान् एतावानित्यमेयोत्यः ॥

End :

अक्षिप्रयोजनगतौ आवृत्या पायिनं आयाताम् ।
अक्षिप्रयोजनगतौ आवत्य अहीनं आयाताम् ॥
तु पातौ न तु आयान्तौ सदाश्रमं यादवंचतं पान्तम् ।
तु पातौ नत्वा यान्तौ सदाश्रमं यादवंचतं पान्तम् ॥

Colophon :

— — —

205

Sl. No : 26228 यमकरत्नाकरः Ms. No : P. 3094

Beginning :

यत्कृतिरपवार्य शिलासारमणीयस्य मन्दरो मन्दाः ।
गाश्चक्रे श्रीर्मथने सारमणीयस्य मन्दरोमन्दाः ॥
× स योकृतायु घनिष्पत्तिरथाश्ववारणाया ।
शक्त्याहन् कंसादि निष्पत्तिरथाश्ववाणाया ॥

End :

अथ देशे बहुशष्वेस सर्वतो मुखरसारसके ।
समवासयत्तुघोषं स सर्वतो मुख रसारसके ॥
वसता तत्रत्ववता सुरभिराराध्यमानेन ।
निहता समूलघातं सुरभिराराध्यमानेन ॥
अथ शिशिरस्याभ्युदिते वसन्तमासे × × ×

Colophon :

इति हारीतकुलतिलक श्रीराममिश्रसोम × सूनो श्रीरङ्गरा × पराशरा परनामधेयस्य श्री × कृति × मकरत्नाकरे महाकाव्ये षष्ठ आश्वासः ॥

206

Sl. No : 26234 | यमकरत्नाकरव्याख्या | Ms. No: P. 2005/2

Beginning :

प्रणिपत्य वरं पुरुषं श्रीवत्साङ्कः पराशरान्याह्वः ।
स्वयमेव यमकरत्नाकरविवृतिं कर्तुमारभते ॥
यत्किल भगवतः + + कवयो दृश्यन्ते तदर्थमुच्यते ॥

End :

अतीव तद्धितभूतौ × × मं पूजिताश्रमं यान्तौ पुनरपि हरिर्विशेष्यते यादवं च तं यातां भजतमवञ्चकं (तं) मनुष्यत्वकृतप्रभादनरपातमित्यर्थः । पान्तं रक्षन्तम् ॥

Colophon :

इति हारीतकुलतिलक श्रीराममिश्रसोमसुतसूनोः श्रीरङ्गराजदिव्याज्ञालब्ध श्रीपराशरनामधेयस्य श्रीवत्साङ्कस्य कृतौ यमकरत्नाकरविवरणे दशमः आश्वासः ॥

207

Sl. No : 26239 | यमकशतकम् | Ms. No : C. 2393

Beginning :

परमुदारमुदा रमणं श्रियो
विधिभवादिभवादिदमाश्वरम् ।
शमदमादिदमादिभवं सतां
मजमनोजमनोजयिनं सदा ॥
अभिनमामि नमामि म आपदो
भवसमुद्र समुद्रनमन्वहम् ।
परिविमोचितुमीशत ईहतो
पदमतः शरणं शरणं सताम् ॥

End :

यमकशतकमेतत्त्वत्परोक्षापरोक्ष-
स्तवनमुमसुमालारूपमापादितं ते ।

× एतद्धार्यमार्याभिरामा × स्यात् ॥

भोगिराजभुवा श्रीमत्किटिगुर्वङ्घ्रिसेविना ।

रचितं भगव × × × तन्नाम्ना यमकं शतम् ॥

Colophon :

इति श्रीमद्भास्करवेङ्कटवरदाचार्यपूज्यपादाराधकेन भगवता रचितं यमक शतकं सम्पूर्णम् ॥

208

Sl. No : 26240 यमकशतकव्याख्या Ms. No: C. 2210

Beginning :

प्रणम्य रुक्मिणीनाथं गुरूंश्च गुरुहृद्गतान् ।

स्वच्छं तं श्रीशयमकशतकं व्याकरोम्यहम् ।

मङ्गलमाचरति । परमिति । हे मनः भयादिदं उत्पत्यादिप्रदम् । सतां शमदमादिदं आदिभवं आद्यं अनोजयिनम् ॥

End :

सुमानि कुसुमानि तेषां सुमाला × प्यस्त × यमकशतकमया आ × चेतं हे आर्याभिरामावतगुण भगवन् ते तव सदय × धार्यं एतच्च मत्प्राद × × र्थकं स्यात् × × भोगिराजभुवा नागेशराजसुतेन × तन्नाम्ना × × नाम्ना यामकं शतं यमकशतकम् ॥

Colophon :

इति श्री यमकशतकव्याख्या समाप्ता ॥

209

Sl. No : 26243 यादवाभ्युदयम् Ms. No : P. 1192/1

Beginning :

वन्दे वृन्दावनचरं बल्लवीजनवल्लभम् ।

जयन्तीसम्भवं धाम वैजयन्तीविभूषणम् ॥

End :

नाथस्सोऽयं शिशुरपि सतां नन्दगोपस्य सूनुः
प्रायश्शैलः प्रतिनिधिरसौ पद्मनाभस्य पुंसः ।
किन्त्वस्साध्यं सुरपतिमुखैः किंपचानैस्तद ×
× × जगुस्तत्र सम्भूय गोपाः ॥

Colophon :

सप्तमः सर्गः ॥

210

Sl. No : 26251 यादवाभ्युदयम् Ms. No: A. 174a

Beginning :

प्रसादभाजः प्रतिनिर्गतां तां
प्रसादतो वासववल्लभायाः ।
समग्रशक्तिस्समयोपयातः
प्राणेश्वरीं प्राप्तुमियेष शौरिः ॥
तामद्भुतां सिद्धिमिवाद्भुतानां
सौभाग्यविद्यामिव सद्गुणानां ।
सत्तामनन्यामिव सद्गुणानां
यथाश्रुतं प्रैक्षत यादवेन्द्रः ॥

End :

आसीदेवं परिणतिमधिद्वारकं द्वापरान्ते
व्यासप्रख्याविभजनभवद्वेदशाखोपमानम् ।
चिन्तातीतं यदुपतिमनःप्रीतिचिन्तामणीनां
एकं तासां भवरसभुजां भाग्यमेकातपत्रम् ॥
गुरुभिरनघचित्तैराहितोदारभूमा
सुरभितरसमेतत्सूनृतं वेंकटेशः ।
व्यतनुत यदुवीरप्रीतिमिच्छन् प्रभूनां
कविकथकमृगेन्द्रः क्षेमदं काव्यरत्नम् ॥

211

Sl. No: 26252 **यादवाभ्युदयव्याख्यानम्** Ms. No : P. 1115

Beginning :

अव्याजमापूरयद्वंशमव्यान्मधुरस्मितम् । (?)
गोकुलानुचरन्धाम गोपिकानेत्रमोहनम् ॥
तदाकर्णनतस्सद्यस्समुदञ्चत्कुतूहलः ।
विदुषां पुरतस्तस्य विवृतौ मां न्ययोजयत् ॥
कवितार्किकसिंहस्य काव्यमेतद्यथामति ।
विवृणोमि महीपालनियोगबहुमानतः ॥

End :

पुनःपुनः उदचरत् उद्गतोभवत् × न्तीत्यत्र नपुंसकं नपुंसकेनेति नपुंसकशेषता । मन्दाक्रान्तावृत्तम् । मन्दाक्रान्ताजलधिषडगौ × नतौद्गुरु-चेदिति लक्षणात् ॥

Colophon :

इति श्रीमद्भारद्वाजकुलतिलक विश्वजिद्याजि श्रीरङ्गराजाध्वरिवरसूनुना अप्पय्यदीक्षितेन विरचिते यादवाभ्युदयव्याख्याने द्वादशः सर्गः ॥

212

Sl. No : 26263 **युद्धपञ्चाशिका** Ms. No : P. 392/2

Beginning :

मा + सिन्दुर × मभपाटनछटा × टके × ग्रक्तिक
व्याजैर्व्याजकदम्बकैरिह पुनःस्संग्रामभूःपूरिता ।
पात्रीभूतकपालकै × रश्रीपरिणीतिकर्मकृतवान् ×

End :

दूरेणाणुं परम्परास्य निशितैर्भल्लैर्दरोपान्तिके
सान्निध्ये घनचर्मपट्टसभरै × ।
सुश्लिष्टे पटुमल्लमुष्टिहतिना सम्पूर्णरोषात्पुनः
दन्तादन्तिकचाकचीह नितरां युध्यन्ति योधास्तथा ॥

त्वद्भेरीभोंकृतिस्सा त्वयि रयति तथा श्रोत्रमार्गं परेषां
त्वस्तेजःपुञ्जमेव स्थगयति सरणिं नेत्रयोर्हन्त तेषाम् ।
त्वद्धाटीधीरमुद्रा विकलयति चमत्कारमेतत् पदानां
+ + कुरुषे व्यर्थसङ्ग्राह्ययुद्धम् ॥

Colophon :

— — —

213

Sl. No : 26264 युधिष्ठिरविजयव्याख्या Ms. No : P. 509

Beginning :

करेणैकेन कोदण्डं इतरेण × धरन् ।
पातु रामः परानीकभेदी विघ्नान् भिनत्तु नः ॥

काव्यकरणं सफलमेवेति निश्चित्य वासुदेवनामा केरळीयकविः कीर्तिकामनयैव काव्यकरणे प्रवृत्तः आशिषमाह– प्रदिशतिवति ॥

End :

साधवः पुरूरवा इव राजन्यविशेष इव इमां भुवं ररक्ष । षट्त्रिंशद्वर्षं रक्षितवान् । युधिष्ठिरस्य × कृष्णान् संकर्षणो ज्येष्ठः स्त्रीभिः × महाबलः युधिष्ठिरो युद्धसमये द्विसप्ततिवयाः ॥

Colophon :

इति भारद्वाजकुलतिलक श्रीसुदर्शनभट्टात्मजेन अ + यम्वागर्भ संभवेन मन्वादिस्मृतिमर्मज्ञ रामचन्द्रभट्टानुजेन हस्ति + भट्टशिष्येण शाच्तनूरग्राम वासिना चोक्कनाथेन विरचिता बालव्युत्पत्तिकार्याख्या युधिष्ठिर विजयव्याख्या समाप्ता ॥

214

Sl. No : 26267 युवराजवृत्तम् Ms. No : B. 1033/2a

Beginning :

सद्योगिनो यां हृदये निधाय
सद्यो लभन्तेऽखिलवाञ्छितार्थान् ।

हृद्यानतानां मम सा कुरुम्बा
हृद्याविरस्तु स्वयमेव काली ॥
भूमण्डले भारतनाम्नि वर्षे
विंध्यस्य यद्दक्षिणतश्चकास्ति ।
खण्डं भुवः केरलनामधेयं
श्रीकोटिलिङ्गं पुरमस्ति तत्र ॥

End :

पूर्णं रसैः दैववशादपूर्णं
तत्काव्यमज्ञोऽप्यधुनाऽतिरम्यम् ।
तद्भागिनेयीतनयोऽहमस्मी-
त्यारूढधैर्यः परिपूरयामि ॥

Colophon :

— — — —

215

Sl. No: 26269 रघुनाथविजयः Ms. No: B. 979

Beginning :

करधृतबाणेष्वासं सीतासौमित्रिशोभिपार्श्वयुगम् ।
वरदं वन्दे रामं घननीलं हनूमता सेव्यं परयार्या ॥
देवेन्द्रसंमीड्यपदाम्बुजं श्रुतिशिरोम्बुजातहरिदश्वम् ।
सल्लोकाम्बुधिरजनीशं मध्वमुनिं सततमीडे विपुलार्या ॥

End :

वृत्तरत्नाकरोद्भूतवृत्तरत्नैरलङ्कृतम् ।
आत्मरत्नाकरोद्भूतवृत्तनायकरत्नकम् ।
प्रबन्धभूषणं रामो दधातु हृदये मुदा ॥
षट्पादवती गाथा ॥

Colophon:

इति श्रीरघुनाथवयतीर्थविरचिते वृत्तरत्नाकरोदाहरणे रघुनाथविजये विषम वृत्तप्रबन्धः चतुर्थः ॥

216

Sl. No : 26278 रघुवंशः Ms. No: P. 6395

Beginning :

वागार्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।

End :

तं भावार्थं प्रसवसमयाकाङ्क्षिणीनां प्रजानाम्
अन्तर्गूढं क्षितिरिव नभोवीजमुष्टिं दधानः ।
मौलैस्सार्धं स्थविरसचिवैः हेमसिंहासनस्था
राज्ञी राज्यं विधिवदशिषत् भर्तुरव्याहताज्ञा ॥

Colophon :

इति कालिदासस्य कृतौ रघुवंशे महाकाव्ये एकोनविंशस्सर्गः ।।

Extra Information :

श्रीमद्हरिदननृपालकनन्दनेन
साहित्यकौशलविदा गुणभूषणेन ।
बाबामहीपतिलकेन सुधीश्वरेण
प्रौढा कृतिस्सुलिखिता भुवि दीव्यतीयम् ।।

217

Sl. No : 26324 रघुवंशव्याख्या Ms. No : P. 3376

Beginning :

नमस्तस्मै गणेशाय यत्प्रसादान्महीयसाम् । + + +
अरुणाचलनाथेन द्विजपादाब्जसेविना ॥
शिवदासापराख्येन मया टीका वितन्यते ।।
सन्तः श्रृण्वन्त्विमां टीकां रघुवंशप्रकाशिकाम् ।।

End :

अयंन्नियताप्यात्मावमर्शसिद्धिः । अज्ञानां तु यथासंभवं प्रयोगः ॥
यदाह– सन्धिसङ्घटनं रसाभिव्यक्त्यपेक्षया–इत्यादि ।।

Colophon :

श्रीकण्ठपादपवित्रितस्यारुणगिरिनाथस्य कृतौ रघुवंशप्रकाशिकायां द्वितीयः सर्गः ॥

218

Sl. No : 26325 रघुवंशव्याख्या Ms. No : A. 779

Beginning :

× × भादसन्निभः।
यस्याः प्रसादादभवत् कालिदासःकवीश्वरः ॥

इह खलु विशिष्टाचारमनु × × वेष्टदेवतानमस्कारं करोति वागर्थाविति। पृचीसम्पर्क इत्यस्मात् सम्पृवतौ नित्यसम्बद्धौ ।

End :

मरीचोद्भ्रान्तहारीताः हारीतो हरितवर्णः पक्षिविशेषः ।
पक्षिभेदाः स्वलीशीलश्री कर्मयकवार्तकाः ।
लावकुक्कुटहारीतजीवंजीवादयोपि च ॥
इति यावदवप्रकाशः।

Colophon :

इति दक्षिणावर्तनाथविरचितायां रघुवंशदीपिकायां प्रथमसर्गः समाप्तः ॥

219

Sl. No : 26327 रघुवंशव्याख्या Ms. No : A· 795

Beginning :

रथाङ्गेति ॥ तयोः सुदाक्षिणादिलीपयोः रथाङ्गनाम्नोरिव चक्रवाकयोरिव क्षणमपि विरहासहिष्णुत्वात् एषोपमा परस्पराश्रयं द्वयोः सममित्याशयः। × × क्रमोऽत्र विवक्षितः॥ ॥

End :

अधिकमूर्तेः इन्द्रजिद्वधशोभिनो भ्रातुः लक्ष्मणस्य सोदर्यं समानोदरभवं मेने। सोऽप्यसहाय एव इन्द्रजितं हतवान् । अयं च लवणमिति समानगुणत्वं विवक्षितम् ॥

Colophon :

इति श्री रघुवंशे महाकाव्ये कालिदासविरचितस्य व्याख्याने नागराज कृते चिन्तामणिनाम्नि चतुर्दशः सर्गः ॥

220

Sl. No : 26349 रघुवंशव्याख्या Ms. No : C. 3045/2

Beginning :

मातापितृभ्यां जगतो नमो वामार्धजानये ।
सद्यो दक्षिणदृक्पातसंकुचद्वामदृष्टये ॥
मल्लिनाथः कविस्सोऽयं महात्मानुजिघृक्षया ।
व्याचष्टे कालिदासीयकाव्यत्रयमनाकुलम् ॥
+ इह खलु सकलकविशिरोमणिः कालिदासः —

End :

विधिवत् विध्यर्हम् । यथाशास्त्रमित्यर्थः । तदर्हमिति वतिप्रत्ययः । अशिषत् शास्ति स्म । सतिशास्त्यर्तिसश्चेति ऌडादेशः । शास इदङ्हलिरि तिरीकारः ॥

Colophon :

इति महामहोपाध्याय कोलाचलमल्लिनाथविरचितायां रघुवंशटीकायां सञ्जीविन्यामेकोनविंशः सर्गः ॥

221

Sl. No : 26359 रघुवंशव्याख्या Ms. No : C. 1951

Beginning :

श्रीसर्वज्ञं जिनं नत्वा गणिः समयसुन्दरः ।
अर्थालापनिकां वृत्तिं करोति सुगमां रघोः ॥
वागर्थाविति ॥ अहं पार्वतीपरमेश्वरौ वन्दे ।

End :

तं सा राज्ञी बभौ × भर्तुः राज्यं अशिषत पालयामास । किं विशिष्टा राज्ञी — अव्याहताज्ञा अखण्डिताज्ञा । किं विशिष्टा राज्ञी हेमसिंहासनस्था कैस्साकं पालयति स्म इत्यत्राह मौलैः प्राक्तनैः स्थविरसचिवैः वृद्धमन्त्रिभिः ॥

Colophon :

इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ राज्ञीराज्यनिवेशनो नाम एकोनविंशतितमस्सर्गः ।

इति श्रीरघुवंशस्य अर्थालापनिकावृत्तिः सम्पूर्णाः ॥

Extra Information :

ग्रन्थान्ते काव्यव्याख्यानन्तरं व्याख्याकर्तुः नैच्यानुसन्धानात्मकाः व्याख्या कर्तुः वंशविस्ताराद्यात्मकाः कतिचन श्लोकाः वर्तन्ते ॥

222

Sl. No : 26370 रघुवीरवर्यचरितम् **Ms. No: P. 4979**

Beginning :

श्रीपतिः श्रितवात्सल्यः करुणावरुणालयः ।
समस्तजगतां नेता श्रेयो दिशतु नस्सदा ॥
× वन्दे ल × सैन्येशं सूत्रवन्यङ्गनाप्रियम् ।
वेत्रदण्डेन यो विश्वं बिभर्ति सचराचरम् ॥
तमसातटवास्तव्यमुनिबृन्दारकान्वितः ।
तपश्चकार भरितं वल्मीकप्रभवो मुनिः ॥

End :

तदनु जनकपुत्रीक्षेमवार्ताविशेष-
श्रवणजनितहर्षोन्मेषसंपूर्णकामः ।
दशवदनविनाशाशंसिते तु प्रथीक्ष-
द्भ्रुकुटिविकटवक्त्रः कोपवान् राघवोऽभूत् ॥

Colophon :

इति श्रीमत्तिर्मवलवंशसिन्धुविधुस्साहित्यविदा × × दा श्रीमद्वेङ्कटराघवार्य विदुषः पुत्रेण धीशालिना कोनार्येण विनिर्मिते सुकविना श्रीसुन्दराख्ये महा काव्ये श्रीरघुवीरवर्यचरिते सर्गस्तृतीयो गतः ॥

223

Sl. No : 26371 रघुवीरोदाहरणम् **Ms. No : P. 932/5**

Beginning :

भवतु वदने वाणीदेवीं चिराय च कोऽप्यलं
लपतु रसना नानात्वेन स्वयैव भवादृशाम् ।

य इह लभते यं चारय्य प्रभूतरसोल्लन्
मधुरकवितासन्दोहश्रीपरिष्करणं सतः ।

End :

त्राता × उय × वदेच्च जनतासृष्टं समस्तं जगत्
योऽयं येन च जृम्भते मम इदं यस्मै सता भावितम् ।
तस्मै + श्रैष्ठ्यमुपैति कोऽपि घृणा या भक्तिः प्रसीदेत् कृता
यस्माद्यस्य च यत्र यत्प्रतिकलं श्रीराम जिष्णुर्भव ॥

Colophon :

इति श्रीवृत्तमणिश्रीरङ्गाधिराजगुरुकुमारस्य + श्रीरङ्गनारायणगुरोस्तनूजेन श्रीनिवासेन निरूढा रघुवीरोदाहरणा समाप्ता ॥

224

Sl. No : 26376 पादुकासहस्रव्याख्या Ms No: P. 2205

Beginning :

× × प्रज्ञया वृत्तितो वा
शेषीभावो यत्र काष्ठां दधाति ।
तिष्ठन्तान्ते मह्यमन्योन्ययोगा
त्रै + रं रङ्गराट्पादुका च ॥

इह खलु निगमागमपरीक्षणप्रगुणित + पादुकासहस्रं नाम काव्यं प्रणिनाय। तत्र प्रथमपद्धतौ पादुकास्तुतिं प्रस्तोष्यन् –

End :

सन्तः महान्तः वेदार्थत्रोद्धारः भुवि अस्मिन् लोके जयन्ति एतेन प्रमात्रुत्कर्षः उक्तः । उत्कर्षरूपस्य एकयजस्य एकशब्देन वृत्या आवृत्तिदीपकमलङ्कारः । त्रिविधं दीपिकावृत्तिर्भवेदावृत्तिदीपकम् इति लक्षणम्।

Colophon :

इति भारद्वाजकुलजलधिकौस्तुभश्रीदेवराजस्य तनयेन श्रीनिवासेन विरचितायां पादुकासहस्रपरीक्षायां फलपद्धतिः द्वात्रिंशत् ॥

225

Sl. No : 26379 रत्नसंग्रहः Ms. No : C. 1844/1

Beginning :

श्रीवीरराघवमहं प्रणतोऽस्मि सिध्यै
सीतापतिं कुलपतिं किल मज्जनन्यै ।
योऽदाद्वरं सुतपसा परितुष्टचित्तो
जीवत्सुताप्तिकरमुत्तमभक्तिमत्यै ॥
कानिचिद्वृत्तरत्नानि वादिराजस्य लोभतः ।
पौर्वापर्यमजानंश्च संग्रहामि यथामति ॥
आसीद्द्विजेन्द्रः खलु शुद्धवंशः
कश्चित्क्षितौ तौलवमण्डलेषु ।
वागीशतीर्थार्यमहारविन्दं
पुलं मुकुन्दार्हपयोग्यमासीत् ॥

End :

ज्ञानानन्दमयैः प्रसन्नवदनैः श्रीपादगुल्फादिभिः
निर्भेदश्रुतिभारतादिवचनैर्वृन्दारकाग्र्यैस्सदा ।
श्रीपद्मासनवायवीन्द्रफणिपश्रीकण्ठशक्रादिभिः
वन्द्यश्रीचरणो रमापतिरलं प्रीतश्च नः प्रीयताम् ॥

Colophon:

इति श्रीमद्रत्नसंग्रहे रघुनाथाचार्यविरचिते तृतीयः प्रबन्धः समाप्तः ॥

226

Sl. No : 26380 रत्नसंग्रहटीका Ms. No : C. 1844/2

Beginning :

सीतापतिं च श्रीमध्वहयग्रीवपदार्चकान् ।
गुरूनपि प्रणम्याहं व्याख्यास्ये रत्नसंग्रहम् ॥
अजानन्वाक्यरचनामपि कर्तुं समुत्सहे ।
टीकां तत्क्षम्यतामागो दोषज्ञैश्च कृपालुभिः ।

श्री वीरराघवमित्यादि चतुर्भिः । सिद्ध्यै ज्ञानादिसिद्ध्यर्थं । अत्र श्रीशब्दः पूज्यार्थः । श्री सीतापतिं इत्यनेन सीतापदेन श्रीनमनस्य स्मृतत्वात् क्षेत्रे वसन्त तं वीरराघवनामानं श्रीराममित्यर्थः ॥

End :

श्रीरामपतिः श्रीलक्ष्मीभर्ता भगवान् सदा अलं प्रीतश्च प्रीत एव नोऽस्माकं अलं सम्यक् प्रीयतां प्रीतो भवतु । मङ्गलान्तपद्ये मङ्गलदेवतायाः श्रीदेव्याः स्मरणार्थं पदान्तरं विहाय रमापतिरित्युक्तम् ॥

रत्नसङ्ग्रहटीकोऽयं रचिता रत्नदीपिका ।
गुरुप्रसादबलतो यथाप्रज्ञं यथावचः ॥
कृत्वाऽल्पकार्थं तु गुरोः प्रसादात्
कृतं तदित्यल्पकृतेऽस्य नामा ।
प्रसार्यते यन्महतिप्रसार्यं
क्षाम्यंतु वर्या गुरुवस्तदंहः ॥
वादिराजसम्पूज्यचरणः श्रीहयाननः ।
लक्ष्मीभर्ता जगन्नाथः प्रीतो भवतु नः सदा ॥

Colophon :

इति श्रीमद्रत्नसंग्रहटीकायां श्रीरघुनाथाचार्यविरचितायां रत्नप्रदीपिकायां तृतीयः प्रबन्धः समाप्तः ॥

227

Sl. No : 36381 रम्भाशुकसंवादः Ms. No : C. 524/2

Beginning :

आश्चर्यमाश्चर्यतिवारुणीनां
एकैक शृङ्गारमृगाक्षिणीनां ।
श्री पुण्यहीनोवनकंदसेवितो
कथं च भूपा मम धर्मनाशयन् ॥ रम्भा उवाच
वसंतकाले कुसुमाकुलाले
वनांतरं पुष्पलतान्तरं ।

स्तनान्तरं यः पुरुषो न सेव्यते
मृतान्तरं तस्य नरस्य जीवितुं ॥

End :

श्रीशुक उवाच—
अहो वयं धन्यतमा यदत्र
सक्ताःपितृभ्यां न विचिन्तयामः ।
अभक्षमाणा अबला वृकादिभिः
सरक्षिता रक्षित यो हि गर्भे ॥ (?)

Colophon:

इति श्रीशुकरंभासंवादः संपूर्णः ॥

228

Sl. No : 26382 रम्भाशुकसंवादः Ms. No : C. 566

Beginning :

मार्गे मार्गे नूतनं चूतखण्डं
खण्डे खण्डे कोकिलानां विरावः ।
रावे रावे मानिनीमानभङ्गः
भङ्गे भङ्गे पञ्चबाणप्रचारः ॥

End :

सुरूपं शरीरं नवीनं कलत्रं
धनं मेरुतुल्यं वचश्चारुचित्रम् ।
हरेरंघ्रियुग्मे मनश्चेन्न लग्नं
ततः किं ततः किं ततः किं ततः किम् ॥

Colophon :

इति रम्भाशुकसंवादे शृङ्गारज्ञाननीयं संपूर्णम् ॥

229

Sl. No : 26384 रसज्ञभूषणम् Ms. No : P. 4507/4

Beginning :

श्रीदाशरथ्यङ्घ्रिसरोजरेणुः
मोदाय भूयात् मुनिः कूकुदश्रीः ।

वादे यमादाय हि गौतमीयाः
क्षोदे जगत्कारणतां विवव्रुः ॥

End :

अश्रुमीक्षणवारिसं × यतोषभर्बैर्यतो मुनिः ।
तदमुष्य भभूव सत्यवाक्पदवीराज्यमहाभिषेचनम् ॥

Colophon :

श्रीरामपुरिवास्तव्यसीतारामकवेः कृतौ ।
रसज्ञभूपगे सर्गो द्वितीयोऽजनि सुन्दरः ॥

230

Sl. No : 26385 रसज्ञभूषणव्याख्या **Ms. No : P. 4507/5**

Beginning :

गन्धानाधारकालस्फुरदुरु × हन ज्वालवेवेश्यमान-
ब्रह्माण्डप्रौढभाण्डस्फुटनपटपटात्कारवद्घोरवेषम् ।
कोदण्डं कोणपौघप्रशमनघटनव्यप्रकाण्डप्रकाण्डं
बिभ्राणः कोऽपि वीरः स्फुरतु मम पुरः सूर्यवंशावतंसः ॥

End :

आसिचत् सिक्तवान् । तत् सेचनं अमुष्य हरिश्चन्द्रस्य सत्यवाक्पदवी सत्यवाक्सरणिरेव राज्यं तस्मिन् महाभिषेचनं पट्टाभिषेकः बभूव ॥ वियोगिनीवृत्तम् ॥

श्रीरामेति ॥ व्याख्यातमेतत् ॥

Colophon :

इति श्रीमत्समस्तसुमनस्वति + + लक्ष्मीनृसिंहगुरोः सूनुना श्री नृसिंहसूरिणा विरचितायां रसज्ञभूषणव्याख्यायां रत्नाकरसमाख्यायां द्वितीयस्सर्गः समाप्तः ॥

231

Sl. No : 26391 **राघवपाण्डवीयम्** **Ms. No : P. 5835/1**

Beginning :

कल्याणं मे विधत्तां कमलजजनकः सृष्टिसंस्थानहेतुः
कान्ते गौराङ्गकान्त्यद्भुतकरकमलावासतासुप्रसिद्ध्यै ।
श्रीशेषाम्नायवाहः शुचिपतदृषभारोहणेनात्तयानः
सत्यं वाण्या श्रिया वा पतिरभिनुवतां सर्वसंपत्प्रदाय ॥

End :

श्रीधान्यं राष्ट्रमाञ्चत्सकलभुवि तदा वर्षरङ्गो यथेष्टं
गोसस्याद्यैर्जजृम्भे क्षितिरतिविततिर्नामशेषो बभूव ।
नास्तां रोगाय मृत्यू श्रुतिमलभत नो जारचोरप्रवृत्ति-
र्वृत्तिर्वर्णाश्रमाणां व्यजयत चरणैरास्त धर्मश्चतुर्भिः ॥

Colophon :

इति श्रीहयग्रीवानुग्रहसुग्रहसमग्रकविताविभवस्य इटिकेलकुलमण्डितयो लक्ष्मीदेव्यनन्तपण्डितयोः तनूभवस्य श्रीमदानन्दतीर्थगुरुकरुणालब्धवैष्णवकला-वितानस्य कृष्णपण्डित × × × स्य कृतौ सकलकविसंभाव्ये राघवपाण्डवीये महाकाव्ये अष्टमस्सर्गः ॥

232

Sl. No : 26392 **राघवपाण्डवीयव्याख्या** **Ms. No : P. 5835/2**

Beginning :

अधिगतशरचापो रामभूपालमेघो
महितमहितनूजा विद्युतालिङ्गिताङ्गः ।
निवसतु हृदये मे वर्धयन्नङ्कुराणि
प्रविमलकरुणाम्भोधारया चिन्मयानि ॥

End :

वर्णा ब्राह्मणादयः । आश्रमा ब्रह्मचर्यादयः । तेषां प्रवृत्तिर्वर्तनम् । व्यजयत सर्वोत्कर्षेणावर्तत । स्वस्वधर्मान् अनुलङ्घ्य बभौ इत्यर्थः । धर्मश्चतुर्भिश्चरणैरास्त अवर्तत ॥

Colophon :

इति डेङ्करमूडि रामसूरि विरचितायां राघवपाण्डवीयव्याख्यायां कल्पवल्ली समाख्यायामष्टमः सर्गः ॥

233

Sl. No : 26394 राघवपाण्डवीयव्याख्या Ms. No: A. 532

Beginning :

श्रीमान् शिवानन्द ईशवन्द्यो
भूयाद्विभूत्यै मुनिसुव्रतो वः ।
सद्धर्मसंभूतिनरेन्द्रपूज्यो
भिन्नेन्द्रनीलोल्लसदङ्गकान्तिः ॥
त्रैलोक्यकीर्तेश्चरणारविन्दं
पारे भवार्णादितरिं प्रणम्य ।
द्व्यासतां राघवपाण्डवीय-
टीकां करिष्ये पदकौमुदीं ताम् ॥

End :

लक्ष्यते- कान् अम्भोनिधीन् केनेव गाम्भीर्यादिगुणोपेतेन दिविन्दिनेव कथं उच्चैः श्रीदेव्या मातुः नन्दिनः पुत्रः स्थितः जगत्पतिः कथंभूतः वसुदेवतः प्रति वसुदेवस्य प्रतिनिधिः पुनः कथंभूतः उपदेवान् कस्याः नीतेः गुरुणा स्तिरिणा किमन्येकादशरथिनेति शेषः ॥

Colophon :

इति निरवद्यामण्डितपण्डितमण्डलीडितस्य षट्कर्मचक्रवर्तिनः श्रीमद्विनय चन्द्रपण्डितस्य गुरोरन्तेवासिनो देवनन्दिनाम्नः शिष्येण सकलकलकलोद्भव चारुचातुरीचन्द्रिकाचकोरेण नेमिचन्द्रेण विरचितायां द्विसन्धानकवेर्धनञ्जयस्य राघवपाण्डवीयापरनाम्नः काव्यस्य पदकौमुदीनाम दधानायां टीकायां नायकाभ्यु दयवर्णनं नामाष्टादशः सर्गः ॥

234

Sl. No : 26396 राघवयादवपाण्डवीयम् **Ms. No : P. 5150/3**

Beginning :

शुभदशरथवीरस्तामवन्नुग्रसेनः
पृथुभुजधृतराष्ट्रः पाण्डुकीर्यां प्रशस्तः ।
जगति यदुचितं तन्मानवानां प्रियं य
स्तदतनुत पूर्वाख्यातराजाध्वचारी ॥

End :

तत्तादृक् + सुरात्तसंमदभरश्रुत्वा तदीयाप्रियो-
दन्तं × श्रितबोधरोमशतउत्तत्स्थानदध्वाचितः ।
तीर्थाक्लिसमहोदरोऽत्र विजयप्राप्तेः पुरैह्यासिने-
त्युत्सुक्येष सहर्षिभिः श्रुतकथाः तादृग्बलो मन्त्रिभिः ॥

Colophon :

इत्यर्थरत्नाकरे द्वादशः तरङ्गः ॥

235

Sl. No : 26397 राघवयादवपाण्डवीयम् **Ms. No : P. 5161**

Beginning :

श्रीरामोऽस्मान्सकृष्णश्रितविजयबलो धर्मजन्मोरुकीर्ति-
र्भास्व + राग्र्यराजान्वयजनिरवतु स्फारशत्रुघ्नवीयः ।
स्वायत्तक्ष्माभवश्रीर्भरतनुतगुणो यो मारुतीजातसेव्यः
शत्यं श्री लक्ष्मणाग्रो भुविखरमहरक्रूरबाणस्वरूपम् ॥

End :

राकाकैरवपुण्डरीक स सुस्मेरेन्दमन्दाकिनी-
फेनैरावणदन्तनारदहसक्षीरब्धिलङ्घानपि ।
वाणीहारहराक्षसूत्रफणिराट्पाटीरलेपानपि
यः पाण्डुयशः परिहसति हि स्पर्धेनुदुग्धामलम् ॥

Colophon :

— —

236

Sl. No: 26398 राघवयादवपाण्डवीयव्याख्या **Ms. No : P. 5150/4**

Beginning :

शुभेति ।। या शुभदशा जैत्रश्रीसमन्विता रथवीरा रथप्रदानशूरा यस्य । पृथुभ्यां भुजाभ्यां धृतं राष्ट्रं यस्य पाण्डव्या कीर्त्या प्रशस्तः अग्रसेनः अतनुत ।।

End :

व्याख्या ।। तदीयप्रियोदन्तं कृष्णोऽविदर्भे स्त्रा प्रतीक्ष उपवने वर्तत इति श्रुत्वा श्रितबोधं अनिद्रं शठशं रोमाञ्चित इति यावत् । तादृक्षया ।। (?)

Colophon :

इत्यर्थरत्नाकरे द्वादशः तरङ्गः ।।

237

Sl. No : 26400 राघवयादवीयम् Ms. No : P. 295/1

Beginning :

वन्देहं देवन्तं श्रितं रन्तारं कालं भासा यः ।
राजो रामाधीराप्यागो लीलामारायोध्या × × ।।
साकेताख्या जायमसीचाविप्रादीसार्या धारा ।
पूरा जीता देवाद्या विश्वासाग्र्या सावाचारावा ।।

End :

साग्र्यावामरसागारामक्षमागनभारगौ ।
निजदे परदित्यासा श्रीरामे सुगराजहा ।।

Colophon :

इति श्रीमद्वादिहंसाम्बुदाचार्यवंशावतंसवापेजयसर्वप्रष्ठ + + श्रीमद्वेङ्कटाचार्ययज्वना रचितं राघवयादवीयं सम्पूर्णम् ।।

238

Sl. No : 26409 राघवयादवीयव्याख्या **Ms. No : P. 1991/2**

Beginning :

किञ्चित् सञ्चिन्तये गोपीकिलिकिञ्चितपञ्चितम् ।
अञ्चितं ज्योतिरमरैः अञ्जनाद्रावुदञ्चितम् ॥

आनुलोम्येन पाठे रामकथाप्रतिपादकैः प्रातिलोम्येन पाठे कृष्णकथा प्रतिपादकैश्च श्लोकैः परिष्कृतं राघवयादवीयाख्यं अतिदुष्करं प्रबन्धं प्रक्रम माणः + आरचयति– वन्देऽहमिति ॥

End :

श्रीमद्राघवयादवाकृतिधरः शेषाचलोत्तंसकः
श्रेयोहेतुमचीकरत्कृतिमिमां श्रासोमया दुष्कराम् ।
तस्मादत्र पवित्रमाधवकथास्वादोन्मिषत्कौतुकाः
सन्तः साधुविचिन्वतां गुणविदः श्लाघाममोघादराः ॥

Colophon :

श्रीमद्वादिहंसाम्बुदाचार्यवंशावतंस वाजपेयसर्वपृष्ठाप्तोर्यामादियाजिश्रीनिवासतनूभवस्य श्लेषयमकचक्रवर्तिनः रघुनाथाचार्ययज्वनः तनयेन श्रीमत्काञ्चीनगरवास्तव्येन श्रीमद्वेङ्कटाचार्ययज्वना विरचितं राघवयादवीयव्याख्यानं समाप्तम् ॥

239

Sl. No: 26413 राघवोदाहरणम् **Ms. No : P. 4697**

Beginning :

नवकुवलयगात्रो नव्य × नेत्रो
× तरणचरित्रो भाविताशेषमित्रः ।
चरणनतसुरेन्द्रश्चारुभावाभिसान्द्रः
परिणतगुणमन्द्रः पातु मां रामचन्द्रः ॥ +
आराद्विधत्ते प्रथमां प्रशस्याम् ॥

End :

श्रीराघवोदाहरणरव्य × ×
नारायणस्वामिकविप्रणीतम् ।

श्रीरामचन्द्रस्य चिरं प्रसादात्

× द्वीरादृतं स्यादधि × × ॥

Colophon :

इति श्रीनारायणस्वामिविरचितराघवोदाहरणं संपूर्णम् ॥

240

Sl. No : 26414 राजशेखरचरितम् Ms. No : P. 2878

Beginning :

श्रेयांसि मम भूयांसि दत्तां किमपि दैवतम् ।

भूषणं भीषणं यस्य मदनः सदनं रुषः ॥

नवीनकालिदासस्य शिष्यो भूष्यतमः सताम् ।

काव्यामृतरसाभिज्ञो नाम्ना रसिकशेखरः ॥

+ + + +

कविकुञ्जरनाम्नो मे प्रबन्धो रसबन्धुरः ।

सभारञ्जननामायं जयतु क्लेशभञ्जनः ॥

End :

हा हन्त कर्षणवरा तव वैरिभूपाल

वृत्तिं हरन्ति न इति त्वरयाभि धातुम् ॥

राजा नितान्तसन्तुष्टः तस्मै निजकर्णगते रत्नकुण्डले प्रायच्छत् ॥

Colophon :

इति श्री अभिनवकालिदासाख्यकविकुञ्जरकृतराजशेखरचरिते सभारञ्जन चरिते प्रथमोल्लासः ॥

241

Sl No : 26416 घटकर्परभेदिनी Ms No : B. 825

Beginning :

बालेनोद्धृतशैलेन यूना नारी सहस्रिणा ।

वृद्धेन धातृगुरुणा परवानस्मि वस्तुना ॥

कडमूरुपुरीविभुना तरुणाभरणेन सखि प्रहिता तरुणी ।
लतयेव वने घनकुञ्जघटे पथि राधिकया श्वयुजा जघटे ॥

End :

सालग्रामपुरीन्दोरुपकण्ठगतां सुमित्रसङ्गसखिम् ।
गणयित्वा ग्रहदूरां विचिनुनक्षत्रमालिकां विबुधाः ॥

Colophon :

इति सङ्कर्षणफणीन्द्रावतार श्री भाष्यकारवरवरगुरुपरब्रह्मतत्वदर्शनस्थापकश्रीमद्भाष्यकारसुदर्शनार्यकृतिषु घटकर्परभेदिनी नाम राधामाधवसंवादनक्षत्रमालिका समाप्ता ॥

Extra Information :

ग्रन्थान्ते अयं यमकविशेषश्लोकः दृश्यते ॥
घरे घारो घरा घारो धाराधर घराधरः ।
धाराधराधराधारा धुरन्धर धराधरम् ॥
कैकेकाःकंकरःकोककाकेंकिककेःक्रके ।
किंकेकुकाकुकाःकोकाःकैःकेकाकाकिकेककुः ॥

242

Sl. No : 26417 **राधाविनोदकाव्यम्** Ms. No : C. 1089/1

Beginning :

मालीनो वनमाली मालीनो वनमाली ।
मालीनो वनमाली मालीनो वनमाली ॥
विधुसुहृद्विरहानलपीडिता
विधुसुहृत्तरलानिलपीडिता ।
विधुसुहृद्वदनानिलपीडिता
विधुसुहृत्सुगिरोक्तिरपीडिता ॥

End:

रामचन्द्रकविना कविनादः
पुरुषोत्तमसुतेन सुतेन ।
राधिकाहृदयशोकदमासीत्
राधिकाहृदयशोकमादरात् ॥

Colophon :

इति राधिकाहृदयशोकदारुणं काव्यं समाप्तम् ॥

243

Sl. No : 26418 **राधाविनोदकाव्यव्याख्या** **Ms. No : C. 1089/2**

Beginning :

पितृवचनमवश्यमेवमाख्यं (?)
जयति जनैरिति शासितुं वनान्तम् ।
गतमिव करूणारसार्द्रचित्तं
रघुमपि कञ्चिदुपास्महे ससीतम् ॥
रङ्गनाथाङ्गजनुषा नारायणमनीषिणा ।
राधाविनोदकाव्यस्य व्याख्या व्याख्याययिष्यते ॥

End :

तस्य यः शोकः तप्ता × निबन्धनं यदुखं तदु यति खण्डयति तत्तादृशम् ॥

राधाविनोदकाव्यस्य व्याख्यानं स्वधिया व्यधात् ।
परोपकाररसिकाः शोधयन्तु तदादरात् ॥

Colophon :

इति श्री नारायणबुधविरचिता राधाविनोधकाव्य टीका समाप्ता ॥

244

Sl. No : 26419 **रामकथासुधोदयः** **Ms. No : P. 595**

Beginning :

अङ्कालङ्कारपङ्केरुहगृहमतेळं केन्दुबृन्दप्रसन्नं
चिन्मुद्राव्यस्तकारि प्रवरदरलसद्धस्तोघसङ्घम् । (?)
तं वाचां चारुमोचा रसनिचयमुचां दायकं पादभाजा
× × × भजहृदय हयग्रीवमासीनमब्जे ॥

End :

यतः प्रवृत्तिर्जगतोऽस्य शाश्वती
यदाश्रिता विश्वसमृद्धिविश्रुता ।
निजात्मभूतैर्गुरुभिश्च सूरिभिः-
स प्रीयतां स्वस्तुतितः श्रियः पतिः ॥

Colophon:

इति श्रीशैल + + श्रीनिवासविरचिते श्रीरामकथासुधोदये युद्ध काण्ड: समाप्तः ॥

245

Sl: No: 26420 रामकर्णामृतम् Ms. No: C. 527

Beginning :

उत्फुल्लामलकोमलोत्पलदळश्यामाय रामात्मनः-
कामाय प्रथमाय निर्मलगुणारामाय रामात्मने ।
ध्यानाधारमुनींद्रमानससरोहंसाय संसार-
विध्वंसाय स्फुरदोजसे रघुकुलोत्तंसाय पुम्से नमः॥
रामस्सीतासमेतो निवसतु हृदये सानुजं राममीडे
रामेण क्षीणपापस्त्रिविधमपि कृतं कर्म रामाय दध्यात् ।
रामादन्यं न जाने सततमपि द्रुहे रामनामस्य कामान्-
रामे पश्यामि विश्वं भुवनमनुदिनं पाहि मां राम राम ॥

End :

कामं सन्तु सहस्रशः कतिपये सारस्य धौरेयकाः
कामं वा कमनीयतापरिणतिस्वाराज्यबद्धव्रताः ।
नैवैव (?) विवदामहे न च वयं देवप्रियं ब्रूमहे
यत्सत्यं रमणीयतापरिणतिस्त्वय्येव सारङ्गगतः ॥
श्रीरामचन्द्रः श्रितपारिजातः समस्तकल्याणगुणाभिरामः ।
सीतामुखाम्भोरुहचञ्चरीको निरन्तरं मङ्गलमातनोतु ॥

Colophon :

रामकर्णामृते द्वितीयशतकं सम्पूर्णम् ॥

246

Sl No: 26421 रामकर्णामृतम् Ms No: P. 1233/2

Beginning :

साकेते कनकाद्रिशृङ्गखचिते दिव्याम्बरालङ्कृते
हेमस्तम्भसुवर्णसूत्रघटिते तारापथात्युन्नते ।

रम्ये स्वर्णमये विचित्रभवने दीप्यन्तमक्षैर्मुदा
रामं स्मेरमुखाम्बुजं रघुपतिं सीतासमेतं भजे ॥

End :

तावद्गर्जन्ति पापाद्याः शरीरारण्यमाश्रिताः ।
यावन्न क्रियते रामनामपञ्चाननध्वनिः ॥
ब्रह्महत्यादिपापानि बहुजन्मार्जितान्यपि ।
नश्यन्त्येव × देहो रामस्य वचनं यथा ॥

Colophon :

श्रीरामकर्णामृतं सम्पूर्णम् ॥

247

Sl No : 26426 रामकृष्णविलोमकाव्यम् Ms No: P. 9290/2

Beginning :

तं भूसुतामुक्तिमुदारहासं
वन्दे यतो भव्यभवं दया श्रीः ।
श्री यादवं भव्यमतोयदेवं
संहारदामुक्तिमुतासुभूतम् ॥

End :

एवं विलोमाक्षरकाव्यकर्तुः
भूयस्सभायां समवेक्षत ज्ञाः ।
जानन्त्विमां चित्रकवित्वसीमां
दैवज्ञसूर्याभिधसंप्रदिष्टाम् ॥

Colophon :

इति श्रीदैवज्ञपण्डितसूर्यकविविरचितं विलोमाक्षररामकृष्णकाव्यं समाप्तम् ॥

248

Sl. No : 26431 रामकृष्णविलोमकाव्यव्याख्या Ms. No : C. 1702/2

Beginning :

श्रीमन्मङ्गलमूर्तिमार्तिशमनं नत्वा विदित्वा ततः
शब्दब्रह्म मनोरमं सुगणकज्ञानाधिराजात्मजः ।

यद्ग्रन्थाध्ययने विनेयनिवहोऽप्याचार्यचर्यामगात्
सोऽयं सूर्यव × विलोमरचनाकाव्यं करोम्यद्भुतम् ॥
अथ ययोः कथाप्रसङ्गः तावेवेष्टदेवतात्वेन प्रणमति ॥ तं भूसुतामुक्ति वन्दे ॥ भूसुतायाः मुक्तिः यस्माच्चथा ॥

End :

अत्र योग्यपदेनोभयोः तयोः शोभातिशयः सूचितः । कामिकराका सन्ध्यारागकरमिव पूर्णचन्द्रोपालक्षिता राकासन्ध्या रागाकारं यथा भाति शयशालिनी भवति तद्वदित्यर्थः ॥ (?)

Colophon :

— — —

249

Sl. No : 26434 रामगीतम् Ms. No : P. 932/7

Beginning :

जयतु जननभावो जातकारुण्यभावो
निटिलनयनबन्धो नीतिशास्त्राभिनन्दाः ।
गुणगणमणिभूषो गुप्तमन्त्रैर्विशेषो
रघुकुलनृपभाग्यो रामचन्द्रस्स सेव्यः ॥

End :

मुनिजनविमलिनचित्तुङ्ग × × यो
मुख्यस्सकलेषु गणयेद्योगी जगद्योन
तत्सार्थं स्वस्ति च वर्धतेऽप्यनुपदउ × स्मे यतश्शलवः ।
× × त्येत्ररमापतिस्त्वकथनं यस्यैव यस्मिन् दया
स त्वं सर्वविभक्तित्रयहृदयश्रीरामचन्द्रावमाम् ॥

Colophon:

— — —

250

Sl No 26435 रामचन्द्रविजयः Ms No: P. 7404

Beginning :

श्रियं विधेयाच्चरणारविन्द-
द्वयं चिरं नः पुरुषोत्तमस्य ।

यतात्मनां यत्र तपोधनानां
मनांसि लग्नानि मधुव्रतं ते ॥
× × चकास्त पारे सरयूप्रतीतः
प्रसन्नवास्त × जनः प्रसन्नः ।
सस्यैः प्रशस्यैरभिदीपिताशः
देशो महानुत्तरकोसलाख्यः ॥

End :

ते वीरवादमुख × ×
सैन्यं प्रविश्य सहसा कपियूथपानाम् ।
सारावधीरितधराधरसार्वभौमो
धारा × × रमभ्यवाप ॥
प्रत्यघ्नतां समिति तत्र सहस्रसङ्ख्यैः × ×

Colophon :

९२ तमे पत्रे —
श्रीमत्कौशिकतापसान्वयपयोवाराशिताराधिभू-
र्विद्वान्योऽजनि वेङ्कटेश्वरकवेः श्रीपेरुभट्टाह्वयः ।
सर्गः साधुजनप्रशस्यवचसा तेन प्रणीते महा-
काव्ये दीव्यति रामचन्द्रविजये पूर्णोऽयमेकादशः ॥

251

Sl. No : 26436 रामचन्द्रोदयः Ms. No : P. 2102

Beginning :

श्रिया च भूम्या कविताश्च नीलया
निशम्य वाचः सदृशीः सुधाझ × ।
× × हरिः ॥
जनावलीनां प्रमद × वितन्वतां
धराधिपानां रघुवंशजन्मनाम् ।
लसत्ययोध्येति मनीषिभिः ×
महीय × × ॥

End :

दृष्ट्वा च दन्तानधरं भवत्याः
कान्ते समायान्ति शुकाः पिकाश्च ।
हर्षान्मयूरा अपि केशभारं
निरीक्ष्य नृत्यन्ति नृपेन्द्रपुत्रि ॥

Colophon :

इति षष्ठः सर्गः । १७ तमे पत्रे ॥

252

Sl. No : 26439 **रामचन्द्रोदयकाव्यव्याख्या** **Ms. No : P. 1376**

Beginning :

श्रीमान् गोपालराय क्षितिरमणमणिर्जन्पलीवंशदीप्रः
स्वोक्तश्रीरामचन्द्रोदय यमकमहाकाव्यमत्यर्थनीयम् ।
व्याख्याति ख्यातिमिच्छुः स्वयमयमधुना सर्वभूतानुभावो
मन्दात्मानुग्रहार्थं सततवितरणन्यक्कृतामर्त्यभूजः ॥

End :

अयता-प्राप्ता अयतेः कर्मणि क्तः तां इषुं क-कस्मिन् प्रदेशे असनं क्षेपणं अस्यतेर्ल्युट् गमयेय ×

Colophon :

इति गोपालराजेन्द्रविरचितायां रामचन्द्रोदयव्याख्यायां विज्ञेयार्थदर्पण समाख्यायां चतुर्थोच्छ्वासः ॥

253

Sl. No : 26442 **रामचन्द्रोदयकाव्यव्याख्या** **Ms. No : P. 3962**

Beginning :

श्रीरामोदयात्सोऽस्मभ्यं दीक्षितधरामेदेयात् ।
स्तुतिशिरामोदयायाद्यत्पदपद्मोरलेवरामोदेयात् ॥
सा नः सीतारामजनेः पतनमंहसीतारामा ।
इमा विनीतानामा सूतजनाद्यमहीयसीतानामा ॥

End :

महाभाष्यप्रयोगात्त्रपुंसकमप्यस्तीत्यत्र नपुंसकप्रयोगः । अत एव दक्षिणं दोर्निशाचर इति भट्टिः आप्य प्राप्य तत्र स्थित्वेत्यर्थः ॥ अभ्यमोदत मुमुदे ।

वसन्ततिलकावृत्तम् । उक्ता वसन्ततिलका तभजाजगौग: इति लक्षणात् । शेषं पूर्ववदेव ज्ञेयम् ॥

Colophon :

इति श्रीमद्रामचन्द्रचरणारविन्दमकरन्दास्वादमुदितमनोमिलिन्देन समस्त विद्वज्जनजेगीयमाननिरवद्यनिखिलविद्यावैशद्येन दशदिशासीममुक्ताकलापाय मानयश:कलापेन श्रीमज्जन्मंपल्ली वेङ्कप्पेन्द्रक्ष्माभृत्कुमारेण वीरमाम्बागर्भ शुक्तिमुक्ताफलेन गोपालरायराजेन्द्रेन विरचितायां श्री रामचन्द्रोदयव्याख्यायां विज्ञेयार्थदर्पणसमाख्यायां पञ्चम आश्वास: ॥

254

Sl. No : 26443 रामचरितम् Ms. No : B . 1030

Beginning :

अस्ति त्रयाणां जगतां निदानं
नारायणो नाम सुराधिनाथ: ।
विराजमान: फणिराजतल्पे
पीयूषमानाविव कृष्णसार: ॥
सुवर्णचूर्णद्युतितुल्यकान्त्या
समं श्रित: सागरकन्यया य: ।
विभाति गारुत्मतचारुदेह:
क्षणप्रभावानिव कालमेघ: ॥

End :

वने तस्मिन्नेवं खलु विहरतस्तस्य नृपते:
ऋषीन्द्राणामन्त: प्रमदमनिशं कन्दलयत: ।
अविज्ञातप्राया: प्रययुरधिकद्वादश समा:
मनोवृत्ति: कालं ह्रसयति परं द्राघयति च ॥

Colophon :

इति श्रीरामचरिते महाकाव्ये नवम: सर्ग: ॥

255

Sl. No : 26444 | रामचरितम् | Ms No: B. 1031

Beginning :

अथैकदा तत्र वने यदृच्छया
समागता शूर्पनखेति विश्रुता ।
निशाचरी निस्तुलरूपसंपदं
ददर्श रामं दयितासमन्वितम् ।।

End :

एवं वाक्येऽमृतरसमये सुप्रसादाभिराम-
स्वामिस्फीतामृतकरमुखाभ्यन्तरस्यन्दमाने ।
पातुं योग्ये विबुधनिकरैः वर्धमानो हनूमान्
गम्भीरात्मा सलिलधिरिव क्षोभमग्र्यं प्रपेदे ।।
वक्ता रामो हरिः साक्षात्सुग्रीवश्च हरीश्वरः ।
श्रोता हनूमानत्रान्ये हरयश्चाङ्गदादयः ।।

Colophon :

इति श्रीरामचरिते महाकाव्ये विंशः सर्गः समाप्तः ।।

256

Sl. No : 26445 | रामचरितम् | Ms. No : B 1032

Beginning :

ते मूर्ध्नि कृत्वा हरिनायकस्य
तच्छासनं दारुणशासनस्य ।
सीतां विचेतुं हरितः समन्तात्
सर्वे यथोक्तं प्रययुः प्रहृष्टाः ।।

End :

विष्णुस्साक्षान्निजांशैः सह जयविजयौ रावणं कुम्भकर्णं
भृत्यावुद्धर्तुमिच्छन् दशरथभवने शक्तिपूर्णोऽवतीर्णः ।
यश्चक्रे च स्वकीर्तिं त्रिजगति विततामिष्टसिध्यै जनानां
स त्वं मां पाहि सीतारमण गुणनिधे राम लोकाभिराम ।।

इक्कावाख्यमहीश्वरीप्रियसुतः कुण्डुण्णिधात्रीपतेः
शिष्यः शम्भुसुतापदाब्जमधुपः कोंचुण्णि नाम्नास्ति यः ।
पूर्वं श्रीयुवभूमिपार्धरचितं काल्याः कुरुम्बाटवी-
स्थायिन्याः कृपयैव रामचरितं तेनेदमापूरितम् ॥

Colophon :

इति श्रीरामचरिते महाकाव्ये द्वात्रिंशः सर्गः ॥ समाप्तं च पूर्वचरितम् ॥

257

Sl. No : 26446 रामचरितम् Ms. No : B 1033/1

Beginning :

श्रिया समेतं मिथिलेन्द्रकन्यया
रघुप्रवीरं निहताखिलाहितम् ।
अवाप्तराज्यं मुनयोऽभिनन्दितुं
समाययुस्तत्र घटोद्भवादयः ॥

End :

सरसिजनयनस्य राममूर्तेः
चरितमिदं पठितं श्रुतं स्मृतं वा ।
कलिशमलजयं करिष्यसि द्राक्
सकलजनस्य तथा यथाम्बु गाङ्गम् ॥
इक्कावाख्यमहीश्वरीप्रियसुतः कुण्डुण्णिधात्रीपतेः
शिष्यः शम्भुसुताङ्घ्रिपद्ममधुपः कोंचुण्णि नामास्ति यः ।
एतत्पश्चिमसागराधिपतिना तेनोत्तरं निर्मितं
भूयात्सच्छ्रवणेषु रामचरितं प्रीत्यै च काल्याः शुभम् ॥

Colophon :

इत्युत्तरे श्रीरामचरिते महाकाव्ये अष्टमः सर्गः समाप्तः ॥

258

Sl. No: 26447 रामचरित्रकाव्यम् Ms. No : C . 1703

Beginning :

प्रणम्य कल्याणगुणाभिरामं
रायं गुरुं पूर्वगुरूंस्तथान्यान् ।

बक्ष्यामि रामस्य कथां विशुद्ध्यै
हिताय बा × स्य च सुग्रहेण ॥
कश्च × दिभिर्देवैरीडितो गरुडध्वजः ।
जज्ञे दशरथाद्देवो रामः सम्पूर्णलक्षणः ॥

End :

रामस्ततोदारसहस्ररश्मि
× प्रनन्दमिन्दुरिव सन्ततमादधानः ।
रज्यं चकार मय × र्त्यं
सीता × ण × परमादरेण ॥

Colophon :

इति श्रीमद्रामचरिते + भाष्य रघुनाथाचार्यविरचिते पञ्चमः सर्गः ॥

259

Sl. No : 26448 रामविलासव्याख्या Ms. No : P. 3454/1

Beginning :

श्रीमानाश्रितकल्पद्रुः सीतारामार्यदेशिकः ।
वितनोतु श्रियं श्रीशः सेवाय × प्रवर्तकः ॥
वैदेहीनयनानन्ददायकं रघुनायम् ।
वन्दे वाक्पङ्कजाम्भोजवान्धवं लोकवान्धवम् ॥

अथात्र कविर्भागवतशास्त्रानुसारेण भानुकुलावनिपालपरम्परां यथाक्रमं तत्तन्महिमानुवर्णनपूर्वकं प्रदर्श्य तत्कुलालंकारभूतस्य भगवतः सीतापतेः निजमनीषानुगुणं ग्रन्थादौ मङ्गलमभिधत्ते सीतेति ॥

End :

दुर्लभानपि दुःखेनापि लब्धुमशक्यानपि द्वीपान्तरलोकान्तरस्थानपीत्यर्थः । अभिलषितान् पदार्थान् क्षणात् तत्क्षण एव अशयन् भोजयन् निर्वर्तिं सुखानुभूतिमवाप प्रासवान् । तदभिलषिपतदार्थसमर्पण × अतिसुखितो बभूवेति भावः ॥

Colophon :

इति श्रीरामविलसितव्याख्यायां प्रहर्षणीसंज्ञायां प्रथमः सर्गः ॥

260

Sl. No : 26451 | रामामृतम् | Ms. No: P. 2647

Beginning :

श्रियः पतिं हृदि ध्यात्वा ध्यात्वा गुरुपरम्पराम् ।
रामामृतमहं वच्मि बालबोधाय बालिशः ॥
पुरासीत् ब्रह्मपुत्रस्य पुलस्त्यस्य सुतो मुनेः ।
विश्रवा इति तस्यास्तां द्वे भार्ये तपसां निधेः ॥

End :

इत्थं दाशरथिर्वीरो निरहन्निर्जित्य लब्ध्वा प्रियां
राज्यं चानुजसंवृतो बुधजनं सन्तोषयन् सन्ततम् ।
यः कीर्त्या शक्रसमोऽश्वमेधशतकं कृत्वेशंश्वकवत् (?)
साकेतेऽयुतवत्सरानुदवसत्कुर्वन् जगन्मङ्गळम् ॥

Colophon :

इति रामामृते षष्ठः सर्गः । रामामृतं संपूर्णम् ॥

261

Sl. No : 26452 | रामायणसंग्रहः | Ms. No: P. 5661

Beginning :

श्रीरीक्षावनमण्डनं श्रुति × सीमन्तसीमोल्लस
त्सि × राघ्रणितां × विश्वजननस्थेमान्तलीलान्तरम् ।
कल्याणास्पदमस्तु हेयमसमं कल्याणवल्लीसखं
प्राप्यं तत्खलु वीरराघवपरब्रह्म प्रपद्यामहे ॥

End :

श्रीवत्सान्वयसिन्धुकौस्तुभमणिः श्रीवेङ्कटार्यः पिता
माध्वी यस्य हि राघवार्यविदुषः श्रीशैलनाम्नी प्रसूः ।
तेनैवं रचितं सता किल कृपामालम्ब्य लोकोत्तरं
सर्वस्मात् जयत श्रीयोत्तरमिदं रामायणं सन्ततम् ॥

Colophon :

इत्युत्तरकाण्डः समाप्तः ॥

262

Sl. No : 26454 रामायणसारः Ms. No: A. 704

Beginning :

लक्ष्मीं दिशेल्लक्ष्मणपूर्वजन्मा
वीरो रघूणां विजयं प्रयच्छेत् ।
अरोग्यमर्काग्निजनश्च दद्या-
द्रतीशमूर्ती रघुनाथनेतुः ॥ + +
सुमुखि मयि शयाने स्वप्नदृष्टो रजन्यां
रघुपतिरनुयातो मैथिलीलक्ष्मणाभ्याम् ।
वदतु मधुरवाणी मच्चरित्रप्रबन्धं
शुभकरमिति सोऽयं वत्सलत्वादवादीत् ॥

End :

अर्थव्यक्त्यवलम्बचम्पुरचनाधौरन्धरीधन्यया
देव्योद्यन्मतिसव्यया मधुरवाण्यम्बाख्यया निर्मिते ।
श्रीरामायणनामनि महाकाव्येऽतिभव्ये सुधी-
वर्गस्तोत्रपदे चतुर्दशतया सर्गः प्रशस्तोऽभवत् ॥

Colophon :

इति श्रीरामायणसारकाव्ये चतुर्दशः सर्गः ॥

263

Sl. No : 26455 रामार्याशतकम् Ms. No : C. 2943/1

Beginning :

त्वयि विमुखे मखमुख्ये
सख्ये नान्यस्य कस्य जीवामि ।
जीवामि च भवदर्पितवसना-
शनमात्रजीवनाः सर्वे ॥

End

धनुषा रिपुजयजनुषा
रुचिरतराकारनिर्जिताम्बुधरा ।

तरुणारुणनिभचरणा

काचन करुणा रुणद्धि मे हृदयम् ॥

Colophon :

इति श्रीविद्वन्मुकुटमुद्गलभट्टविरचितं रामार्याशतमष्टाधिकं संपूर्णम् ॥

264

Sl. No : 26457 रामाह्निकम् Ms. No : C. 2294/1

Beginning :

शक्तिर्येषां च पुंसां भवति न कविता लोकशास्त्रार्थवे·

ज्ञानैः पुण्यं चैव नोवाभ्यसनमपि तथा शिक्षपाकाव्यगानाम् ।

काव्यं कुर्वंति तेऽपि प्रचुरगुणयुतं य × पातो लभन्ते

प्रेमां णे चाप्यलभ्य तदवनितनया पाद प्रणमामि ॥ (?)

End :

कापि चतुरासखी सुचिकर्था

वह विधांयाथ शतस्य शयनी ।

य सविधे कथयते जा × रुकवज्रो

वाथयचे कमिथा वादयत्परित आगरमयतैः ॥

विश्वनाथानुमतोदित × मि

दमद्भुतं योऽनुकुरुते वनुकालम् ।

तस्य स × पति सुप्रसन्नो भवति

तस्य नह्यति भव × धज × म् ॥ (?)

Colophon :

— — —

265

Sl. No : 26460 भट्टिकाव्यम् Ms. No : P. 8488

Beginning :

अभूत्नृपो . . . . . परं तपः

शृताभितो दशरथ इत्युश × × ।

गुणैर्वरं भवनहितच्छलेन
यं सनातनः पितरमुपागन त्स्वयम् ॥ + +

End :

ईर्ष्याविरूग्णाः स्थिरबद्धमूला
निरस्तनि × षमभप्रतानाः ।
आप्यायिता नेत्रजलप्रसेकैः
प्रेमद्रुमाः संरुरुहुः प्रियायाः ॥ + +

Colophon :

[इति श्री भट्टिकाव्ये प्रसन्नकाण्डे काव्यालङ्कारो नाम दशमः सर्गः ॥]

266

Sl. No : 26461 भट्टिकाव्यम् Ms. No: P. 9504/1

Beginning :

ततो दशास्यः स्मरविह्वलात्मा
चारप्रकाशीकृतशत्रुशक्तिः ।
विमोह्य मायामयराममूर्ध्ना
सीतामनीकं प्रजिघाय योद्धुम् ॥

End :

आबध्नन् कपिवदनानि सुप्रहास्यं
प्राशंसत्सुरसमितिं प्रपद्य रामम् ।
आसीच्च क्षपित × संपत्
पौलस्त्यो जुषत शुचं विपन्नबन्धुः ॥

Colophon :

इति भट्टिकाव्ये सप्तदशः सर्गः ॥

267

Sl. No : 26462 भट्टिकाव्यव्याख्या Ms. No : P. 3873

Beginning :

× सकलवेदिनमतिदुस्तरभट्टिकाव्यसलिलनिधेः ।
जयमङ्गलेति नाम्ना नौकेव × ×

× अत्र विदुषां प्रदर्शयितुं श्रीस्वामिसूनुः कविभट्टिनामा रामकथाश्रय महाकाव्यं चकार।

End :

उदीर्णदैन्याः × × येषामितिहस्तं प्रहस्तञ्च हतं मृतमुच्चैराचख्युः। आख्यातवन्तः रावणायेत्यर्थात्॥

Colophon :

इति भट्टिकाव्यटीकायां जयमङ्गलायां तिङन्तकाण्डे लिङ्विलसितं नाम प्रथमपरिच्छेदः। काव्यस्य चतुर्दशः सर्गः॥

268

Sl. No: 26467 रुक्मिणीकल्याणम् Ms. No: P. 3341

Beginning :

वामालकाव × लभभावमुद्रा
समा × गेणीशिलेव।
रोमावली राजति यस्य मध्ये
सीमावतंसस्ससुखाय भूयात्॥ + +
अध्यास्य तञ्जानगरीममुष्मिन्
सर्व × शासति सार्वभौमे।
श्रीराजचूडामणियायजूकः
चित्रं निबध्नाति हरेश्चरित्रम्॥

End :

तारानाथशि × ककुसंमेहिकया धाराग्रहान्तरे (?)
पाटीरद्रव × लममणि × ञ्च समासेदिवान्।
फुल्लन्मल्लिमरन्दपूरशशिरे भूवल्लभो निष्कुटे
तन्वी सूक्तिभिरेव घर्ममनयत् तचाहशानन्दतः॥

Colophon :

इति दन्तियोतिदिवाप्रदीपाङ्गसत्यमङ्गलरत्नखेट श्री श्रीनिवासदीक्षित-तनयस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वरदीक्षितगुरुचरणसहजता-ब्रह्मविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षितस्य कृतिषु रुक्मिणीकल्याणनाम्नि काव्ये सप्तमस्सर्गः॥

269

Sl. No : 26468 | रुक्मिणीशविजयः | Ms. No : C. 1671/1

Beginning :

स यामुनाम्भस्यवगाहनोत्थं
शरीरशैत्यं शमयन्निवेशः ।
निशि प्रवृद्धं नवकाननाग्नि
पपौ दयालुस्स्वजनस्य गुप्त्यै ॥

End :

रागं पयोधरतटे हरिदङ्गनानां
रागी समर्प्य सविता समगादगान्तम् ।
कूजद्विहङ्गमरवैरिव ता रुदन्त्यो
भेजुस्तमस्ततिमथान्तरिवोरुमूर्छाम् ॥
अम्बोधिहृत्कृतपदं प्रतिरूपमर्कः
संदृश्य साधु धवलीकृततज्जलौघम् ।
शान्तो हि सर्वहृदयं गमतामुपैती-
त्यन्ते शमं समधिगम्य विवेश सोऽब्धिम् ॥

Colophon :

— — —

270

Sl. No : 26470 | रुक्मिणीशविजयः | Ms. No: C. 1672/1

Beginning :

श्रीवेदान्तमहाचलं हि परितः संयोज्य सूत्राहिपं
सद्भावागमपोषितारमहृदयं तत्पूर्वपक्षासुरैः ।
सिद्धान्तोक्तिसुरेश्च रैश्च मथितो यः कृष्णदुग्धाम्बुधिः
स्वीयानाममृतं प्रयच्छति स मां पायाद्गुणोद्यन्मणिः ॥

End :

रोम्णां हर्षणकारिणि श्रवणतः पापौघविध्वंसिनि
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सर्गोऽभूत्कुसुमस्तबकेषु सुतरामेकोनविंशो मुदाम् ॥

Colophon :

ओमिति श्रीमदानन्दतीर्थभगवत्पादविशिष्टप्रतिमारूपभविष्यद्भारतीसमेत श्रीमद्वादिराजपूज्यचरणविरचिते महाकाव्ये श्रीमद्रुक्मिणीशविजये एकोन-विंशस्सर्गः ॥

271

Sl. No : 26477 — रुक्मिणीशविजयव्याख्या — Ms. No : C. 1672/2

Beginning :

दशनमुद्दगोष्ठं यस्य सौन्दर्यवल्ली
कुसुमवदभिरामं पञ्चबाणान्विधाय ।
धनुरपि रतिजानिर्भूलतां वल्लवीनां
निवहमजयदस्मान्पात्वसौ रुक्मिणीशः ॥
वादिराजोक्तिचातुर्यमशक्यं ज्ञातुमञ्जसा ।
तथापि वक्ष्ये तच्छिक्षामनुसृत्यापि लेशतः ॥
मङ्गलमाचरति श्रीवेदान्तेति । अत्र श्रीशब्दः पूज्यत्ववचनः —

End :

सकलसज्जनमनस्तोषणकरतया दिक्षुदिक्षु बुधश्लाघ्यतरं करोत्वित्यर्थः । हरि चरणसमर्पणानन्तरं लक्ष्म्यादीनां प्रियत्वोक्तेस्तेषां तद्दासतापि सूचितेति सर्वमव दातम् । रोम्णामिति । सुरमण्डलीषु मुदामेकोनविंशतसर्गरूपस्सर्गोऽभूदित्यर्थः ॥

Colophon :

ओमिति श्रीमत्कविकुलतिलकश्रीमद्वागीशतीर्थश्रीमच्चरणकरकमलसञ्जात-श्रीमद्वादिराजपूज्यतीर्थश्रीमच्चरणविरचितस्य श्रीमद्रुक्मिणीशविजयाख्यमहा-काव्यस्य टीकायां लक्ष्मीपतिभट्टोपाध्यायसूनुनारायणाचार्येण कृतायां गुरुभाव-प्रकाशिकायां एकोनविंशस्सर्गः ॥

272

Sl. No : 26482 — लक्ष्मीकाव्यम् — Ms. No : B. 1049

Beginning :

× मुकुन्दमूर्तेरपरावतारः ॥
पुत्रीकृतो रङ्गधुरन्धरेण
पाराशरः कूरकुलाधिनाथः ।

गोविन्दशिष्यः स तु यामुनार्य-
मनोरथं पूरितवान् द्वितीयम् ॥

End :

हेतीशद्विजकुलराजरक्ष्यमाणे
द्वारे तानवनिपतीन्विसृज्य रङ्गी ।
रङ्गाख्यं मणिमयमङ्कणं ×
× × × × × ॥

Colophon :

इति चतुर्थः सर्गः ॥

Extra Information :

प्रथमसर्गान्ते —

तस्यैवोच्चमरायसतिरुमलाधीशप्रबन्धः कृतौ ।
लक्ष्मीकाव्य उदारवैभवतियौ सर्गोऽयमादिर्गतः ॥

273

Sl. No : 26485 लक्ष्मीसहस्रम् Ms. No : P. 1578/2

Beginning :

लक्ष्मीचरणराजीवलाक्षालक्षितवक्षसे ।
विश्वसर्गादिलीलाय वेङ्कटब्रह्मणे नमः ॥
असहशकरूणाव्जदर्शं × ×

End :

पौत्रेणात्रेयगोत्राभरण ×. यचणश्रीनिवासाध्वरीन्द्रोः +
वेदान्तचार्यपादाम्बुजनिहितहृदा वेङ्कटार्येण क्लृप्तं
रम्यं लक्ष्मीसहस्रं पठत दृढतरं नित्यकल्याणकामाः ॥

Colophon:

इति काञ्चीनगरनायकतातयार्यभागिनेयवेङ्कटाचार्ययज्वना विरचितं लक्ष्मी-
सहस्रं संपूर्णम् ॥

274

Sl. No : 26487 लघुशङ्करविजयः Ms. No : B. 230/3

Beginning :

परशिवविष्णु विरञ्चीन् वसिष्ठशक्ती पराशरव्यासौ ।
शुकगौडपादसंज्ञौ वन्दे गोविन्दशङ्करौ क्रमशः ॥

सहस्रद्वितयादूर्ध्वं सारस्वतमुखे द्विजाः ।
सारस्वतास्तथा गौडा मिश्राः कर्णिजना द्विजाः ॥

End :

गुरुवरशंकरविजयं सुवरेण्यं श्रावयेच्च यो नृभ्यः ।
स एति गुरुकारुण्यं सुखमैहिकमपि परत्र चाभ्येति ।
शंकरविजयमिमं ये शङ्करतुष्ट्यै पठन्ति नित्यं ते ॥

Colophon :

इति श्रीमत्परमहंसबालकृष्णब्रह्मानन्दप्रणीतशङ्करविजयस्समाप्तः ॥

Extra information :

नागाक्षाशेन्दुसंख्येके शालिवाहशकेऽमुके ।
क्षयाब्दे भाद्रशुक्लायां नवम्यामलिखन्मुनिः ॥

275

Sl. No : 26490 लीलावतीसन्देशः Ms. No : P . 3786/2

Beginning :

निस्सीमोदयमानयव्यनवती लीलावती कामतो
नित्योज्जृम्भदम्भकुम्भकुचसंश्लेषं चिरं तन्वती ।
आढ्यं भावुकतावकीनकुशलं पृष्ट्वाऽगदद्यद्भवान्
गोपीजारविदांकरोतु सरसं तद्वाचिकं सादरम् ॥

End :

इत्थं निगद्य कृ × × × लय
ह्रीरानम्र खिन्नवदना × रुणी तवेयम् ।
नोवाच किञ्चिदधगद्गद ×   थ
कठोरमेष × मलयाशुतरं वराकीम् ॥

Colophon :

— — — —

276

Sl No 26491 | वराङ्गचरितम् | Ms No: A. 784

Beginning:

अर्हस्त्रिलोकमहितो हितकृत्प्रजानां
धर्मोऽर्हतो भगवतस्त्रिजद्वरेण्यः।
ज्ञानं च यस्य सचराचरभावदर्शि
रत्नत्रयं तदहमप्रतिमं नमामि ॥

End:

तद्भक्त्या चरितमिदं मुनीश्वरस्य
श्रीकीर्तिद्युतिमतिसत्वसंयुतस्य।
संश्रृण्वन् परिकथयन् पठन् स्मरन् यः
सोऽवश्यं ध्रुवमतुलं पदं प्रयाति ॥

Colophon:

इति धर्मकथोद्देशे चतुर्वर्गसमन्विते स्फुटशब्दार्थसन्दर्भे वराङ्गचरिते वराङ्गर्षिसर्वार्थसिद्धिगमनं नाम एकत्रिंशतितमः सर्गः ॥

Extra Information:

स्वस्ति श्रीशकवर्षे १८० बहुधान्यसंवत्सरे मार्गशिरमासे शुक्लपक्ष चतुर्दश्यां रविवासरे ओडयप्पविप्रेण लिखितम् ॥

277

Sl. No: 26493 | वर्धमानचरितम् | Ms. No: A. 59

Beginning:

श्रियं त्रिलोकीतिलकायमाना-
मात्यन्तिकीं ज्ञानसमस्ततत्वाम्।
उपागतं सन्मतिमुज्वलोक्तिं
वन्दे जिनेन्द्रं हतमोहतन्द्रम् ॥
नापेक्षतेऽर्थापचयं न कष्टं
न वृत्तभङ्गं सुविनापशब्दम्।
मूढीकृतरसन् रसिकत्ववृत्या
कविश्च वेश्यार्पितमानसश्च ॥

तथापि पुण्यास्रवहेतुभूत-
मित्यात्मशक्त्या चरितं प्रवक्तुम् ।
श्रीवर्धमानस्य समुद्यतोऽहं
फलार्थिनां नास्ति हि दुष्करेच्छा ॥

End :

इत्थं कल्याणमुच्चैः सपदिजिनपतेः पञ्चमं तस्य कृत्वा
भूयान्नोप्यस्य भक्त्या भ्रुवमनतिचिरात् सिद्धिसौख्यस्य सिद्धिः ।
इत्यन्तश्चिन्तयन्तस्तुतिमुखरमुखास्तं प्रदेशं परीत्य
प्रीतश्शक्रादयः स्वं प्रतिययुरमरा धाम संपूज्य संपत् ॥

Colophon :

इत्यसगकृते वर्धमानचरिते महाकाव्ये भगवन्निर्वाणगमनो नाम अष्टादश सर्गः समाप्तः ॥

278

Sl. No : 26494 | विक्रमाङ्कदेवचरितम् | Ms. No : P. 584

Beginning :

× पथमायाता क्षणेन बद कारणम् ।
एवं महीभुजा पृष्टा देवताऽचष्ट तत्त्वतः ॥
× कोत्साह समाकर्णय कारणमिति × ॥ +

End :

त्वदायत्तामहं मुक्त्वा धुरं विश्रा × ।
× रमार्येण विक्रमादित्यभूभुजा ॥ +
+ म + राज + वैता + ॥

Colophon:

— — —

279

Sl No : 26495 | विक्रमार्कदेवचरितम् | Ms No: P. 559

Beginning :

शैले शैलेन्द्रसुतया जगते जगदीशिता ।
देव चित्राः कथाः काश्चिदन्तरायस्य मोचिनीः ॥

मह्यं शुश्रूषवे ब्रूहि मनःप्रह्लादनीः शुभाः ।
अथोवाच महादेवो भवानीं प्रीतमानसः ॥
शरच्चन्द्रांशुनिष्यन्दसुधामधुरया गिरा ।
अस्ति सिंहासनं किञ्चिन्महनीयमहत्तरम् ।
परितस्तत्र विद्यन्ते द्वात्रिंशत्सालभञ्जिकाः ॥

End

त्समागतं सभामध्ये पुरुषं × × नम् ।
अधिकस्नेहसम्मानमन्वयुङ्क्तावनीपतिः ।
कस्त्वं वद यथावत्वंमस्ति × × कौतुक ×

Colophon :

— — —

280

Sl. No : 26497 विदग्धमुखमण्डलम् Ms. No : P. 1402

Beginning :

सिद्धौषधानि भवदुःखमहागदानां
पुण्यात्मनां परमकर्णरसायनानि ।
प्रक्षालनैकसलिलानि मनोमलानां
शौद्धोदनेः प्रवचनानि चि × ति ॥

End :

कश्शान्तस्स्यात्पुरुषवचनः कुन्दले कौ स्मरारेः
कामाम्बोधेः हरिररुदहरद्वीवधः × ।
कोणिवस इस चन्दसुदरागिरि गहणकुणमंशुम्मि ।
समाअज्जणेणचुद्धसिहिगमणे कीरि × गो ॥ (?)

Colophon :

षष्ठे पत्रे—

इति विदग्धमुखमण्डने द्वितीयः परिच्छेदः ॥

281

Sl. No : 26499 विद्याधीशविजयः Ms. No : C. 1678a

Beginning :

वास्तु तत्र स वितीर्य निस्तुला-
नेकवस्तुविभवप्रशास्तिमत् ।
माननोचितगुणं दिनेदिने
बहुमानयदयं विचक्षणः ॥

End :

इति विविधवचोभिःश्लाघितस्तत्र ताभ्यां
सदसदुचितरक्षाशिक्षणार्थं × गत्याम् ॥
शिरसि गुरुवराज्ञां आवहन् प्रत्यगाशां
स्तुतबुधनिकुरम्ब × जः प्रतस्थे ॥

Colophon :

इति विद्याधीशविजये महाकाव्ये गदपकोनेरिणा ज × × ते पञ्चमः सर्गः ॥

282

Sl. No : 26500 विद्याधीशविजयव्याख्या Ms. No : C. 1678b

Beginning :

वास्त्विति । विचक्षणः सदनुग्रहसंपादननिपुणः सः स्तुत्यं (?) पण्डितः तत्र संगमनिरपुरे निस्तुलानि निरुपमानि अनेकानि बहूनि —

End :

शिरसि आवहन् अङ्गीकृत्येर्थः × × विद्वत्समूहसहितः सन् प्रत्यगाशां पश्चिमदिशं प्रतस्थे प्रस्थितवान्—मालिनीवृत्तम् ॥

Colophon :

इति श्रीमद्विद्याधीशविजयव्याख्यायां गदपकोनिरिणा जनार्दनाचार्येण विरचितायां शब्दार्थदीपिकायां पञ्चमः सर्गः ॥

283

Sl. No : 26504 | विद्वन्मोदतरङ्गिणी | Ms. No : C. 787

Beginning :

तमोगणविनाशिनी सकलकालमुद्योतिनी
धरातलविहारीणी जडसमाजविद्वेषिणी ।
कलानिधिसहायिनी लसदलोलसौदामिनी
मदन्तरवलम्बिनी भवतु कापि कादम्बिनी ॥

End :

द्वैताद्वैतमतादिनिर्णयविधिप्रोद्बुद्धबुद्धिः श्रुतो
भट्टाचार्यशतान्वधान इति यो गौडोद्भवोऽभूत्कविः ।
विद्वन्मोदतरङ्गिणी ननु चिरंजीवेन तज्जन्मना
शास्त्रे या रचितेह पूर्तिमगमत्तस्यास्तरङ्गोऽष्टमः ॥

Colophon :

इति श्रीशतावधानचिरञ्जीवभट्टाचार्यकृतविद्वन्मोदतरङ्गिण्यां अष्टमस्तरङ्गः ॥

284

Sl. No : 26505 | विरहिमोदसुधा | Ms. No: C. 2087ध

Beginning :

सजवयोगवयोगवियोगतो
मरणमेव वरं गरयोगतः ।
इति मतिं तनुते युवतीव्रजे
परिभवे भवति स्मरति व्रजे ॥
स्मर पितुः स्मर मां नतिसंस्तव
प्रकृतिमत्र नियच्छ शरांस्तव ।

End :

विरहिमोदसुधा विहिता शुभा
सुनवरत्नसुबा विहताशुभा ।
स च रुपामृतदो हरिकन्धरः
तदनयास्तु च मे हरिकन्धरः ॥ धुरि कन्दरः ।

Colophon :

इति नवरत्नकुलभवकृता विरहिमोदसुधा समाप्ता ॥

285

Sl. No : 26507 विलोमकाव्यम् Ms. No: C. 4344/1

Beginning :

तं भूसुतामुक्तिमुदारहासं
वन्दे यतो भव्यभवं दयाश्रीः ।
श्री यादवं भव्यमतो यदेवं
संहारदामुक्ति मुता × भूतम् ॥

End :

तारकेरिपुगय श्रीरुचादास सुताचितः ।
तान्वितासु सदाचारु श्रीपरापुरिं × रता ॥
व्यासेयानेलंकामेयारंकागाराध्यासंव्यासे ।
सेव्या सन्ध्या रागाकारं यामेलंनेयासेव्या ॥

Colophon :

इति श्रीदैवज्ञसूर्यपण्डितविरचितं विलोमकाव्यं संपूर्णम् ॥

286

Sl. No : 26508 विलोमकाव्यव्याख्या Ms. No : C. 4344/2

Beginning :

श्रीमन्मङ्गलमूर्तिमा × मनं नत्वा विदित्वा ततः
शब्द × मनोहरं सुगुणकज्ञानाधिराजात्मकः ।
यद्ग्रन्थाध्ययनैर्विनेयनिवहोप्याचार्यचर्यागमात्
सोऽहं सूर्यकविर्विलोमरचनं काव्यं करोम्यद्भुतम् ॥
+ + तमिति — — —

End :

गोदावरी ब्रह्मनगिरेः सकाशा संप्रापिता प्रागूर्ध्वं प्रयत्नात् येनर्षिणा सोऽपि पुनः प्रतीयमाने तु मद्भिः × किमेतां एवं विलोमाक्षर काव्यकर्तृभूयांसमाय समवेक्ष्य तज्ञः जानन्निमां चित्रकवित्वश्रीमदैवज्ञसूर्याभिधसंप्रदिष्टाम् ॥

Colophon :

इति दैवज्ञसूर्यपण्डितविरचितं विलोमकाव्यटिप्पणं संपूर्णम् ॥

287

Sl. No : 26509 | विश्वप्रियविलासः | Ms. No: C. 2237

Beginning :

वन्देऽहं गतसन्देहं चिद्देहं श्रीशमन्वहम् ।
गोदोहं वेदसन्दोहं वन्देहं कैटभापहम् ॥
बलवन्तं हरेर्दूतं मतिमन्तं स्वमारुतम् ।
हनूमन्तं कौरवान्तं नन्दतीर्थं भजेम तम् ॥

End :

सदा गुरोः पादसेविसेतुमाधवसूरिणा ।
कृतोऽयं सुकृतिर्मान्यसुजनैर्भुवि राजताम् ॥
उपकाराय साधूनां हयास्यो जयदो मम ।
× वाचा निस्सारकृतिमेतां सुखावहाम् ॥

Colophon :

इति श्रीमद्वेदगर्भलक्ष्मीनृसिंहार्यसुतसेतुमाधवसूरिविरचिते श्रीमद्विश्वप्रियगुरुलीलाविलासे पञ्चमो विलासः ॥

288

Sl. No : 26511 | वृत्तरत्नावळी | Ms. No: P. 9480

Beginning :

× आद्यं दलं समस्तं भजे ।
तल्लक्ष्म × समाश्रिता सुबलजासुता कृष्णं दृष्ट्वा ।
परिधानाञ्चलतोऽशुकजालं प्रासूत शरणेशः ॥
भगदत्तवैष्णवास्त्रं दधार वक्षस्थलेन विभुराजौ ।
अन्यैर्दुर्धरमीशः कारुण्यनिधिस्समामवतु ॥

End :

सत्यया धृताङ्कपालि चाङ्कसीम निविष्टया सरोजसुन्दरायताक्षम् ॥
गोपिकाकुचारविन्दकोशयुग्ममिलिन्दलोचनः तदीयदृक्चकोरै × × पीयमानसुन्दरास्य पार्वणेन्दुमनाक्स्मितप्रसन्नचन्द्रिकः पुरोऽस्तु ॥

Colophon :

इति श्री सच्चिदानन्दयोगीन्द्रचरणारविन्दश्रीसदाशिवमुनिप्रणीत वृत्तरत्नावल्यां अर्धसमवृत्तप्रकरणम् ॥

289

Sl. No : 26513 वेङ्कटनाथपादरेणुसहस्रम् Ms. No : A. 106

Beginning :

योऽध्यासामास पीठं यतिपतिचरणत्राणयोस्त्राणयोग्य-
स्तद्भक्तिप्रत्नवाणी प्रणमितविभवश्चान्ध्रपूर्णोऽवतीर्णः ।
जीयात्तद्गोत्रसिन्धून्प्लूय विधुरुरगक्ष्मौधरेट्पादरेणु.
स्फायद्गाथासहस्रस्तुतिलिखितमहाहोबलोऽहोबलार्यः ॥
श्रीमद्वेङ्कटानाथस्य श्रीपादाब्जरजोजसा ।
मातुस्तन्यं पयोऽनन्यगतिश्शिशुरिवाश्रये ॥

End :

विद्याम्भोजरवेरहोबलकवेः हृद्यान्ध्रपूर्णान्वये
संजातस्य कृतौ सविस्मयकृतिस्रोतस्विनीभूभृतः ।
श्रीमद्वेङ्कटराट्पदाम्बुजरजस्साहस्रपद्यस्तवे-
प्युल्लासो दशमो बभूव हृदयानन्दे मुकुन्दात्मनाम् ॥

Colophon :

इत्युत्तमश्लोकस्य कृतौ श्रीमद्वेङ्कटनाथश्रीपादरेणुसहस्रहरिदासहृदयानन्दे दशम उल्लासः । इति श्रीपादरेणुकासहस्रं समाप्तम् ॥

290

Sl. No : 26514 वेदान्तदेशिकवैभवप्रकाशिका Ms. No : P. 637/2

Beginning :

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
वाधूलश्रीनिवासार्यतनयं विनयोज्वलम् ।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासं महागुरुम् ॥

End

संपूर्णा निगमान्तार्यवैभवस्य प्रकाशिका ।
श्रीनिवासमहासूरिरचिता बुधसम्मता ॥
कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥
अब्दे सौम्ये च वारे गतवति तरणौ वृश्चिकं कृत्तिकाभे-
राकायां वेङ्कटेशो यतिनृपतिमतं सर्वतः स्थापयित्वा ।
वेदान्ताचार्यनामा विरचितविविधानेकदिव्यप्रबन्धः
श्रीशैलाधीशघण्टाकृतिवपुरभजत् देशिकेन्द्रो दयालुः ॥

Colophon :

इति देशिकवैभवप्रकाशिका संपूर्णा ॥

291

Sl: No: 26515 वेदान्तदेशिकसच्चरितदिव्यरत्नावळी Ms. No: P. 511/3

Beginning :

श्रीभाष्यकारो मत × णं यं
प्राचीकशत्तस्य महान्ववाये ।
सुदर्शनार्यस्य जयत्युदारः
श्रीरङ्गराजो गुरुसार्वभौमः ॥
अम्नायचूडागुरुसच्चरित्रं
निर्विण्णनिष्पन्नमनोरथो यः ।
ज × नीं स्वां सफलीकरोति
तदप्यमुष्यै वद योमनीतम् ॥ (?)

End :

श्रीभाष्यकृत्स्वमतभूषणसंज्ञया यं
प्राचीकशद्वरसुतंप्रियभागिनेयः ।
श्रीमत्सुदर्शनगुरो न × धान्वय
रङ्गराजगुरुरस्य जयत्यमूल्यः ॥

Colophon:

श्रीमद्रामानुजमतभूषण × × श्रीशैलार्यदासेन विरचिता भगवन्निग-
मान्तादेशिकसच्चरितदिव्यरत्नावली संपूर्णा ॥

292

Sl. No: 26517 | वेदान्ताचार्यचरित्रम् | Ms. No: P. 633

Beginning:

श्रीरङ्गवेङ्कटकरीशपदाब्जसेवी
श्रीवेङ्कटेशगुरुरप्रतिमानुभावः ।
वेदान्तदेशिकवरो विदुषामनन्त-
कल्याणदो विजयते कविवादिसिंहः ॥
अस्तिप्रशस्तविभवा भुवनेषु काञ्ची
मुक्तिप्रदायिनगरीति मुनीन्द्रगण्या ।

End:

श्रीमानागममौलिदेशिकवरः श्रीवेङ्कटार्यात्मजो
वेदान्तद्वितयार्थमन्वहमसावध्यापयन् भूतले ।
दुर्वारं वरदो गुरुः प्रशमयन् दुर्वादिगर्वं महान्
आकल्पं करुणानिधिर्विजयतामाचार्यचूडामणिः ॥

Colophon:

इति श्रीमद्वेदान्तोदयनदेशिकवंशरत्नाकरकलाधरायमाणश्रीमदात्रेयरामानुजा-
चार्यनन्दनस्य वेदान्तदेशिकप्रसादलब्धविशुद्धकवितासमृद्धिभूषणस्य श्रीनिवास
कवेः कृतिषु वेदान्तचार्यचरिते पञ्चमः सर्गः ॥

293

Sl. No: 26518 | वैद्यजीवनम् | Ms. No: C. 2849/1

Beginning:

प्रकृतिसुभगगात्रं प्रीतिपात्रं रमायाः
दिशतु किमपि धाम श्यामलं मङ्गलं वः ।
अरुणकमललीलां यस्य पादौ दधाते
प्रणतहरजटा × गाङ्गरिङ्गत्तरङ्गे ॥

End :

आयुर्वेदवचोविचारसमये धन्वन्तरिः केवलः
श्रीमागानविदादिवाकरसुधामोदित्रियामायतिः ।
उत्तंसः कविताकृतां मतिमतां भूमत्समाभूषणे
कान्तोक्त्याऽकृत वैद्यजीवनमिदं लोलिम्बजः कविः ॥

Colophon :

— — —

294

Sl. No : 26519 **वैद्यजीवनव्याख्या** **Ms. No : C. 2849/2**

Beginning :

नत्वा शिवं च तामम्बां तातं कोनेरिसन्ततिम् ।
वैद्यजीवनकाव्यस्य दीपिकां प्रतनोम्यहम् ॥
ग्रन्थकृद्विशिष्टाचारपरिपालनाय ग्रन्थादौ मङ्गलमाचरति – प्रकृतीति ।

End :

दिवाकरो लोलिम्बराजपिता स एवम्भोनिधिस्तत्र त्रियामायतिश्चन्द्रः पुनः किं भूतः कविताकृतामुत्तंसः शेखरः । उत्तंसः कर्णपूरं स्याच्छेखरेचावतंसकमिति विश्वः पुनः किंभूतः मतिमतां बुद्धिमतां भूभुसमभूषणं राजसभाभूषणमिति ।

Colophon :

इति श्रीमत्कोनेरि × पुत्र रुद्रभट्टवैद्यविरचितायां वैद्यजीवनटीकायां दीपिकाख्यायां पञ्चम उच्छवासः समाप्तः ॥

295

Sl. No: 26520 **वैराग्यशतकम्** **Ms. No : B. 836/2**

Beginning :

ज्ञानं विरागमैश्वर्यं तपस्सत्यं क्षमा धृतिः ।
स्रष्टृत्वमात्मसंबोधोऽप्यधिष्ठातृत्वमेव च ।।
अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे ॥
इति शिवशास्त्रेषु प्रसिद्धम ।

End :

बद्धः कस्ते वक्ष्यति मुक्तो मुक्तिं विजानाति ।
यास्यसि वेदविमुक्तिं ज्ञास्यसि विश्वेश्वरस्य मुखात् ॥
न गृहीतं श्रुतिहृदयं न च निगृहीतं पारिप्लवं हृदयं ।
इच्छामि धाम परं गच्छामि तु विश्वनाथपुरम् ॥

Colophon :

इति भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीरङ्गराजाध्वरिसूनोरप्पय्यदीक्षितस्य पौत्रस्य नारायणदीक्षितस्य पुत्रस्य नीलकण्ठदीक्षितस्य कृतिषु वैराग्यशतकं संपूर्णम् ॥

296

Sl. No : 26521 वैराग्यशतकम् Ms. No : C. 4269/1

Beginning :

चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभासुरो-
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तस्फूर्जदपारमोहतिमिरप्राग्भारमुच्चाटयन्
तेजःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥

End :

किं कन्दर्पकरं कदर्थयसि रे कोदण्डटंकारितैः
रे रे कोकिल कोमलं कलरवं किं त्वं वृथा वल्गसि ।
मुग्धे स्निग्धविदग्धमुग्धमधुरैर्लोलैः कटाक्षैरलं
चेतश्चुम्बितचन्द्रचूडचरणध्यानामृते वर्तते ॥

Colophon:

— — —

297

Sl. No : 26523 व्यासयोगिचरितम् Ms. No : P. 90009

Beginning :

अन्वेष्ट्यान्वेष्टृतायां विदितविनिमयः स्वस्य च प्रस्तवाचां
आकृत्या रुच्यरुच्यांबुधिदुहितृदृशो गन्धयन्बन्धुभावम् ।

दंष्ट्रायष्टिप्रभाभिर्मुखमखिलदिशां तुत्थयन्नुत्थिताभिः
ध्येयो मीनोऽयमीडो प्रभवतु भवतां चित्तकासारवासः ॥

\+ \+ \+ \+ \+

लोकालोकधरावधिर्न धरणी नाग्रं मुहुः पुष्पवत्
सञ्चारप्रमितं × भुवांभोनिधिः ।
वाचा तादृशमद्य तस्य चरितं श्रीव्यासयोगीशितुः
क्रोडीकर्तुमना भवाम्यहमहो को × ॥

End :

प्रकटशङ्खचक्रलांछनाय तस्मै तापसाय माहेयी र्च वै + रघत्रामावृत्तिभि रमेयाभिः + + सान्निधां प्रादात् । निसर्गधीरचेतास्तुङ्गतरशृङ्गालिङ्गित पयोधरान् धराधराननोक —

Colophon :

श्रीसोमनाथकविविरचिते तृतीय × × ॥

298

Sl. No : 26525 शङ्करविजयः Ms. No : P. 10006/3

Beginning :

अज्ञानतिमिरान्धस्य ज्ञानांजनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
अस्तु स्वस्तिकृते वस्तु निम्तुलानन्दनिर्भरं ।
वस्तु दासांकरंन स्तदीप्सितार्थसमुच्चये ॥ (?)

\+ \+ \+ \+ \+

श्रीमद्गुरुकृपाप्रीतपारंपर्यकृपानिधे ।
शङ्कराचार्यचरितं तत्कृतं पठ्यते त्वया ॥
पवित्रं तच्चरित्रन्तु श्रोतुं मेऽस्ति कुतूहलम् ।

\+ \+ \+ \+ \+

शम्भोः कृतावतारस्य शङ्कराचार्यसंज्ञया ॥
चिद्विलासयतिश्रेष्ठशिष्यदृङ्मोहवारका ॥

End :

शंकराचार्यचरितमिदमस्तु शुभावहम् ।
आचन्द्रतारकस्थायि भवतात् जगतीतले ॥
दद्यादनिशमिष्टार्थः श्रीमच्छंकरदेशिकः ।
पठनाच्छ्रवणाद्वापि लिखनाद्दानतोऽपि वा ।
सत्पात्रेभ्यो द्विजातिभ्यो श्रियमन्वहमश्नुते ॥

Colophon :

इति श्री परमहंसपरिव्रजकाचार्यवर्य श्रीमच्छंकराचार्यभगवत्पूज्यपादपाद पयोजमकन्दनिष्यन्दास्वादतुन्दिलानन्दमिलिन्दायमानमानसश्रीचिद्विलसयतीन्द्र विज्ञानकन्दतपोधनेन्द्रसंवादे शंकरविजयविलासे द्वात्रिंशोऽध्यायः ॥

299

Sl. No : 26528　　शङ्करविजयविलासः　　Ms. No : P. 10421/2

Beginning :

त्रयीभाष्यस्य कर्तारं विद्यारण्यं जगद्गुरुम् ।
नत्वा श्रीशंकरविजये सारं संगृह्य उच्यते ॥
तत्रादिम उपोद्घातो द्वितीये तु तदुद्भवः ।
तृतीये तत्रदमृतां धोवतानिरूपणम् ॥　　(?)

End :

पाषंडाचलदण्ड × गौद्धाटवीज्ञानलस-
　　त्तर्कोद्दण्डतमःसमूहतरणिस्त्रैयन्तरक्षामणिः ।
मृत्स्ना × गजव्रजहरिर्मध्वा × ब्रह्म-
　　+ मरुद्विद्यारण्यमुनीश्वरो विजयते विद्येन्द्रजैत्रध्वजः ॥
शंकरविजयमिदं यस्त्रिसन्ध्यामसकृत्पठेद्धीमान् ।
पर्यायतः पुमर्थान् धर्मादीनमृतमश्नुते चान्ते ॥

Colophon :

श्री शंकरविजयविलासं सम्पूर्णम् ॥

300

Sl. No: 26530 शङ्करविजयसंग्रहः Ms. No: P. 1644/3

Beginning :

प्रत्यूहध्वान्तनिकरनिवारणदिवाकरम् ।
भक्ताभीष्टप्रदातारं नमामि द्विरदाननम् ॥
वाग्देवी रसनारङ्गे मम नृत्यतु सर्वदा ।
राकासुधाकरस्वच्छा दिविषद्वृन्दवन्दिता ॥

End :

शङ्करो धर्मपुत्रस्तु पद्माङ्घ्रिर्वायुनन्दनः ।
सुरेश्वराभिधो भिक्षुः अर्जुनो नकुलस्तथा ॥
हस्तामलकयोगीन्द्रः सहदेवस्तु तोटकः ॥

Colophon :

इति श्रीशङ्करविजयसङ्ग्रहे शङ्करविजयो नाम षष्ठोऽध्यायः ॥

301

Sl. No: 26534 शङ्करविजयः Ms. No: P. 3867

Beginning :

नमामि शङ्कराचार्यगुरुपादसरोरुहम् ।
यस्य प्रसादान्मूढोऽपि सर्वज्ञोऽहं सदाऽस्म्यहम् ॥

अनन्तानन्दगिरिरहं अप्रतिहतशिष्यः मम परमगुरोरवतार कथां तदुपकृति पोषितजगत्परंपरावच्छिन्नशुद्धाद्वैतविद्याप्रतिष्ठां —

End :

विदितसकलवेदः शङ्कराचार्यनामा ।
मदमितखलु कर्माण्यन्तरायणि भक्त्या ।
दिशतु परमतत्त्वाधारमोक्षं स एव ॥
चतुस्सप्ततितमैः प्रकरणैः परिशोभितम् ।
गुरुदिग्विजयं नाम शास्त्रं जयतु भूतले ॥

Colophon :

इत्यनन्तानन्दगिरिकृतौ गुरोः सच्चिदानन्दैक्यं नाम प्रकरणं चतुस्सप्ततितमम् । इति शङ्कराचार्यविजयं समाप्तम् ॥

302

Sl. No : 26538 **शङ्कराचार्यचरितम्** Ms. No : P. 5903

Beginning :

गणेशाय नमस्तस्मै यत्प्रसादविवस्वता ।
प्रत्यूहध्वान्तविध्वंसः क्रियते भक्तकर्मणाम् ।।
मदीयरसनारङ्गनटनेषु समुत्सुका ।
एषा सरस्वती भूयात्सकामानन्ददायिनी ।।

End :

श्रीमच्छङ्करदेशिकस्य चरितं स्तोतृप्रबोधप्रदं
निर्दग्धाखिलपापवृन्दविपिनं संक्षिप्तमेतन्नराः ।
ये शृण्वन्ति पठन्ति चादरयुता सञ्चिन्तयन्त्यन्वहं
ते लब्ध्वा भुवि सम्पदं च सकलामन्ते लभन्तेऽमृतम् ।।

Colophon :

इति शङ्कराचार्यचरिते नवमोऽध्यायः समाप्तः ।।

303

Sl. No : 26539 **शङ्कराचार्यविलासः** Ms. No: C. 4669/2

Beginning :

तत्रत्याज्ञातसमयमात्रा सह शनैश्शनैः ।
श्रीशङ्करगुरुस्सोऽयं काशीयात्रापरोऽभवत् ।
तत्रत्यश्च जनोऽथ शङ्करगुरुध्यानेन सम्प्राणितः
स्वात्मैक्यानुभवस्त × परमानन्दाम्बुधौ मज्जनम् ।
कृत्वा शङ्करनामधेयमतुलं मन्त्रं जपन् सादरं
जीवन्मुक्ततया स्थितोऽभवदमुं द्रष्टुं पुनर्वाञ्छया ।।

End :

निमीलिताक्षं मुनिवर्यमत्र
सर्वे नमस्कृत्य जनाः स्वकीयम् ।
गेहं गताः श्रीगुरुशङ्करार्यः
प्रविश्य तत्रः × × ।।

Colophon :

सप्तमे पत्रे—

इति श्रीचिद्घनानन्दविरचिते शङ्कराचार्यविलासे प्रथमोल्लासः ॥

304

Sl No 26540 **शङ्कराभ्युदयम्** Ms No: Sa. 715/1

Beginning :

अस्ति स्वस्तिकृदस्तोकशास्त्रिचूडामणिर्मखी ।
शत्रोर्विश्वजितः पुत्रः कामाक्षीश्रीनिवासयोः ॥
अधीत्य निखिलं शास्त्रमग्रजानीश्वरेष्टिनः ।
विदुषां प्रीतये येन कृता शास्त्रप्रदीपिका ॥
यत्नं विनैव विहितो येन तन्त्रशिखामणिः ।
नव्या सङ्कर्षकाण्डस्य न्यायमुक्तावलिस्तथा ॥
कृपया चोदितस्तेन कृपणानुजिघृक्षया ।
स एव कुरुते काव्यं शङ्कराभ्युदयाभिधम् ॥

End :

इति विहितनुतिर्गिरीशचूडा-
शशिकिरणापसरत्तमःप्ररोहः ।
त्रिचतुरदिवसान् वसन्निहासौ
मुनिपतिरुत्तरदिङ्मुखः प्रतस्थे ॥

Colophon :

[इति षष्ठः सर्गः]

305

Sl. No : 26541 **शङ्कराभ्युदयम्** Ms. No : P. 301

Beginning :

श्रीमच्चन्द्रावतंसस्य देवस्य चरणाम्बुजम् ।
वन्दामहे जगद्वन्द्यमाश्रितानामभीष्टदम् ॥
जयति भगवत्पादपादपद्मरजःकणः ।
जगन्ति यैरभिध्यातैर्भजन्ति वीरजन्मताम् ॥

अद्वैतदर्शनाचार्यसंप्रदायप्रसिद्धये ।
शंकराभ्युदयं कुर्मो गृह्णन्त्वार्या विमत्सराः ॥

End :

सतक्षणक्षुभितनिजस्वभावः
प्रवृद्धरुडविस्मृतमर्त्यभावः ।
आविष्कृतात्युग्रनृसिंहभावः
सटाच्छटास्फाटितमेघसंघः ॥

Colophon :

षष्ठसर्गान्ते । उपसंहारः —

श्रीमद्भारद्वजकुलजलधिचन्द्रश्रीतिरुमलकोण्डोपाध्यायतनयश्रीमत्परमशिवेन्द्रपादाब्जसेवापरायणश्रीतिरुमलदीक्षितविरचिते शंकराभ्युदये महाकाव्ये षष्ठस्सर्गः ॥

306

Sl· No : 26543 शङ्कराभ्युदयव्याख्या Ms. No : Sa. 715/2

Beginning :

श्रीकान्तारमणः पायाद्भगवान् भक्तवत्सलः ।
यत्पादस्मरणादेव विद्रवन्ति विपत्तयः ॥

इह खलु दन्तिद्योतिदिवाप्रदीपादिबिरुदाङ्कसकलविद्वच्चूडामणीनां चूडामण्याख्यः कश्चिद्विप्रः + + + वस्तुनिर्देशविशिष्टं स्वाभिजनं दर्शयति — अस्तीति । स्वस्तिकृत् — क्षेमकृत् ॥

End :

इतीति । असौ मुनिपतिः शङ्करभगवान् इति एवं उक्तक्रमेण विहिता कृता नुतिः स्तुतिः येन स तथोक्तः सन् गिरीशस्य परमेश्वरस्य चूडायां शिखायां वर्तमानः यः शशी चन्द्रः तस्य किरणैः अपसरंतः तमसः प्ररोहाः अङ्कुराः यस्य सः तथोक्तः सन् इह अस्मिन् क्षेत्रे त्रिचतुरदिवसान् अथ उत्तरदिङ्मुखः प्रतस्थे निर्जगाम वृत्तं प्राग्वत् ।

Colophon :

इति श्री रामकृष्णसूरिविरचिते शंकराभ्युदव्याख्याने षष्ठः सर्गः ॥

307

Sl. No : 26545 **शष्पशतकम्** Ms. No : P. 1871/2

Beginning :

स्तुत्वा घृणे जलनिधिं कमलासहायं
दृष्ट्वा च लुब्धकवरस्तुतिलोभभाजः ।
तेषां करोति परिहासविधित्सयाऽधः
केशीय्यपद्यकतकं कविदन्तिसिंहः ॥

End :

चम्पूनाटकनाटिकाप्रकरणव्यायोगवीथीडिम
श्लेषप्राकृतचित्रबन्धयमकालङ्कारभङ्गादिषु ।
निरशङ्कं घटिताश × कवयितुः कव्यग्र्यदन्तिच्छटा
पञ्चास्यस्य कृतिर्जयत्वति तरामाचन्द्रमातारकम् ॥

Colophon :

कृतवानिदमासन्ध्यं कविकुम्भेन्द्रकेसरी ॥

Extra Information :

स्वभानुमार्गशीर्षाद्यपञ्चमीकुजवासरे ।
कृतवनिदमासन्ध्यं कविकुम्भेन्द्र केसरी ॥
विकारिकार्तिकापक्षद्वये एकादशीदिने ।
अनन्तो ग्रामवासी च शष्पं ग्रावपुरेऽलिखत् ॥

308

Sl. No : 26546 **शान्ताविलासः** Ms. No : P. 3291

Beginning :

वन्दे मानसमन्दिरस्थितममुं वन्दारुमन्दारकं
कुन्दाभाव × मन्द × समधुरं मन्दाकिनीसुन्दरम् ।
कन्दर्पाधिकदर्पदारितमुनि × बृन्दसन्दानितं
मं × स्पदं नन्दं निदानं मुदां
वल्लीभिः परिकल्पितानभुवपूर्वम् ॥

End :

राजितराजकलाञ्चितशेखर पूजितनिजपदपूर्णविभो
देव देव हर सर्वदेवहर दीनावनपर देव विभो ।
शरणागतजनभरण सदाशिव करुणावरुणनिवास विभो
हरहर पुरहर मुरहर पूजितहरिसु × लासविभो ॥

Colophon :

इति हरदासहरिशाबकृतशान्ताविलासे महाकाव्ये सादरपरमेश्वरो नाम पञ्चमस्सर्गः ॥

309

Sl. No : 26548 शान्ताविलासव्याख्या Ms. No: P. 979/2

Beginning :

शालिवाहशकाब्देष्टं
वरहूतभुग्गिरीन्दुसख्येषु ।
यातेषु गीतकाव्यं कथितं
शानतविलाससंज्ञमिदम् ॥
श्रीशैलान्वयजातेन नृसिंहार्येण धीमता ।
एषा विरच्यते शान्ताविलासमणिदर्पणा ॥
शान्ताविलासव्याख्येयं रसभावप्रदर्शिनी ।
द्रष्टव्या करुणासान्द्रैः विद्वद्भिः वीतमत्सरैः ॥

End :

तदनन्तरं सम्भोगशृङ्गारश्च निरूपितः इति सर्वमनवद्यम् ॥
कृत्या लसदलङ्कृत्या यथा तुष्टो जगत्पतिः ।
व्याख्यया मुख्यया‌ऽप्यस्याः प्रीयतां परमेश्वरः ॥
श्रीशैलान्वयदासमार्यसु × × सूनुस्तदुद्यत्कृपा +
श्रीमच्छ्रीनरसिंहनामसुमतिः शान्ताविलासाभिधं
व्याचख्यौ रसभावगर्भमसमं काव्यं × × मुदा ॥

Colophon :

इति श्री शैलकुलतिलकस्य श्री दासमाचार्यस्य तनयेन तदीयकरुणापरिणा मलब्ध + वेङ्कटनृसिंहकविना विरचिते शान्ताविलासाभिधानकाव्यव्याख्याने मणिदर्पणाख्याने सादरपरमेश्वरो नाम पञ्चमः सर्गः ॥

310

Sl. No : 26549 **शिवगीतिमालिका** **Ms. No : P. 3948**

Beginning :

यदनुभवसुधोर्मिमाधुरीपारवश्यं
विशदयति मुनीनामात्मनस्ताण्डवेन ।
कनकसदसि रम्ये साक्षिणीमीक्षमाणो
विपुलयत सख × मतिभावतंसः ॥

End :

विद्याविनीतजयदेवकवेरुदार-
गीतिप्रबन्धसरणिप्रणिधानमाला ।
रचिता शिवगीतिमालामोदं
तनोतु शिवयोप्य × योजनीयाम् ॥
अव्यक्तवर्णमुदितेन यथार्भकस्य
वाक्येन मोदचरितं हृदयं हि पित्रोः ।
एकाम्रनाथ भवदंघ्रिसमर्पितोऽयं
मोदं करोतु भ × ॥

Colophon :

इति शिवगीतिमालिकायां द्वादशस्सर्गः ॥

Extra information :

प्रथमसर्गान्ते कवेः नामनिर्देशः कृतः —
इति श्रीचन्द्रशिखामणियतिवरेण विरचितायां गीतिमालिकायां प्रथमस्सर्गः ॥

311

Sl. No : 26550 **शिवदयासहस्रम्** **Ms. No : B. 742**

Beginning :

जयन्ति जगदानन्दमन्दारोदयहेतवः ।
शिवरामगुरोरङ्घ्रिनखेन्दुकिरणाङ्कुराः ॥

× × × तिताया:

कलनास्वादितकम्रपट्टबन्धौ ।

चरणौ नखकैतवाच्छ्रये तौ

शिरसाऽहं शिवरामदेशिकेन्दो: ॥

End :

इति श्रीमत्सनगरकुलजलधिकौस्तुभपाङ्दर्शिनीपारीणशिवरामसूरितनूजेन अभिनवकालिदासेन नृसिंहकविना विरचिते शिवदयासहस्रे नवमं शतम् ॥

विधितालिखिता जडस्य फाले

करुणे दुष्टलिपि: कलेशमौले: ।

× × × सै

वद दातृत्व विमेषिका हि सैव ॥

अपशौ दिविपद्भवि स्थितायां अनुयम्ये त्वयि × ।

× × × ×

Colophon:

— — —

312

Sl. No : 26552 शिवपदकमलरेणुसहस्रम् Ms. No : B. 349

Beginning :

वामनीकृतवक्षोजसीमानीतविपञ्चिका ।

यामिनीविटचूडालकामिनी कुरुतां मुदम् ॥

End :

भद्राकारां वहतु सदा नः

स्वान्ते मूर्तिशिवपादरेणौ भव्ये ।

भव्ये दासे मयि करुणार्द्रे

भङ्गैस्तापं शमय सुधादृष्टानाम् ॥

Colophon :

इति शिवपदकमलरेणुसहस्रे शिवलीलार्णवनाम्नि चित्रपद्धतिः समाप्ता ॥

313

Sl. No : 26555 शिवलीलार्णवः **Ms. No : P. 3706**

Beginning :

× × अशक्यमङ्गान्तरवद्विभक्तु
मणुप्रमाणं करणं यदन्तः ।
सामान्यभूतं शिवयोऽस्तदेकं
सानुग्रहं स्यान्मयि गर्भदासे ॥

End :

मलयध्वजपाण्ड्यकन्यका
चरणद्वन्द्वनिवेशितात्मना ।
शिवयोः कविनेदमर्पितं
शिवलीलार्णवकाव्यमद्भुतम् ॥

Colophon :

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभ श्रीकण्ठमतप्रतिष्ठापनाचार्य चतुरधिक शतप्रबन्धनिर्वाहक श्रीमन्महाव्रतयाजि श्रीमदप्पय्यदीक्षितसोदर्याचान्दीक्षित-पौत्रेण नारायणदीक्षितात्मजेन भूमिदेवीगर्भसंभवेन महाकवि नीलकंठदीक्षितेन विरचिते शिवलीलार्णवे महाकाव्ये द्वाविंशः सर्गः ॥

314

Sl. No : 26639 शिशुपालवधव्याख्या **Ms. No : P. 1333/1b**

Beginning :

इन्दीवरदलश्याममिन्दिरानन्दकन्दलम् ।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् ॥
वाणीं काणभुजी . . . मल्लिनाथसुधीः . . .
विधत्ते माघकाव्यस्य व्याख्यां सर्वङ्कषाभिधाम् ॥

End :

रुषस्तथोर्धोध इतिधत्वम् । झलो झलीति सलोपः । जश्त्वम् । शिखरिणीवृत्तमेतत् । रसौरुद्रैः छिन्नायमानमभलागशिखरिणीति लक्षणात् ॥

Colophon :

इति माघकाव्यव्याख्याने सर्वङ्कषाख्याने पञ्चमस्सर्गः समाप्तः ॥

Colophon :

इति माघकाव्यव्याख्याने सर्वङ्कषाख्याने पञ्चमस्सर्गः समाप्तः ॥

315

Sl. No : 26683 शिशुपालवधव्याख्या Ms. No: C. 1952/2b

Beginning :

यस्य भृङ्गावलिः कण्ठे दानाम्बुराजिभूषिते।
भाति रुद्राक्षमालेव स वः पायाद्गणाधिपः॥
शिशुपालवधे काव्ये सारटीका विधीयते।

अभिलषितसिध्यर्थं मङ्गलादि काव्यं कर्तव्यमिति स्मरणात् कविः श्रीशब्दमादौ प्रायुङ्क्तः - — श्रियः पतिः ॥

End :

अथ शिरश्छेदनानन्तरं चैद्यस्य शिशुपालस्य वपुषः शरीरात् निरीय निर्गत्य + + वास्तवामध्यमञ्जेषादिसङ्करोऽलङ्कारः। + + + श्रीशब्दलक्ष्यत्वात्काव्यस्य प्रतिसर्गसमाप्तौ श्रीशब्द इति भद्रम्॥

Colophon:

इति शिशुपालवधे महाकाव्ये आनन्ददेवायनि श्रीवल्लभदेवविरचितायां सन्देहविषौषध्यां सारटीकायां शिशुपालवधो नाम विंतितमस्सर्गः॥

316

Sl. No : 26684 शिशुपालवधव्याख्या Ms. No: P. 4719

Beginning :

× सुवर्णं गर्भे वन्धनं स्वर्णपूर्णदेशमिति यावत्। हिरण्यगर्भशब्दः परमपुरुषवचनश्च × भुवं व्याप्य व्यवतिष्ठते इव + नारायणः स्थितः।

End :

पुरा हि कृष्णप्रतीहारः कश्चित् शापेन मानुषजन्म प्राप्त × रूपेण पुरः स्थितस्य भगवतः सायुज्यं प्राप्तवानिति।

व्याख्या न पूर्वैः कविभिरपि कृतान्येतदन्यन्मिदीयं
तच्छायेव × द्धरणपदगुणालङ्क्रियार्था।
सर्गे सर्गे षडर्थाः कचिदिह कथिताः प्राक्तनेभ्ये विशेषाः
व्याख्याने माघ × ×॥

Colophon :

विद्यामाधवविहितं व्याख्यानं माघकाव्यस्य × पदकेशवस्य व्यलिख न्नारायणसूनुः ॥

317

Sl. No: 26685 **शिशुपालवधव्याख्या** Ms. No : P. 3700/2

Beginning :

श्रियः पतिः जगन्निवासः जगतां आवासस्थानभूतः तथापि जगच्छासितुं श्रीमति महाविभवे वसुदेवसद्मनि वसन् सकलजगतामावासस्थानभूतोऽपि + मुनिं नारदं ददर्श ॥

End :

इन्दोरभिमुखं व्योम्नि स्थितो विनाशस्य सूचको भवति । तद्वच्छार्ङ्गिणा वदने शिशुपालादीनां विनाशस्य सूचको भ्रुकुटिः सञ्जातेत्यर्थः । क्रोधवेगात्स-मुत्पन्नो भ्रूभङ्गो भ्रूकुटिः स्मृता ॥

Colophon :

इति श्रीरङ्गदेवाख्यो माघकाव्ये द्विजोत्तमः ।
व्याख्यां प्रथमसर्गस्य कृतवान् कृतिनां मुदे ॥

318

Sl No 26700 **शुकसप्ततिकथा** Ms No: P. 449 8

Beginning :

सुधर्मायां पुरा राजन् देवेन्द्रो देवतागणैः ।
इमं प्रश्नं तथापृच्छन् नारदं देव × ॥
× विलोके तथा तत्प्रतिबोधकः ।
आस्ति चेत्परमं गुह्यं यथावद्वक्तुमर्हसि ॥
शुको भूत्वा परीक्षार्थं स्वर्णपञ्जरमाविशत् ।

End :

ब्रुवति वासिष्ठाग्रे देवमध्ये शुकस्तथा
प्रणम्य प्रयतो यायान् यत्रास्ते जाह्नवी नदी ॥

इन्द्रादयस्सुरगणा स्वं स्वं लोकमवाप्नुयुः ।
य इदं शृणुयान्नित्यं वाचयेद्वा समाहितः ।
सर्वपापविनिर्मुक्तः प्रपेदे वैष्णवं पदम् ॥

Colophon:

इति श्री शुकसप्ततिकथासु सप्ततिदिनालापनिकानि ॥

319

Sl. No : 26708 श्रृङ्गारलहरी Ms. No : P. 629/6

Beginning :

सुधासारादपि बहुळसाराकुवलया-
वलीदामश्यामा शुभविभवसामस्त्यजननी ।
मम श्रेयो भूयो वितरतु सुधासिन्धुदुहितुः
कृपातुङ्गापाङ्गोल्लसदसमशृङ्गारलहरी ॥

End :

कृतानन्दस्यन्दं कुजलधाराजलधरं
कटाक्षं लक्ष्मी त्वं कलय मयि कारुण्यविवशा ।
विविक्तो यस्यासौ करितुरगरत्नालिभरित-
स्त्रयाणां दिशति वरसाम्राज्यविभवम् ॥

Colophon :

श्रीशैलवंशजनुषा वेङ्कटविदुषाऽण्णायार्यतनुजनुषा ।
परया समर्पिताऽभूत् शृङ्गारलहर्यसौ रमाकमितुः ॥

320

Sl. No : 26712 श्रृङ्गारशतकम् Ms. No : P. 932/6

Beginning :

यो रामानुजपादपङ्कजदळच्छायानुभावान्वय-
श्रीगोविन्दमुनीन्द्रकन्दलितसद्वंश्येषु मुख्यप्रथः ।
यस्याग्रेऽजनि पण्डितोऽप्पयगुरू रङ्गाधिराजात्मज-
स्सोऽस्माकं कवितावििधि वितरतु श्रीरङ्गनारायणः ॥

कलिन्दापत्यस्य प्रथयति च शोभा परिणतिं
यदीया नेत्रश्रीश्शरदुदितचन्द्रातपजुषम् ।
मदीया सा काचिद्विहरतु पुरस्तादनुदिनं
पदिन्नां सम्पूर्त्यै बिसकुसुमसिद्धान्तरसिका ॥

End

बालामपूर्वमकरक्रमसौकुमार्य-
वीक्षाभरोचरितमङ्गलहृद्यकुम्भाम् ।
पश्चात्कृतोज्वलितचक्रमशाकरां तां
पश्यामि सम्प्रति हि सिह्मतुलैकमध्याम् ॥

Colophon :

— — —

321

Sl. No : 26713 शृङ्गारसप्तशतिः Ms. No : P. 104/2

Beginning :

नारायणं त्रिनयनं नलिनाब्ज × वा
नाथं यथेच्छमनुगच्छतु जीवलोकः ।
गात्रं जगत्रितयमोहनमङ्गलानां
कूलङ्कषस्तनभरं कुलदैवतं नः ॥
अक्ष्णोरिङ्गितगन्धिनः कतिपये भावाः +
नवेन वयसा सङ्कोचितं शैशवम् ॥

End :

तथा न वदनं शरत्कमलचन्द्रनिन्दाकरं
न च स्वरनवोत्पलद्यु + ।
मदद्विरदमस्तकप्रतिमहारिणौ हारिणौ
यथा चलदृशः स्तनावहरतां मदीयं नमः ॥
अनुयान्तमनङ्गविह्वलं मामनुरागोदय × ×

Colophon :

— — —

322

Sl. No : 26714 श्रवणानन्दम् Ms. No : P. 406/1

Beginning :

आचक्रायुधमा च मामकगुरोराचार्यवर्गं भजे
यस्यान्ते निगमान्तदेशिकयतिश्रेष्ठौ मुनिर्यामुनः ।
रामस्तामरसेक्षणः स च मुनिर्नाथः शठारातिरि-
त्यन्तस्सन्तमसच्छिदः श्रुतिदृशामग्रेसरा जाग्रति ॥

End :

कल्याणाभ्यामशेषाभ्युदयविभवसंपीडनक्रीडनाभ्यां
नाभ्यामभ्युद्गतास्यद्वियुगमुखशिशोः श्रूयमाणस्तवाभ्याम् ।
बोधामोदार्णवाभ्यां भुजगपरिवृढक्ष्माधरालंकृतिभ्यां
दिव्याभ्यां दम्पतिभ्यां भवतु नम इदं देवता सेविताभ्याम् ॥

Colophon :

इत्यात्रेयवेङ्कटाचार्यदीक्षितस्य कृतिषु श्रवणानन्दे प्रथमं शतकं सम्पूर्णम् ॥

323

Sl. No : 26719 श्रीकृष्णनृपजयोत्कर्षः Ms. No : A. 706/5

Beginning :

गिरिदुहितुरर्धाशम्भोः
कुचविको यस्य कुम्भयुगयोगात् ।
प्राक् स्थितिमतीत्य शुशुभे
स्तनन्धयः कोपि सोऽस्तु सुखदो नः ॥

End :

नित्यजयान्वितकरणविधियागो
विबुधरतोरुतनिजवनमाली ।
कीर्तिशुचीकृतदिक्तटनागो
विपुलमहिमनी हितमतिशाली ॥

नृवसभयल्लकभूषणवागय
आर्जवपोषितसकलाद्रिजनु ।
श्रीकृष्णविभो मयि सूरिपते
प्रेमभरित निरुपममुदितनु ॥

Colophon :

श्री श्रीनिवासकविसार्वभौमविरचिते श्रीकृष्णनृपजयोत्कर्षाख्यग्रन्थे उत्तरार्धः समाप्तः ॥

324

Sl. No : 26720 — श्रीकृष्णलीलामणिमाला — Ms. No: C. 141

Beginning :

रुक्मिणीरमणं पूर्णप्रज्ञवर्येष्टदैवतम् ।
नीलजीमूतसङ्काशं वन्देऽहं पूर्णचिद्घनम् ॥ +
मन्दानामुपकाराय पूर्णबोधार्यनिर्मितम् ।
व्याख्यास्ये तत्प्रसादेन श्रीमद्यमकभारतम् ॥

End :

श्रीमध्वहृत्पङ्कजकर्णिकास्थे
कृष्णे रमालालितपादपद्मे ।
श्रीकृष्णलीलामणिमालिकामिमां
दयालवो मे गुरवोऽर्पयन्तु ॥

Colophon :

इति श्रीमद्विठलाचार्यतनूजश्रीमत्तीर्थाचार्यचरणनलिनसेविना श्रीनिवासेन रचिता श्रीकृष्णलीलामणिमाला समाप्ता ॥

325

Sl. No : 26721 — श्रीपालचरितम् — Ms. No : B. 141

Beginning :

नत्वा श्रीमज्जिनाधीशं सुराधीशार्चितक्रमम् ।
श्रीपालचरितं वक्ष्ये सिद्धचक्रार्चनोत्तमम् ॥
वन्दे श्रीवृषभं देवं देवदेवैस्समर्चितम् ।
भुक्तिमुक्तिप्रदं नित्यं व्यक्तानन्तचतुष्टयम्

End :

सिद्धान्नास्त्यपरस्सुसिद्धजनकस्मिद्धस्य शुद्धा गुणाः
सिद्धिर्मे दधतो मनः प्रतिदिनं हे सिद्ध सिद्धिं कुरु ॥
इदं पवित्रं व्रतमाचरन्ति ये
दृग्विशुद्धानृसुरादिसौख्यम् ।
भुक्त्वा चिरात्सिद्धिपदं व्रजन्ति
श्रीपालवच्चाखिलकीर्तिसूक्तम् ॥

Colophon :

इति श्रीपालभूपालचरिते भट्टारकश्रीसकलकीर्तिविरचिते श्री सिद्धचक्र पूजातिशयसम्प्राप्तश्रीपरिनिर्वाणगमनो नाम दशमः परिच्छेदः ॥

326

Sl. No: 26722 **श्रीभाष्यकारचरितम्** Ms. No : P. 1368

Beginning :

अस्मद्गुरुर्जयति कौशिकवंशभानुः
रामानुजार्य इति दिग्विदितप्रकाशः ।
यद्दर्शनाद्घनतमःप्रभवा न दोषाः
लोकः कुभंभमिति चाधिगतप्रबोधः ॥ (?)
चरितं भाष्यकारस्य कुतुकाय मनीषिणाम् ।
विवक्षुरस्मि मेऽनन्तः क्षन्तुमर्हन्ति साहसम् ॥

End :

परहितकरणादिभिर्गुणैः श्री
भुवनपतेरिव यस्य कूरनाथः ।
शुभगुणनिधिराप्तवत्सलो ×
× णतगतिः स गुरुः श्रियं तनोतु ॥

Colophon :

इति कौशिकवेङ्कटेश्वरकृतौ श्रीभाष्यकारचरिते संपत्तिप्रस्तावे पञ्चमः परिच्छेदः । समाप्तश्चायं ग्रन्थः ॥

327

Sl. No : 26726 **श्रीशैलकुलवैभवः** Ms. No : B. 721

Beginning :

श्रीमान् वेङ्कटनाथार्यः + सदा हृदि ।
विशुद्धविज्ञान + हयग्रीवमहं प्रपद्ये ॥
शुक्लाम्बरधरं + उपशान्तये ।
नमो नमः श्री नरसिंहसूरये + हृद्गताम् ॥
जयन्ति कर्मब्रह्मात्मश्रुत्यर्थस्थितिदेशिकाः ।
मुनयोऽनुग्रहैकान्तस्वान्ता हन्त निरन्तरम् ॥
प्रणम्य सम्प्रदायार्थप्रकाशनधृताशयान् ।
गुरूनिमां प्रवक्ष्यामि शठमर्षणसन्ततिम् ॥

End :

श्रीयामुनाचार्यमनोरथेनास्मन्मनोरथः ।
सम्पूर्णोऽभवदेवाद्य यतस्स्वार्थो न कर्मणि ॥
न शक्तः प्रवयाश्चेति नाब्रूवंस्त्वां विशेषतः ।
यावदस्ति दृढा भक्तिः तावद्भक्तिः प्रवर्धते ॥

Colophon :

इति श्री नृसिंहसूरिविरचिते श्रीशैलकुलवैभवे उपोद्घातो नाम प्रथमोल्लासः ॥ (इति तृतीयपत्रे साङ्के)
उल्लासविंशतिः ॥ (इति ७७ तमे पत्रे साङ्के)
+ + उल्लासः । (इति ८० तमे पत्रे निरङ्के)

328

Sl. No : 26728 **श्लेषचूडामणिः** Ms. No: C. 1128

Beginning :

श्रीराम त्वत्प्रतापार्को भाति कीर्तीन्दुभाक्सदा ।
अमानवचरित्र त्वां न मुधा विबुधा विदुः ॥
कालकालाच्युतविधिः उग्रशौर्यं जशर्मभाक् ।
त्वमार्यया मया वाचा स्तुत्यो राम सुरत्रयम् ॥

End :

× भृशमानया रसधनया सुरधनया प्रसीदतु विश्वकेतनो वेङ्कटाद्रि निकेतनो विहगराट्केतनः ॥

ये वाञ्छन्ति शुभात्मनो वाग्देव्याश्च श्रियः कृपाम् ॥
तैरियं कृतिरासाद्या तरेयुस्ते स्पृहार्णवम् ॥

Colophon :

इति श्रीनिवासकृतश्लेषचूडामणिर्नाम ग्रन्थः समाप्तः ॥

329

Sl. No : 26732 सङ्गीतगङ्गाधरव्याख्या Ms. No: P. 4422/b

Beginning:

वन्दे वन्दारुमन्दारमिन्दुचूडस्य नन्दनम् ।
अमन्दानन्दसंदोहबन्धुरं सिन्धुराननम् ॥
प्रौढस्याप्रतिमस्य विश्रुतमहीशूरस्य विद्वत्प्रभोः
श्रीमत्कृष्णमहीभुजो नरपतेर्विद्वत्प्रधानाग्रणीः ।
श्रीनञ्जक्षितिपालकेन रचितं संगीतगङ्गाधरं
तत्प्रीत्यै तदुदीरितो विवृणुते काशीपतिः पण्डितः ॥
येन शब्दमणेर्व्याख्या नयकल्पतरुः कृतः ।
मुकुन्दानन्दनामापि भाणोऽभाणि रसोज्वलः ॥
श्रवणानन्दिनीनाम्ना कविभावप्रकाशिका ।
श्रवणानन्दिनी भूयादशेषविदुषामियम् ॥

इह खलु निखिलसुपर्वसार्वभौम × × × श्री नञ्जराजनामा महाकविः × × चिकीर्षितं प्रतिजानीते — श्रीगौरीति ॥ श्रयन्त्येतां सर्व इति श्रीः कान्तिः ॥

End :

वरवीरनञ्जनृपतेः सङ्गीतगङ्गाधरे कृतिनः सारज्ञाः परिशीलयन्तु एतत्समस्तपरीशीलनेन आनन्दं विन्दन्त्विति भावः ॥ एतैः परिशीलने कृते स्वोद्यमः सफल इति सर्वं समञ्जसम् ॥

इमां श्रवणनन्दिनीं रसविदो बुधा ये मम
प्रसन्नहृदया दयाजलधयो बहूकुर्वते ।
तदीयपदद्मयोऽस्यमयं प्रणामाञ्जलिः
सरोजमुकुलाकृतिःशिरसि संततं न्यस्यते ॥

Colophon :

इति कौण्डिन्यकुलतिलक श्रीमदुमापतिसुधीतनय काशीपतिपण्डित-विरचितायां संगीतगङ्गाधरव्याख्यायां श्रवणानन्दिनीसमाख्यायां षष्ठः सर्गः ॥

330

Sl. No : 26736 सङ्गीतराघवः Ms. No: P. 290

Beginning :

वैदेहीवदनाब्जरमणीर्बृन्दारुचिन्तामणिः
विस्फूर्जद्रघुवंशमौक्तिकमणिःपृथ्वीशचूडामणिः ।
सोऽयं सारचिरंतनोक्तिरमणीस्सीमन्तजाग्रन्मणिः
पौलस्त्योग्रभुजङ्गगारुडमणिः पायाच्चिरं चिन्मणिः ॥

End :

पृथुलनितम्बकुचे परिरम्भय किम्भजसि ह्यविलंबम् ।
वितर मधूनि विभामि च भामिनी तव मधुराधरबिम्बम् ॥
रामकवेर्भणितं रसबन्धरमधुरपदं मृदुगीतम् ।
श्रीमहिदज्जयतामघहरं घटनायकं सर्वजनपूतम् ॥

Colophon :

अष्टपदी × मङ्गलमहाश्री ॥

331

Sl. No : 26737 सङ्ग्रहरामायणम् Ms. No: P. 397

Beginning :

वन्दे वन्द्यं विधिशिवमहेन्द्रादिबृन्दारकेन्द्रैः
व्यक्तं व्याप्तं स्वगुणगणते देशतः कालतश्च ।
धूतावद्यं सुखचितिमयैः मङ्गलैर्युक्तमंशैः
सामान्यं नो विदधदधिकं ब्रह्म नारायणाख्यम् ॥

End:

इति पदमसुराय प्रेष्ठभक्ताय रामः
वसितसितनुबन्धून् प्रेमपीयूषसिन्धून् ।
भुवनभरणरक्षाभङ्गलीलाप्रसङ्गान्
वितरति कमलायै दत्तशेषानपाङ्गान् ॥

Colophon:

इति श्रीमत्कविकुलतिलकश्रीमत्रिविक्रमपण्डिताचार्यसूनुनारायणपण्डितेन विरचिते श्रीमत्संग्रहरामायणे उत्तरकाण्डेऽष्टमस्सर्गः ॥
सर्ग-६४ श्लोक — ३४८७ ॥

332

Sl. No: 26746 सङ्ग्रहरामायणव्याख्या Ms. No: C. 2026/2

Beginning:

पूर्वसर्गान्ते हनुमतिमतिदूर्तिं प्रैरयन्नित्युक्तम् । तत्र हनुमदवतारादिकं वक्तुं पीठिकामाचरति । प्लवङ्गमानामिति । प्लवङ्गमानां वानराणां अधिकश्चासो राजा च अधिराजः । अधिराजस्य भावः आधिराज्यं अधिराजत्वं स्वामित्वं गतः प्राप्तः केसरिनामधेयः केसरिनामकः प्लवङ्गमः । द्युलोके स्वर्गे शच्या सह शचीकान्त इव शचीकान्तः इन्द्रः इव यथा उपासत तथा सुगात्र्या ॥

End:

क्रतुमिति । अथ कपीनां मुखविकासकरणानन्तरं हरितुष्ट्यै हरिप्रीत्यै क्रतुमिव यज्ञं कर्तुकामो यजमानो यथा तथा हरितुष्ट्यै विक्रमं पराक्रमं कर्तुकामः कर्तुमिच्छन् यथा दीक्षणीयां सङ्कल्पसम्बन्धिनीं इष्टमिव यागं यथा तथा प्लुतिं एकप्लवनं करिष्यन् कर्तुकामः एकान्तभक्तः सः हनूमान् रघुकुलतिलकं रघुकुलश्रेष्ठं श्रीकान्तं लक्ष्मीपतिं असमानं असदृशं एकाभिरामं मुख्यतो मनोहरं रामं समनमत् । सम्यक् नमः कृतवान् ॥

Colophon:

इति श्रीमन्नारायणपण्डिताचार्यविरचितायां सङ्ग्रहरामायणस्य टीकायां काशी श्रीनिवासार्यकृतायां किष्किन्धाकाण्डे अष्टमः सर्गः ॥ समाप्तोऽयं काण्डः ॥

333

Sl No 26752 सत्काव्यरत्नम् Ms No: P. 4091/1

Beginning :

वाचं वो रचयतु सर्वदान्तरङ्गे
गाङ्गेयस्सरसनयोदयां दधानः ।
सत्याप्तो बुधकुलमौलिबन्धुरोजः
श्रीरामस्तुतगुरुमाननाब्जहंसः ॥

End :

एवं कौशिक यज्वराजतमणिः श्रीसूर्यनारायण-
क्षीराम्भोधिविधोरनन्तपदिनो नारायणस्यादितः ।
चित्रं पूर्णमिदं चिदम्बरकवेः पुत्रस्य रामायण-
श्रीमद्भारतसारकृष्ण चरितंसत्काव्यरत्नं कृतिः ॥

Colophon :

— — —

334

Sl. No : 26753 सत्काव्यरत्नव्याख्या Ms. No : P. 4091/2

Beginning :

पारं भावि बुधाः सुधारसधरं रामायणं भारतं
सारं भागवतं च किं च सरसा यद्येकदा वीक्षितुम् ।
प्रज्ञातुं च पदप्र × × सर्वं तु कुर्वन्तु ते
प्रज्ञातुं च हृदश्चिदम्बरकवेस्सत्काव्यरत्नं हृदि ॥

काव्यमारभमाणः कविः अशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखं इति वचनादाशीर्वचनमाचरति–वाचमिति ॥

End :

एवमिति । एवं उक्तप्रकारेण कौशिकः यज्वराजतमणिः श्रीसूर्यनारायण एव क्षीराम्भोधिः तस्य विधोः इन्दोः आदितः आदौ सार्वविभक्तिकस्तसिल् अनन्त पदिनः नारायणस्य अनन्तनारायणस्येत्यर्थः ॥

पुत्रस्य चिदम्बरकवेःकृतिः रामायणश्रीमद्भारतसारकृष्णचरितं चित्रं स तु प्रशस्तमिदं काव्यरत्नं सम्पूर्णम् – समाप्तम् ॥

Colophon :

इति पदवाक्यप्रमाणपारावारपारीण श्रीकौशिकगोत्रविशेषक श्रीमदनन्त नारायणसुमतिकृतायां रामायणभारतभागवतसारस्य काव्यरत्नस्य व्याख्यायां अर्थप्रदीपिकाख्यायां तृतीयः सर्गः ॥

335

Sl. No : 26754 सत्यनाथाभ्युदयम् Ms. No : C. 2167/a

Beginning :

तं सत्याभिन × समीक्ष्य विमलं दूरीकृतारिव्रजं
शान्तं दिक्षु पक्षाश्रयं द्विजपतिं सत्स्वन्तरायच्छिदे ।
पारवार इवामृतांशुमुदितं कल्लोलसार्क्षैस्त ×
मुद्भिः संववृधे पुनःपुनरसौ श्रीसत्यनाथो गुरुः ॥

End :

श्रीसत्याभिनवीनतीर्थयतिराट्शिष्येण तत्प्रीतये
शेषाचार्यतनूभवेन रचिते सङ्कर्षणेनादरात् ।
काव्ये श्राव्यपदे महागुणनिधिश्रीसत्यनाथोदये
× तद्गुणसारलुब्धकविभिः सर्गोऽयमेकादशः ॥

Colophon :

इति श्रीसत्यनाथाभ्युदये एकादशः × ×

336

Sl. No . 26756 सत्यनिधिविलासम् Ms.No : C. 2153/1

Beginning :

लक्ष्मीसहायश्चतुराननादि-
सौवर्गवर्गैर्जगतां शिवाय ।
संप्रार्थ्यमानो रघुवंशरत्नं
लोकाभिरामं वपुराददे यः ॥

End :

इति सकलकलाप्रवीणवाणी-
विभवनिरस्तसमस्तमायिसंघः ।
प्रणयिनि कृतमानसः स लक्ष्म्या
व्यजयत सत्यनिधिर्जगत्याम् ॥
सद्विद्यागुरुसत्यनाथयतिराट्श्रीपापसंसेवनात्
प्रोद्यत्पण्डितराजशब्दबिरुदो यः श्रीनिवासः कविः ।
तस्य श्रीरघुनाथकीर्तनसुधास्वादैकवृत्तेः कृतौ
काव्ये सत्यनिधीयचारुचरिते सर्गोऽभवद्यष्टमः ॥

Colophon :

इति श्रीसत्यनाथपूज्यचरणशिष्यश्रीनिवासकृते महाकाव्ये श्रीमत्सत्यनिधिविलासे अष्टमः सर्गः ॥

337

Sl. No : 26757 सत्यनिधिविलासटीका Ms. No : C. 2153/2

Beginning :

सत्यनिधिविलासाख्यं काव्यं चिकीर्षुः पण्डितराजो नाम कश्चित् श्रीनिवास विपश्चित् निर्विघ्नेन परीसमाप्त्यर्थं × दौ वस्तुनिर्देशात्मकं मङ्गलं कुर्वन् तदुपोद्घातत्वेन रामचरितं वर्णयति ॥

End :

इति पूर्वोक्तप्रकारेण व्यजयत विशेषेणोत्कृष्टोऽभूत् । विपराभ्यां ज्येरि-स्यात्मनेपदम् । सद्विद्येत्यादि । व्याख्यातमेतत् ॥

Colophon :

इति श्रीसत्यनिधिविलासटीकायां अष्टमः सर्गः ॥

338

Sl. No : 26758 सरसजनचिन्तामणिः Ms. No: A. 785/1

Beginning :

श्रीनाभ्यङ्गभवोऽमलो नरकभिद्धास्वत्कुभृत्सत्पदो
रामाद्योपगतस्मयस्य सुगतो रत्यात्मको मोहदः ।

योऽनन्तप्रगुणाङ्गयुक् स्तुतिशतस्तुत्यो जितो गोपतिः
वीरः कामसुखं सुदम्भवमुरुश्रेयोऽर्थिनां वः क्रियात् ॥

End :

श्रियमतनुवरस्योद्भाविशान्तस्य सद्वाक्
जयति पृथुतनूजा श्रीमते वर्धयन्ति ।
सुवचनहसद्भिश्चन्द्रिकाभिस्सदात्रा-
म्बुधि कुमुदचकोरांश्चैव तातालिभृत्यान् ॥

Colophon :

इति श्रीमत्सम्यक्त्वरत्नकिरीटविज्ञानरत्नकुण्डल × भूषितस्य × श्री शान्तराजपण्डितेन विरचिते सरसजनचिन्तामणिनाममहाकाव्ये × × पञ्चमः सर्गः ॥

339

Sl. No : 26760 सरसजनचिन्तामणिव्याख्या Ms. No : P. 785/3

Beginning :

श्रीलीलायां सभायामहमहमिकया भक्तिभारावनम्र-
त्रैलोक्येशप्रभावात्कनकमुकुटसंघर्षणस्रस्तरेणुः ।
यत्पादाम्भोजधूलीस्थितिमवहदुरुज्ञानदृग्वीर्यसौख्यो
लक्ष्मीवान्भव्यबन्धुर्वृषभजिनपतिस्स श्रियं वो विदध्यात् ॥ + +
श्रीमत्सरस्वतीं देवीं नत्वा व्यख्यायते मया ।
प्रेक्षावत्प्रेप्सितं सर्वदेवदर्पणतर्पणम् ॥
अस्यार्थः कथ्यते व्याख्यायते — टीकायते ॥

End :

अतनु अत्यन्तं वर्धयन्ती एधयन्ती सती उद्भावि उत्कृष्टद्युतिः रविरिव यथा भवति तथा सर्वोत्कृष्टतया वर्तत इति ध्वनिः ॥ × × तज्ज्येष्ठानुजेन पद्मराजपण्डितेन विरचिते भावकजन-कल्पवृक्षाख्याने तद्व्याख्या × पञ्चमः सर्गः ॥

Colophon :

— — — ....

340

Sl. No : 26763 साळुवाभ्युदयम् Ms. No : A. 771

Beginning :

[बिरुदकविप्रपितामहडिण्डिमकविराजनाथप्रणीतं साळुवभ्युदयमहाकाव्यम् ।
त्रयोदशसर्गगुम्भितम् । तत्रायं प्रथमः सर्गः]

करोतु लक्ष्मीं कलभाननो वः
कारुण्यपूरप्रमदा यदीयः ।
मन्दाः शिरोमौक्तिकसस्यशालि-
क्षेत्रं नदीमातृकयन्त्यजस्रम् ॥

End :

इत्यस्मिन् सुकृतैः कलिं कृतयतः श्रीगुण्डयाम्भोनिधेः
शीतांशोर्नरसिंहविग्रहजुषो विष्णोश्चरित्रेऽद्भुते ।
श्रीमड्डिण्डिमराजनाथकविकृत्श्रीसाळुवेन्द्रोदये
काव्ये नव्यरसे त्रयोदशमितः सर्गो जगमाद्भुतः ॥

Colophon :

इति श्रीमण्डलीकमण्डलवरहण्डमेदिनिमीसरगण्डराजपक्षिसाळुवकठारिदणी-वराहादिबिरुदमण्डनस्य गुण्डग्रराजकुमारस्य कुमारसमविक्रमस्य विक्रमाक्रोंदग्रपराक्रमस्य परकुञ्जराक्रमणसिंहस्य सिंहलादि द्वीपाधिप संहतिसेव्य-मानस्य सिंहसंहननस्य नरसिंहराजमहाराजस्य चरिते द्वादशदेश्यवृत्ति-पारदृश्वनोऽष्टभाषापरमेश्वरस्य अष्टदिग्विजयपटहीकृत बिरुदडिण्डिमाडम्बरस्य षड्दर्शनषण्मुखस्य शैवशास्त्रजीवातोः अखिलवेदसागरसांयात्रिकस्य डिण्डिम कविसार्वभौम इति कृतापरबिरुदनाम्नो श्रीमदरुणगिरीशस्य तपःपाकस्य डिण्डिम कविराजनाथस्य कृतौ नवरसे साळुवाभ्युदये महाकाव्ये त्रयोदशः सर्गः ॥

समाप्तमिदं महाकाव्यम् ॥

341

Sl. No. 26768 **सुदर्शनविजयः** Ms.No : P. 1598

Beginning :

श्रीवल्लभस्य श्रितकल्पकस्य
वरस्य पुंसः प्रथितोदयो नः ।
पद्मातिहर्षं परमं च बोधं
सङ्कल्पभानुः सततं विधत्ताम् ॥
जगत्प्रसिद्धानुगुणस्य तस्य
जज्ञे सुतः सुन्दरबाहुनामा ।
तदीयसारस्वतदुग्धसिन्धु
सुधानिभं चक्रजयाख्यमेतत् ॥

End :

नाथाज्ञां शिरसा प्रगृह्य सुमनोमालामिवोल्लासिनीं
नालीकासनशर्वमुख्यविबुधैस्तूयमानः प्रभुः ।
विश्वत्राणविचक्षणत्रिभुवनालङ्कारचूडामणिः
विष्वक्सेनसमन्वितो विजयते श्रीविष्णुचक्रेश्वरः ॥

Colophon :

आण्डान्देशिकवंशमौक्तिकमणिः श्रीवेङ्कटार्यस्सुतः
यं देवी च सुषाव सुन्दरभुजं प्रासालमेलुप्रथा ।
तेन श्रीफणिराजशैलनिलयप्रीत्यै कृतेऽस्मिन् महा-
काव्ये चारुणि चक्रराजविजये सर्गोऽभवत् द्वादशः ॥

342

Sl No · 26776 **सूक्तिसुधानिधिः** Ms No: P. 1642/1

Beginning :

विघ्नेशो वः स पायाद्विहृतिषु जलधीन् पुष्कराग्रेण पीत्वा
यस्मिन्नुद्धृत्ते हस्तं वमति तदखिलं द × ।
कमलभूः क्वाप्यनन्तः क्वच श्रीः × ×
क्वप्यौर्वः क्वापि शैलाः क्वचन मणिगणाः क्वापि नक्रादिसत्त्वाः ॥

End :

अत्युक्तो यदि न प्रकुप्यसि मृषावादं न चेन्मन्यसे
तद्भूमादद्भुतदर्शनेन रसना येषां न कण्डूयते ।
देव त्वत्तरुणप्रतापदहनज्वालावलीशोषिताः
सर्वे वारिधयः त्वारिवनितानेत्राम्बुभिः पूरिताः ॥

Colophon :

सुन्दरकाण्डान्ते दृश्यते —

इति श्रीमद्राजाधिराज परमेश्वर श्रीमदिम्मडि देवरायविरचिते सूक्तिसुधा निधौ सुन्दरकाण्डः ॥

343

Sl. No : 26778 सूर्यशतकम् **Ms. No : P. 6717/2**

Beginning :

जृम्भा × म्भोद्भवभिवदधतः सान्द्रसिन्दूररेणुं
रक्ताः सिक्ता इवौघैरुदयगिरितटीयातुधानान्नुदस्य ।
आयान्त्या तुल्यकालं कमलवनविचे × वो विभूत्यै
भूयासुर्भासयन्तो भवनमभिनवा भानवो भानवीयाः ॥

End :

लोकालोकस्य भूत्यै शतमितिरचिता श्रीमयूरेण भक्त्या
युक्तश्चैवानवद्यैः सकृदपि पुरुषः सर्वपापैर्विमुक्तः ।
आरोग्यं सत्कवित्वं श्रियमतुलबलं कीर्तिमायुःप्रकर्षं
विद्यामैश्वर्यमर्थं सुखमिह लभते सोऽत्रसूर्यप्रसादात् ॥

Colophon :

इति मयूरकृतं सूर्यशतकं समाप्तम् ॥

344

Sl. No : 26781 सेतुवन्धः **Ms. No : C. 1813/a**

Beginning :

णमह: अद्धिअ तुङ्गं अवसारिअ वित्थअं अणोणअगहिणं ।
अप्पलहुअ परिसाहं अणाअ परमच्छपाअडं महुमहणम् ॥

End :

महिअलपडिअविसण्डुल विहीसण विलावजा आणु ।
अंवेण्णावि रामेणावि आणत्तो रकस्वसाहिवइ सकारे ॥

Colophon :

— — —

Extra information :

व्याख्याकारेण ग्रन्थस्यास्य कर्तृविषये —

'इह तावन्महाराजप्रवरसेननिमित्तं महाराजाधिराजविक्रमादित्येनाज्ञाप्तो निखिलकविचक्रचूडामणिः कालिदासमहाशयः सेतुबन्धप्रबन्धं चिकीर्षुः' इति लिखितत्वात् ग्रन्थकारः कालिदास इति अनुमीयते ॥

345

Sl. No : 26782 सेतुबन्धव्याख्या Ms. No: C. 1813/b

Beginning :

× इ्वाहुजकुलक्षीरान्विहारायितो
धीरा शयमहीन्द्रतिलको वारावलीस्तवः ॥
+ सेतौ दुर्गे यदि विरचितुं वर्तते वा सवमीहा
दत्तस्नेहं वदिह कवयो रामसेतुप्रदीपे ।
मोहध्वान्ते सपदि शमिते यद्गतामिरिशिखाभिः
का वा मावानधिगमकथा काचभिः कण्टकेभ्यः ॥

+ + इह तावन्महाराजप्रवरसेननिमित्तं महाराजाधिराजविक्रमादित्ये नाज्ञाप्तो निखिलकविचक्रचूणामणिः कालिदासमहाशयस्सेतुबन्धप्रबधं चिकीर्षुः निर्विघ्नपरिसमाप्त्यर्थं रामचन्द्रात्मकमधुमथनरूपाभीष्टदेवतानमस्कारोपदेश मुखेन मङ्गलमाचरन्नाह — णमह ॥

End :

सूर्याचन्द्रमसोरुदञ्चति कथा यावत्तथा दीप्यते
यावत्कौस्तुभकान्तिजालजटिला वैकुण्ठवक्षस्स्थली ।
गङ्गावीचिभिरञ्चितो हरजटाजूटः समुज्जृम्भते
यावत्तावदकब्बरेण जगती राजन्वता वर्तताम् ॥

Colophon :

इति निखिलमहीमहेन्द्र + श्रीमदकबरजलालदीनकृपाकटाक्षवीक्षित भानुभक्ति + राजाधिराज श्रीश्रीरामदासविरचिते रामसेतुप्रदीपो नाम ग्रन्थः सम्पूर्णः ॥

346

Sl. No : 26784 हंसदूतकाव्यम् **Ms. No : C. 4535/1**

Beginning :

दुकूलं बिभ्राणो दलितहरितालद्युतिहरं
जपापुष्पश्रेणी रुचिरतरपादाम्बुजतलः ।
तमालश्यामाङ्गो दरहसितलीलाञ्चितमुखः
परानन्दाभोगः स्फुरतु हृदि मे कोऽपि पुरुषः ॥

End :

रसानामाधारैरपरिचितदोषः सहृदयैः
मुराराते: क्रीडावलिनिबिडरूपार्पितगुणः ।
प्रबन्धोऽयं बन्धोरखिलजगतामस्य सहसा
प्रभोरन्तः सान्द्रां प्रमदलहरीं पल्लवयतु ॥

Colophon :

इति श्री महाकाव्यं हंसदूताख्यं समाप्तम् ॥

347

Sl No · 26786 हंससंदेशः **Ms No : P. 72/1**

Beginning :

वंशे जातस्सवितुरनघे मानयन् मानुषत्वं
देवः श्रीमान् जनकतनयान्वेषणे जागरूकः ।
प्रत्यायाते पवनतनये निश्चितार्थः स कामी
कल्पाकारान् कथमपि निशां आविभातं विषेहे ॥

End :

सन्दिश्यैवं सह कपिकुलैः सेतुना लङ्घिताब्धिः
पङ्क्तिग्रीवे युधि विनिहते प्राप्य सीतां प्रतीतः ।

राज्यं भूयः स्वयमनुभवन् रक्षितं पादुकाभ्यां
रामः श्रीमानतनुत निजां राजधानीं सनाथाम् ।।

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य हंससंदेशोऽयं संपूर्णः ।।

348

Sl. No: 26788 — **हंससंदेशटिप्पणी** — Ms. No: B. 924/1

Beginning:

यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी ।
तं नमिकर्मीकुर्मः श्रीकृष्णब्रह्मतन्त्रगुरुवर्यम् ।।
असुन्दरत्वं तु तत्र शब्दश्रवणमात्रतः ।
सुगमं स्यादित्यतोऽत्रासाधुतैव प्रकाश्यते ॥

End:

सन्देशमविकृतस्य कृतस्य ग्रन्थस्य च अर्थैक्यस्य सुतरां अयोगाच्चेति । श्रवणे अन्तः अन्तः श्रवणमिति । अथवा आचार्यसकाशाद्ग्रहणरूपं यच्छ्रवणं तदात्मकं चक्षुरिति रूपकं, रूपकप्रकरणादिति ।।

Colophon:

इति रसास्वादिनीपादुकानामिकायां हंससंदेशटिप्पण्यां द्वितीयाश्वासः ॥

349

Sl. No: 26790 — **हंससंदेशव्याख्या** — Ms. No: P. 9596

Beginning:

श्रीमन् वेङ्कटनाथार्यः—सदा हृदि ।।
वेदान्ताचार्यमहं विविधासंख्येयगुणगणैर्जुष्टम् ।
वन्देतरकृतहंससंदेशश्लोकविवरणं कुर्वन् ॥
वाधूलश्रीनिवासार्यं कुशिकान्वयजं गुरुम् ।
उभौ नत्वा प्रवक्ष्यामि हंससंदेशटिप्पणीम् ।।

End :

श्रीमान् – नित्ययोगे मतुप् । सीताविरहरहितः निजां स्वकीयां राजधानीं पट्टणं सनाथां अतनुत नाथसहितां कृतवान् ।। तनुविस्तारे इति धातोः लुट् ।।

Colophon :

वेदान्ताचार्यकृपया यथाशक्ति यथामति ।।
श्रीभाष्यश्रीनिवासार्यतनुजो व्यवृतोत्तरम् ।
हृदि स्थिते महाचार्ये भुवि किं दुर्लभं नृणाम् ।
तत्कृपामवलम्ब्यैव सन्देशविवृतिः कृता ।।

350

Sl. No : 26793 हरिविलासकाव्यम् Ms. No : C. 1820

Beginning :

रचयति सहसा यच्चित्रमेतत्प्रपञ्चं
प्रशमयति च तद्वत् केनचित् कौतुकेन ।
अविदितमपरैस्तच्चण्डमुण्डादिनाना-
दनुजदलनदक्षं शर्वसर्वस्वमव्यात् ।।

End :

नानागुणैरवनिमण्डलमण्डनस्य
श्रीसूर्यसूनुहरिभूमिभुजो नियोगात् ।
त्रैलोक्यकौतुककरं क्रियते स्म काव्यं
लोलम्बराजकविना कविनायकेन ।।

Colophon :

इति श्री हरिविलासे महाकाव्ये पञ्चमः सर्गः ।।

351

Sl. No : 26794 हरिश्चन्द्रगुणोदयः Ms. No : B. 323

Beginning :

श्रीमान्विशुद्धस्सकलाभिनन्द्य-
स्तमोहरस्सन्प्रभुरस्ततापः ।
जयत्यनन्तोदयकृद्द्विजेन्द्रः
श्रितो हरिश्चन्द्रसमण्डलैकः ।।

End :

मन्दारपीतमकरन्दमिळिन्दवृन्दे
श्रीमन्दराद्रिमणिकन्दरमन्दिरस्था ।
वृन्दारकाश्च कलयन्तु समुन्दरीकाः
सानन्दमिन्दुसुगुणा नृपुन्दरस्य ॥

Colophon:

इत्यनन्तसूरिविरचिते हरिश्चन्द्रगुणोदये महाकाव्ये विंशस्सर्गः ॥

352

Sl. No : 26796 **अभिनवकादम्बरी** Ms. No : P. 4685

Beginning :

नत्वा देवीं श्रीपुराख्यगुरोश्च चरणाम्बुजम् ।
स्वप्रबन्धकथां वक्ष्ये तद्ज्ञानाय समासतः ॥
महीसूरपुरी नाम राजधानी महीयसी ।
चकास्ति विबुधैः पूर्णा देशे कर्नाटनामनि ॥
\+ \+ \+ \+
अहोबलनृसिंहाख्यः कविस्तस्य सुतोऽस्ति हि ॥
\+ \+ \+ \+
अथ सोऽप्यब्रवीदेनं यदीदृक्कृतिकृद्भवान् ।
कादम्बरीं तां जानीहि कर्तुमन्यैर्दुरासदाम् ।।

End :

दुष्टानां यमवज्जनस्य पितृवत्कान्तातते: कामव-
द्विप्राणां वृषवत्कवेस्सुरभिवद्दीनस्य कल्प × ।
आशासन्ततिमञ्चयन्स्वयशसा लक्ष्म्या समेतस्सुखं
पृथ्वीं पालयति स्म कृष्णनृपतिर्जिष्णुस्त्रिलोकीमिव ।।

Colophon :

इति श्रीमत्काश्यपकुलजलधिकौस्तुभ श्रीनायन्नसूरितनुज रामकृष्णा-
ध्वरीन्द्रात्मजाहोबलनृसिंहकविविरचितायां अभिनवकादम्बर्यां उत्तरकाण्ड
स्संपूर्णः ।।

353

Sl. No : 26797 कविकल्पलता Ms. No : C. 2549/4

Beginning :

भर्गादिमस्तक सुदुर्गान्तरस्फुरित मार्गावितद्वर झर-
स्वर्गापगायित निसर्गात्मसक्ति भर सर्गार्थबर्यक्रुपया ॥
गोपलनामकविराधिकलापान्ववाय कलशाकूपारशीतकररूपान्यः ।

End :

संसारिगेह इव पृथुकै रव भासकारिणि ।
सन्मुनिमानस इव अभ्रान्तप्रकारो आस्तिकचित्त इव नवधानिष्ठाकान्ते ॥
स्वर्ग इव सुराधारानुगते ज्ञोदयहेतावपि जडध्युदयहेतौ..नभस्स्फुरिते ×

Colophon:

— — —

354

Sl. No : 26807 कादम्बरी Ms. No: P. 3788/2

Beginning :

रजोजुषे जन्मनि सत्ववृत्तये
स्थितौ प्रजानां प्रलये तमःस्पृशे ।
अजाय सर्गस्थितिनाशहेतवे
त्रयीमयाय त्रिगुणात्मने नमः ॥
आसीदशेषनरपतिशिर:समभ्यर्चितशासनः पाकशासनः इवापरः —

End :

कादम्बरी महाश्वेतया सह महाश्वेता तु पुण्डरीकेण सह पुण्डरीकोऽपि चन्द्रमसा सह परंपरावियोगेन सर्व एव सर्वकालं सुखान्यनुभवन्तः परां कोटिमानन्दस्याध्यगच्छन् ॥

Colophon :

— — —

355

Sl. No : 26813

कादम्बरी

Ms No: P. 570/2

Beginning ;

देहद्वयार्धघटनारचितं शरीरं
नीतं ययोरनुपलक्षितसन्धिभेदम् ।
वन्दे सुदुर्घटकथापरिशेषसिद्ध्यै
सृष्टेर्गुरू गिरिसुतापरमेश्वरौ तौ ॥
व्याधूतकेसरसटातिकरालवक्त्रं
हस्ताग्रविस्फुरितशङ्खगदासिचक्रम् ।
आविष्कृतं सपदि येन नृसिंहरूपं
नारायणं तमपि विश्वसृजं नमामि ॥
कादम्बरीरसभरेण समस्त एव
मत्तो न किञ्चिदपि चेतयते जनोऽयम् ।
भीतोऽस्मि यन्नरसमर्पणवर्धितेन
तच्छेषमात्मवचसाप्यनुसन्दधानः ॥
अपि चेदानीमानीतस्यापि कुमारस्य न ददाति तरलता—

End :

+ पुण्डरीकेण सह पुण्डरीको चन्द्रमसा सह परस्पराबियोगेन सर्व एव सार्वकालं सुखान्यनुभवन्तः परां कोटिमानन्दस्याध्यगच्छन्निति ॥

Colophon :

समाप्ता चेयमुत्तरकादम्बरी ॥

356

Sl No 26817

कादम्बरीटीका

Ms No: P. 4088

Beginning :

जयतु जगतां जन्मस्थेमप्रशान्तिविधायिनी
जलनिधिभुवो यस्या देव्याः कटाक्षपरम्परा ।
अपि च विजयश्री + +
नवजलधरश्यामःश्रीमान् तमालतरूज्वल । ज्ञातुं गां भुवि के वयम् ॥

End :

परां कोटिमानन्दस्याध्ययच्छन्निति ।
हरिहरहिरण्यगर्भा लक्ष्मीगौरीसरस्वतीसहिता: ॥
कादम्बरीकथेशा रक्षन्तु समस्तभुवनानि ।
+ + + + +
साहित्यार्णवकर्णधारपदवी मालम्बतेसांप्रतम् ॥

Colophon :

इत्युत्तरकादम्बरीटीका समाप्ता ॥

357

Sl. No : 26817 उत्तरकादम्बरीटीका Ms. No: P. 4088

Beginning :

श्रीमत्तारानाथतर्कवाचस्पतिकृताऽनघा पूर्वकादम्बरीव्याख्या लिख्यते × भूतकाम: । शक्ति: अस्त्रविशेष: । प्रभावादिकं सामर्थ्यं च । विमानीकृतराज हंसमण्डल: × राजहंसा: हंसविशेषा: ॥

End :

दिवं गते बाणबट्टे तत्पुत्रेण कथापूरणार्थं उत्तरार्धं कृतम् । तस्य च अनति रमणीयत्वात् श्रद्धाभाजनत्वाभावेन विवृति: न कृता ॥
वात्स्यवंशावतंसस्य कालिदासविद: सुत: ।
श्रीतारानाथशर्मेमां विवृतिं कृतवान् मनाक् ॥

Colophon :

पूर्वकादम्बरीव्याख्या संपूर्णा ॥

358

Sl. No . 26820 कादम्बरीव्याख्या Ms.No : P 7310

Beginning :

इह खलु महता जनेन परिगृह्यते बहुविधागमनिबन्धमेकन्लव: यदुत सकल लोकसर्गसन्त्राण × णकारणं रणनिपुणवारणदनुजपतिकुम्भदारणसमयसक्तमौक्ति कनिकरकलितपरश्वधाराजलपुरयुवतिवदामदहसितकौमुदि—

End :

नितितस्समर्थमिति कथयित्वा तान्विससर्ज ॥
अनन्तरमाहूय मल्लिकार्जुनं सचिवं महता स्कन्धावारेण सार्धमनुपदमागच्छेत्यादिश्य कार्यगौरवाद्विलम्बासहिष्णुरपरेद्युरवनिपतिर्द्विरदगीरनाथनिनंसानिभादनतिवहुलपरिकरयाऽऽसीत् ॥

Colophon :

ओं कविराजराजाभिनवभट्टबाणकविकालकालिदासकाह्लकविसार्वभौम कालकविकलभ सकलविद्याचक्रवर्तिविरचितगद्यकर्णामृतं परिसमाप्तम् ॥

359

Sl. No : 26824 **गद्यचिन्तामणिः** **Ms. No : A. 92**

Beginning :

श्रियः पतिः पुष्यतु वः समीहितं
त्रिलोकरक्षानिरतो जनेश्वरः ।
यदीयपादाम्बुजभक्तिशीकरः
सुरासुराधीशपदाय जायते ॥
विद्यास्फूर्तिविधायिधर्मजननीवाणीगुणाभ्यर्थिनाम्
वक्ष्ये गद्यमयेन वाङ्मयसुधावर्षेण वाक्सिद्धये ॥

End :

स्थितमनन्तविज्ञानवीर्यदृश्यात्मकमनन्तकर्मक्षयापेक्षमनन्तपूर्वजनानुपलब्धपूर्वं पुनरनुत्पाद्यमनुपरममनुपममनुत्कर्षमनपकर्षमनुक्षणसुलभं सुखमनुभूयते ॥

Colophon :

इति श्रीमद्वादीभसिंहविरचिते गद्यचिन्तामणौ मुक्तिश्रीलम्बो नाम एकादशो लम्बः ॥
श्रीमद्वादीभसिंहेन गद्यचिंतामणिः कृतः ।
स्थेयाद्दोड्डयदेवेन चिरायास्थानभूषणम् ॥
गद्यचिंतामणिर्लोके चिंतामणिरिवापरः ॥

360

Sl. No : 26828 दमयन्तीकथाविवरणम् Ms. No : C. 1625

Beginning :

सृष्टिप्रबन्धे चतुराननस्य
भावानशेषान् विलसद्विशेषान् ।
विवृण्वती स्वेन वचश्च येन
सा भारती बोधविवृद्धये नः ॥

End :

इन्दोः मण्डले हरं ध्यायन्ती सा धर्मशय्यायामस्वपत् समाधिलयं गतेति भावः ॥
इति विषमपदप्रकाशमेनं
दमयन्त्याः तनुते स्म चण्डपालः ।
शिशुमतिलतिकावितानचैत्यं
चतुरमतिस्फुटभित्तिचारु चित्रम् ॥

Colophon :

इति श्रीचण्डपालविरचिते दमयन्तीकथाविवरणे द्वितीयः उच्छ्वासः ॥

361

Sl. No : 26831 भाषाकुसुमाञ्जरी Ms. No : P. 896/3

Beginning :

श्रीमत्पार्श्वजिनं नत्वा भाषाकुसुममञ्जरीम् ।
ब्रवीमि बालभाषार्थं सङ्क्षेपेण जनप्रियाम् ॥

को भवान् कस्माद्देशात्समागतोऽसि । विश्वनाथोऽहं तारुष्मदेशात्समागतोऽसि । तुरुष्कदेशं विहाय तौळवदेशं प्रति किमर्थमागतोऽसि । भो सखे शृणु ब्रवीमि आगमनप्रयोजनम् ॥

End :

दूरदेशान्तरमागतोऽहमिति × चिन्तां मनसि मा कुरु । सत्पुण्यवशात् सर्वे जनाः पठनार्थं सहायं करिष्यन्ति । भो मित्र ईदृङ्मित्रत्वं भावः मम आचन्द्रार्कस्थायी भवतु आयुष्मान् भव ॥

Colophon :

श्रीमत्करवीर × × श्रीमद्विश्वनाथकृता भाषाकुसुममञ्जरी समाप्ता ॥

362

Sl No · 26832 भोजप्रबन्धः Ms No: P. 7674

Beginning :

धाराधीश्वरस्य भोजस्य प्रबन्धो लिख्यते । आदौ धाराराज्ये सिन्धुलसंज्ञो राजा चिरं प्रजाः परिपालितवान् । तस्य वृद्धत्वे भोज इति पुत्रो बभूव ।

End :

कैलासीयति × दीयति लसत्कर्पूरपुञ्जीयति
क्षीरोदीयति मौक्तिकीयति नभोगङ्गातरङ्गायति ।
हंसोड्डीयति मानसां पतिरसान्नेदीयतीक्ष्णोभिभृ-
न्नाथायत्यमृतायति क्षितितले देव त्वदीयं यशः ॥

Colophon:

इति भोजप्रबन्धः ॥

363

Sl. No : 26739 वासवदत्ता Ms. No : P. 7261/2

Beginning :

करबरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥
खिन्नोऽसि मूञ्च शैलं + हरिर्जयति ॥
कठिनतर ॥ स जयति ॥ + । हिमकरोद्योतः ॥
+ + गतवति भुवि विक्रमादित्ये ॥
+ सरस्वतीदत्तवरप्रसादः
चक्रे सुबन्धुस्सुजनैकबन्धुः ।

End :

ततः कन्दलिके त्वश्रुतवृत्तान्तसमागतेन मकरन्देन तथा वासवदत्तया च स्वपुरं पाटलीपुत्रं गत्वा निवसन् हृदयाभिलषितानि तानि सुखानि ताभ्यां सहानुभवन् कालमनेकं निनाय ॥

Colophon :

इति सुबन्धुकविविरचिता वासवदत्ता सम्पूर्णा ॥

364

Sl No 26847 वासवदत्ताव्याख्या Ms No: P. 8882

Beginning :

अतसीगुच्छसच्छायमञ्चितोरस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥
वन्दे वाग्देवतामिन्दुसुन्दराननभासुराम् ।
वन्दे रामदापुर्यां न × धोत्तमाः ।
धीमता तिम्मयार्येन क्रियते दर्पणाभिधा ॥
व्याख्या वासवदत्तायाः पदरत्नविशोधिनी ।
+ + अथ तावत्कविः कार्यारम्भे इष्टदेवतां स्तौति — करबदरेति ।

End :

वासवदत्तया समं वनदेवतासपर्याविधिना विधाय स्वपुरं पाटलीपुरं गत्वा हृदयाभिलाषितानि सुरलोकदुर्लभानि विविधविभ्रमाणि नानाविधानि अनिर्वाच्यानि तानि सुरतसुखानि सहानुभवन् कालमनेकं निनाय ॥

प्रत्यक्षरश्लेषमयप्रपञ्च-
विन्यासवैदग्ध्यनिधिं निबन्धम् ।
सरस्वतीदत्तवरप्रसादः
चक्रे सुबन्धुस्सुजनैकवन्धुः ॥

Colophon :

इति श्री वासवदत्ता नाम गद्यकाव्यं समाप्तम् ॥

365

Sl. No : 26850 वासवदत्ताव्याख्या Ms. No : P. 1238/2

Beginning :

प्रत्यक्षरश्लेषमयप्रबन्ध-
विन्यासवैदग्ध्यनिधिर्निबन्धुः ।
सरस्वतीदत्तवरप्रसादात्
चक्रे सुबन्धुः सुजनैकबन्धुः ॥

कृष्ण इव वसुदेवतर्पणः 'वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः' तस्य तर्पणं प्रीणनं अन्यत्र वसुभिर्देवानां तर्पणं ....

End:

शक्तिर्मोक्षणं शक्तिकासूरभे समे। अन्यत्र चेष्टा। रावणवधः-क्रन्दमानस्यैव वधश्च रावणशब्देन नान्दी वादीनान्दी। योगदृशां ज्ञानदृशा। हृदयाभिलषितानि हृदयस्य चित्तानि ॥

कवीनां मङ्गलं दर्पो नूनं वासवदत्तया।
शक्त्यैव पाण्डुपुत्राणां गतया कर्णगोचरम् ॥

Colophon:

इति वासवदत्ताविवरणं समाप्तम् ॥

366

Sl. No: 26851 वासवदत्ताव्याख्या Ms. No: C. 2901

Beginning:

हरौ तात वैकुण्ठनाकाध्यसिद्धौ
हरे तात कामप्रणाशास्तिबुद्धौ।
अतस्तौ विहायास्त्वदीयाद्दिमान्ते
तया तेन हेरम्बोऽद्यासितव्यम् ॥
श्रीमान् जगद्धर इमां वितनोति टीकां
गूढार्थबोधनिपुणां भरतादिविज्ञाम्।
+ + करबदरेति ॥

End:

अलकैर्लक्षितासु उपलक्षणे तृतीया। अश्रुणः पूर्वावस्था बाष्पः तुलाकोटिर्नूपुरः। चरणपल्लवैः लक्षिता सुरजनीशेषः प्रातः कालः ईषदर्थे दरोऽव्ययमित्यमरः। दलितं विकसितं मुग्धौ बर्बरसुन्दराविति विश्वः ॥

Colophon:

— — —

367

Sl. No : 26852 वासवदत्ताव्याख्या Ms. No: p. 7333/2

Beginning:

अनबद्धतुहिन इति । अविरचिता तुहिन इत्येते सत्कविकाव्यनिबन्धः । अनवबद्धाः अप्रयुक्ता स तथोक्तः । अनवबद्धहिमादेकः दोषानुबद्धो दोष दुष्टत्वं पक्षे दोषानुबद्धः रात्र्यानुबद्धः ।

End:

स्याद्भाण्डमश्वाभरणे त्रिमूले च वणिग्घसे । देवमणिः कौस्तुभः । अन्यत्र अश्वावर्त । 'निगळस्थो देवमणिः' इति वैजयन्ती । सेन्दुणं —

Colophon:

— — —

368

Sl. No : 26853 वासवदत्ताव्याख्या Ms. No: C. 2519/3A

Beginning:

करबदरसदृशमिनि । यस्याः सरस्वतीदेव्याः प्रसादतः अनुग्रहात् सूक्ष्ममतयः कुशाग्रबुद्धयः कवयः विद्वांसः सङ्ख्यावान्पण्डितः कविरित्यमरः ॥

End:

शक्तिमोक्षणं शक्तिका सुरभे समे । अन्यत्र चेष्टरावणवधः क्रन्दमानस्यैव वधः रावणः शब्दनोनान्दी वादी नान्दीकरस्समाविस्यमरः । योगदृष्ट्या ज्ञानदृष्ट्या । हृदयाभिलाषितानि हृदयस्य रचितानि ।

Colophon

इति श्रीवासवदत्ताविवरणं समाप्तम् ।

कोडूरुवंशसंभूतकृष्णदोषज्ञसूनुना ।

सुब्रह्मण्याख्यविदुषा रचितान्वयचन्द्रिका ॥

369

Sl. No : 26855 **वासवदत्ताव्याख्या** **Ms. No : P. 1393/2**

Beginning :

श्रीमत्त्रैपुरपादपङ्कजरजःपाण्डूकृतं यः कृती
चक्रे गूढपदार्थमोहनभृतां प्रीत्यै सतामादरात् ।
काव्ये वासवदत्तके विवरणं संक्षेपतः श्रीमतां
लोकख्यातविनोदनैकरसिको साहित्यलीलाश्रयः ॥

पक्षे + + भयात् । करबदरेत्यादि ॥

End :

रावणवधः क्रव्यादस्य वधः । क्रन्दनं रावणशब्देन नान्दीवादिनां (?) दिङ्करस्समौ (?) । योगदशा ज्ञानदशा । हृदयाभिलषितानि हृदयस्य चिन्तितानि ॥

Colophon :

इति श्रीवासवदत्ताव्याख्या समाप्ता ॥

370

Sl. No : 26857 **वासवदत्ताव्याख्या** **Ms. No : P. 1697**

Beginning :

गुहान्तरालसञ्जाता काचित् सौवर्णवल्लिका ।
तन्मध्यनलिनेशोभौ यत्तस्मै सन्ततं नमः ॥

करबदरेति ॥ अनेन श्लोकेन स्वेष्टदेवताभूता सरस्वती काव्यारम्भे प्रशस्यते । सूक्ष्ममतयः कवयः —

End :

पक्षी कलिङ्गः । कलिङ्ग भृङ्गधूम्याट इत्यमरः । धूम्या धूमस्तोमः × रुचिरिच्छा अन्यत्र तस्याः रुचिः यस्य इति सत्त्वं × द्रव्यं च × असत्त्वे तु जन्तुः इति अमरः ॥

Colophon :

इति वासवदत्ताव्याख्यानं संपूर्णम् ॥

371

Sl. No : 26860 वासवदत्ताटीका Ms. No: C. 2591/2b

Beginning :

वचनरचनाविषये प्रथमं वाग्देवतायाः कीर्तनं समुचितमित्यत आह ॥ करवदनेत्यादि ॥ सरस्वती देवी यजति ॥ सा का । यत्प्रसादतः कवयः पण्डिताः भुवनतलं पश्यन्ति। कीदृशं अखिलं समस्तं कवयः कीदृशाः सूक्ष्म-मतयः कुशाग्रबुद्धयः ॥

End :

शक्तैः सालंव्यस्य मोक्षपरित्यागं कृतवान् अङ्गाधिराजोऽसौ तस्य शक्तय भावे रक्षणायोग्यत्वात अङ्गा व्याकुला एव भवन्ति । कुसुमपुरं पाटलीपुरं नगरं हृदये यान्यभिलषितानि सुखान्यनुबभूव । न कान्तं नीतवानिति ॥

Colophon :

इति वासवदत्ताटीका समाप्ता ॥

372

Sl. No : 26861 वासवदत्ताव्याख्या Ms. No: C. 2556/6

Beginning :

करबदरसदृशमखिलं
भुवनतलं यत्प्रसादतः कवयः ।
पश्यन्ति सूक्ष्ममतयः सूचयति
सूचयति सरस्वती व्याख्यानम् ।।

करबदरसदृशमिति— यस्याः सरस्वतीदेव्याः प्रसादतः अनुग्रहात् सूक्ष्ममतयः कुशाग्रबुद्धयः कवयः विद्वांसः संख्यावान् पण्डितः कविरित्यमरः ।।

End :

शक्तिमोक्षणं शक्तिकासुरभे समे । अन्यत्र ज्येष्ठरावणवधः क्रन्दमानस्यैव वधः रावणः शब्दनो नान्दी वादीनान्दीकरस्समावित्यमरः । योगदृष्ट्या ज्ञान दृष्ट्या हृदयाभिलाषितानि हृदयस्य रचितानि।।

Colophon :

इति वासवदत्ताविवरणं समाप्तम् ।।

373

Sl. No : 26862 **विक्रमार्कचरितम्** **Ms. No : P. 8880**

Beginning :

गजाननाय महसे प्रत्यूहतिमिरच्छिदे ।
अपारकरुणापूरतरंगितदृशे नमः ॥

श्री पुराणपुरुषं पुरातनं
पद्मसम्भवमुमाप्लुतं मया ।
सुप्रणम्य शिरसा सरस्वतीं
विक्रमार्कचरितं विरच्यते ॥
पुरा कैलासशिखे आसीनं परमेश्वरम् ।
पार्वती च प्रणम्याथ भर्तारमिदमब्रवीत् ॥

End :

तत् श्रुत्वा मन्त्रिणो राज्ञे निवेदितं ततो राजा सर्वसभासहितो मन्त्रि मन्दिरमागत्य उपविष्टः । तदनन्तरं × पुत्रोऽपि ससेमिरेति वदन्नुपविष्टः तत् श्रुत्वा यवनिकान्तरस्थितेन शारदानन्देन पद्यमभाणि । सद्भावं × × प्रतिपन्नानां वचनेनापि × ।

Colophon :

— — —

374

Sl. No : 26863 **विज्ञानतरङ्गिणी** **Ms. No : A. 158**

Beginning :

यः शर्वायुतवेधसां भुवि तनुर्गुप्ता जनैर्लक्ष्यते
येषां भाग्यसुरद्रुमः फलभरैर्नम्रः कृपासागरः ।
यस्त्रातुं क्षमतेऽपि दैवतरुषो ज्ञानेध्मवैश्वानरो
मोहध्वान्तविनाशिवादिनकरो देयान्मतिं निर्मलाम् ॥
दोरुद्दामभुजंगविक्रमविजज्वालावलीखिल-
द्विड्वर्गस्य दलेलसिंहनृपतेः प्रख्यातकीर्तेः सुतः ।
राधाकृष्णपदारविन्दमधुपः श्रीरुद्रसिंहः सतां
अक्रीतानुचरो मुदा प्रकुरुतेऽपुर्वां शुभाख्यायिकाम् ॥

+ श्रीलक्ष्मी सरस्वती गङ्गा नारायणचरणसुदृढ प्रेमपूरमानसमरालो + शङ्करदासनामधेयो अखण्डमेदिनीमण्डलाखण्डलः पुराऽऽसीत् ।

End :

युग्मम् —

गोत्रजानी रणेशो रविकुलतिलको रासभारी महोक्षो
राधाकान्तोरुधामा त्रिपुरविमथनोद्भूतकीर्तिप्रतानः ।
प्रह्लादप्रेमपूर्णोऽवलरिपुमदनो दर्प्यकोत्सेकहारी
दासोद्यत्कारुणौधः कलिभुजगमुखात् सर्वदा सर्वमव्यात् ॥

विष्णुपक्षे × श्रीरामपक्षे × शिवपक्षे × गोत्रात् पर्वतात् . . . उत्सेकं गर्वं हर्तुं शीलं यस्य सः । दास धाने धातुः । दास्यते इति दासो ब्राह्मणो प्राणवान् । गुणवान् दासो ब्राह्मण इत्यमर मालायाम् । तेषु उत्वारुण अघो यस्य सः । शेषं समानम् ॥

Colophon :

इति श्रीमच्छङ्करदासचरणनखचन्द्रचन्द्रिकासादरपानमात्रैकावलम्बनात्म चकोर श्रीमहारुद्रसिंह विरचितायां रामगुणभूधरप्रश्रुतायां कृष्णनवनीरदस्नेहा-सारसलिलपूरितायां विज्ञानतरङ्गिण्यां श्रीशङ्करदासगोलोकनिवासवर्णनं नाम षोडशः कल्लोलः समाप्तः ॥

375

Sl. No : 26864 — शङ्करविजयः — Ms. No : P; 2306

Beginning :

नमामि शङ्कराचार्यगुरुपादसरोरुहम् ।
यस्य प्रसादान्मूढोऽपि सर्वज्ञः सर्वदास्म्यहम् ॥

अनन्तानन्दगिरिरहं अप्रतिहतशिष्यः मम परमगुरोरवतारकथां तदुपकृति घोषितजगत्परम्परावच्छिन्नशुद्धाद्वैतप्रतिष्ठाम् —

End :

शिष्यान् कृपादृष्ट्या अनुगृह्णन् मोक्षपरभोगलिङ्गान् भक्तिग × × × काञ्चीमठेषु स्थापयामास ॥

Colophon :

इत्यनन्तानन्दगिरिकृतौ गुरुस्तुतिर्नाम प्रकरणं त्रिसप्ततिकम् ॥
इत्यनन्तानन्दगिरिकृतः शङ्कराचार्यविजयः समाप्तः ॥

376

Sl. No : 26866 सुधालहरी Ms. No : A. 415

Beginning :

श्री सीतामधुराधरामृतरसस्वीकारसारज्ञता
वासरश्यासितपङ्क्तिकन्धरमुखप्राणप्रवीणाग्रणीः ।
पायादायतनं श्रियः कणतया यत्सायकाग्रे स्थितः
पारावारपतिर्यदीयकरुणापूरेण संपूरितः ॥

End :

शरैरपधराधरानहृदयं निर्दलयन् पुरः पुरश्चरन्नेव स यदुकान्तस्समाक्रामत समरमूर्धानम् ॥

Colophon :

यः श्रीरामपुरीवरामृतकलाधिकारकरारुण्यदृक्-
संक्रान्ताखिलशास्त्र × मणिस्साहित्यलीलाखनिः ।
तस्यास्मिन् कविहम्मवेङ्कसुधियः काव्ये रसव्याकृतिः
व्याप्तिप्राप्तिसुधालहर्यभिहिते पूर्वस्तरङ्गोऽजनि ॥

377

Sl. No : 26867 कथाकोशः Ms. No : P. 3752/1

Beginning :

× य निर्मर्यादपुत्रविषयिणं प्रश्नं कर्तुं उपक्रमे मेदिनीनाथकवयः । भो × वन्तः प्रत्येकशो बृहस्पतिसमानविद्यावैभवाः । तर्हि मम सम्पत्तिरतिशायिनी । नाहं धनस्य विद्यमानस्य सङ्ख्यां कलयामि । परमता × तनयो नास्ति । किमत्र कारणम् । ततस्तैरपि संभूय जगदे - हरदत्तकर्णमाकर्णयतु भवान् ।

End :

किं त्वं रोदिषि मार्जार न चारिर्न च तस्करः ।
नन्दभूपकुमारोऽयं परनारीसहोदरः ॥
इत्थ × कीरगिरमाकर्ण्य बद्धमौन एव निरगाद्विनयकन्दर्पः ॥

Colophon :

इति कथाकोशे शुकसप्ततिस्समाप्तः ।

378

Sl. No : 26868 कथाकोशः Ms. No : A. 724

Beginning :

अस्माकं जनमप्यस्ति कालत्रयविशेषवित् ।
तत्प्राप्य निश्चितं बुद्धाः तिष्ठंति सुखिनो भुवि ॥
अहं ज्ञानविशेषेण सत्यरूपेण साधुना ।
जानामि सकलान् भावान् यद्रूपेण व्यवस्थितान् ॥

End :

सनत्कुमारकल्पेख्या सप्तसागरजीवितः ।
सनत्कुमारतः श्रुत्वा श्रीमदुज्जयिनीभवः ॥
राजन् बभूव मेधज्ञः समस्तवणिजां पतिः ।
अच्युतेन्द्रोपदेशेन यतित्वं प्राप्य यत्नतः ॥

Colophon :

— — —

379

Sl. No . 26869 कथासरित्सागरः Ms.No : C. 1896

Beginning :

अतः परं रत्नप्रभालम्बको भविष्यति ॥
इदं गुरुगिरीन्द्रजाप्रणयमन्दारान्दोलना-
त्पुरा किल कथामृतं हरमुखाम्बुधेरुद्धतम् ।
प्रसह्य रसयान्ति विगत विघ्नलब्धयो
धुरं दधति वैबुधा भुवि भवप्रसादेन ते ॥ (?)

End :

इत्यत्र वन्दितसुहृत्स्वजनावरोधो
वत्सेश्वरस्य तनयोऽथ स तान्यहानि ।
रत्नप्रभामदनमञ्जुकयो तृतीयां
कर्पूरिकां समधिगम्य सुखं निनाय ॥

Colophon :

इति श्रीभःट्टसोमदेवविरचिते कथासरित्सागरे रत्नप्रभालम्बके नवमस्तरङ्गः आदितस्त्रिचत्वारिंशः ॥

समाप्तश्चायं रत्नप्रभालम्बकः ॥

380

Sl. No : 26873 दमयन्तीकथाविवरणम् Ms. No : C. 738

Beginning :

आयुष्मन्निति गद्यं स्पष्टार्थत्वान्न व्याख्यातम् । पर्वतभेदेति । पश्यत यूयं अलोकयत पर्वतविदारिकं पावनं नरस्य दुर्गते चैत्रं पराभविष्णु अत एव मतं बहुमाननीयं गहनं अगाधं पयः पाथः कर्मभूतं ॥

End :

स्थाप्यन्तां पूर्णकुम्भाः प्रति नगरगृहं प्राङ्गणे धान्यमिश्रैः
सिद्धार्थैः स्वस्तिकालीः लिखत नरपतिः नैषधः प्रोक्त एव ॥

अपि च—

सत्काव्यश्चन्दनाद्रिस्तनकलशयुगायुक्तमुक्तावलीकाः
पत्राण्यादाय दूराद्वधिदलकुसुमैर्निमिश्रसिद्धार्थभाणि ॥
ध्रुवमयमवतीर्णस्स्वर्गलोकादनङ्गो
हरचरणसरोजद्वन्द्वलब्धप्रसादः ॥

Colophon :

इति श्रीचण्डपालविरचिते दमयन्तीविवरणे सप्तम उच्छ्वासः ॥

381

Sl. No : 26879 पञ्चतन्त्रम् Ms. No: C. 5985

Beginning :

नीतिशास्त्रोपदेशेन पुनर्जन्म करिष्यति ॥ अत्रान्तरे विष्णुशर्मा नाम ब्रह्मणः कश्चित् सकलेनीतिशास्त्रतत्त्वज्ञः बृहस्पतिरिवोत्थाय प्रतिज्ञामकरोत् । देव यद्यहं षण्मासाभ्यन्तरेण निजपुत्रान् नीतिशास्त्रतत्त्वज्ञान्न करोमि—

End :

तस्मात् त्वमपि तादृश एव मूर्खः ।

तथा हि—

सहसा विदधीत न क्रियां
अविवेकः परमापदां पदम् ।
वृणुने हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ॥

Colophon :

समाप्तमिदं विष्णुशर्मणा कृतं पञ्चतन्त्रम् ॥

382

Sl. No : 26887 **पञ्चतन्त्रसङ्ग्रहः** Ms. No: P. 3451

Beginning :

मनवे वाचस्पतये शुक्राय पराशराय ससुताय ।
चाणक्याय च विदुषे नमोऽर्थशास्त्रप्रणेतृभ्यः ॥
ग्रन्थविस्तरभीरूणां बालानामल्पचेतसाम् ।
बोधाय पञ्चतन्त्रोऽयं मया संक्षिप्य वक्ष्यते ॥

End :

मूढो नष्टमतिश्चैव धनहीनश्च यो नरः ।
निष्प्रपञ्च परित्रस्तो भस्मन्याहुतयो यथा ॥
सहसा विदधीत न क्रियां
अविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ॥

Colophon :

इत्यसम्प्रेक्ष्यकारित्वं नाम पञ्चमं तन्त्रम् ॥

383

Sl. No : 26889 **पञ्चोपाख्यानम्** Ms. No : B. 953

Beginning :

सकलशास्त्रार्थसारजगती समालोक्य विष्णुश्रमानन्दे तत्र पञ्चभिरलङ्कार-सुमनोहरं शास्त्रं यावत् ॥

पुत्रोऽपि मूर्खो विधवा च कन्या
मित्रोऽपि दुष्क्रोधमुखी च भार्या ।
दुष्टस्य सेवा च ऋणस्य शेषं
विनाऽग्निना षट् प्रदहन्ति देहम् ॥

End :

मयि ते पादपतिते किङ्करत्वमुपागते ।
त्वं प्राणवल्लभे कस्मात्कोपने कोपमेष्यसि ॥
वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च ।
एको ग्रहस्तु मीनानां नीलीमद्यपयोस्तथा ॥

Colophon :

— — —

384

Sl No : 26891 पुरुषार्थपरीक्षा **Ms. No : A . 378**

Beginning :

ब्रह्मापि यां नौति ततुः सुराणां
यामर्चितोऽप्यर्चयतीन्दुमौलिः ।
यां ध्यायति ध्यानगतोऽपि विष्णुः
तामादिशक्तिं शिरसा प्रपद्ये ॥
शिशूनां सिद्ध्यर्थं नयपरिचिते नूतनधियां
मुदे पौरस्त्रीणां मनसिजकलाकौतुकजुषाम् ।
निदेशान्निश्शङ्कं सपदि शिवसिंहक्षितिपतेः
कथानां प्रस्तावं विरचयति विद्यापतिकविः ॥
पुरुषाः परिचीयन्ते युक्तेरस्याः परीक्षया ।
तत्पुरुषपरीक्षेयं कथा सर्वमनःप्रिया ॥

End :

यो गौडेश्वरगुर्जरेश्वररणक्षोणीषुलब्धायशो
दिक्कारावयकुन्तलेषु नयने कुन्दस्रजामास्पदम् ।

तस्य श्री नरसिंहदेवनृपतेर्विज्ञप्रिस्याज्ञया
ग्रन्थग्रन्थिलदण्डनीतिविषये विद्यापतिर्व्यातनोत् ॥

Colophon :

इति समस्तप्रक्रियाविराजमान श्रीरूपनाराणमहाराजाधिराज श्री मच्छिवसिंहदेवनामाज्ञया श्री विद्यापतिविरचितायां पुरुषार्थपरीक्षायां पुरुषार्थ परिचायको नाम चतुर्थः परिच्छेदः ॥

385

Sl. No : 26893 पूर्णबोधगुरुवंशकथाकल्पतरुः Ms. No : C. 2419

Beginning :

प्रणम्य चरणद्वन्द्वं बादरायणमध्वयोः ।
जगद्गुर्वन्वयकथां तत्प्रीत्यै कीर्तयाम्यहम् ॥
क्वानन्दतीर्थवंशानुवर्णनं क्व मतिर्मम ।
गोष्पदीकर्तुकामोऽहमज्ञानादस्मि सागरम् ॥

End :

तदीयहृदयाम्भोधिवासिनौ मध्वराघवौ ।
भवतः परमप्रीतौ स्वत एव न संशयः ॥
द्विजः पठन् वेदविदां वरिष्ठः
क्षोणीपतिस्त्वं नृपवंशजातः ।
वैश्यो धनी पादभवो महत्वं
पुमर्थपूर्वं निखिला लभेयुः ॥

Colophon:

इति श्रीमद्वेणुपल्ली श्रीनिवासाचार्यात्मज व्यङ्कटाचार्यपादपद्माराधक बाहुपल्लीकृष्णाचार्यान्तेवासिदैवज्ञभीमविरचितपूर्वबोधगुरुवंशकल्पतरौ सवणूरे सत्यबोध श्रीपादनिवासकथनं नाम त्रिंशच्छाखासर्गः ॥

386

Sl. No : 26998 भोजचरितम् Ms. No : P. 946/3

Beginning :

प्रणम्य सिरसा वाचं भोजस्य चरितं मुदा ।
वदामि पूर्वकविभिः उक्तपद्यैरनिन्दितैः ॥

कालिदासप्र × × क्षरलक्षदैः ।
वर्णयते खिल यः पूर्वैः वर्णितस्स मयाऽधुना ॥

End :

प्रीतः श्री भोजभूपः सदहविरहिणीगूढनर्मोक्तपद्यं
श्रुत्वा लक्षं च हेम्नां दशवरतुगान् पञ्चनागानयच्छन् ।
पश्चात्तत्रैव सोऽयं वितरणगुणसद्वर्णनाप्रीतचेताः
लक्षं लक्षं च लक्षं पुनरपि च ददौ मल्लिनाथाय तस्मै ॥

Colophon :

— — — —

387

Sl. No : 26901 भोजप्रबन्धः Ms. No : SP. 1545/1

Beginning :

स्वस्ति श्रीमन्हाराजस्य भोजस्य प्रबन्धः कथ्यते। आदौ सा धारा राज्ये सिन्धुलसंज्ञो राजा चिरं प्रजा। पर्यपालयत्। अस्य च वृद्धत्वे भोजः इतिं पुत्रः समजनि। स यदा पञ्चवार्षिकस्तदा आत्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुञ्जं च महाबलं समावलोक्य विचारयामास॥

End :

इन्दुं कैरववार्णी च कोकपटलीलांभोजिनीवल्लभं
मेघं चातक × वधमुश्रेणीवपपुष्पावलिम् ।
माकन्दपिकसुन्दरीव रमणीवात्मेश्वरं प्रोषितं
चेतोवृत्तिरियंर सदा नृपवर त्वां द्रष्टुं × त ॥ (?)

राजा चमत्कृतः प्राह। सुकुमारि त्वांलीलादेव्यनुमत्या स्वीकुर्मं इति धारानगरं नीत्वा तथैव स्वीकृतवान् ॥

Colophon :

— — — —

388

Sl. No : 26907 विक्रमादित्यचरितम् Ms. No: P. 6358

Beginning :

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥

श्रीपुराणपुरुषं पुरातनं
पद्मनाभवमुमासुतं मया ।
सम्प्रणम्य सुभगां सरस्वतीं
विक्रमार्कचरितं विरच्यते ॥

End :

विक्रमादित्यसदृशो राजा भूमण्डले नास्ति । एवं साहसौदार्यादिगुणा यदि त्वयि विद्यन्ते तर्हि अस्मिन् सिंहासने समुपविश । तत्श्रुत्वा राजा तूष्णी मासीत् ॥

Colophon :

इति श्रीसाह सौदार्यादिगुणैः त्रिभुवनविख्यातस्य विक्रमादित्यस्य सिंहासनोपाख्याने द्वात्रिंशदुपाख्यानं समाप्तम् ॥

389

Sl: No : 26908 विक्रमार्कचरित्रकथा Ms. No : P. 8162

Beginning :

गजाननाय महसे प्रत्यूहतिमिरक्षते ।
अपारकरुणापूरतरङ्गितदृशे नमः ॥
पुराणपुरुषं पुरातनं
पद्मसंभवमुमासुतं मया ।
सुप्रणम्य सुभगां सरस्वतीं
विक्रमार्कचरितं विरच्यते ॥

End :

तस्मिन् मृते सति पवित्रस्थाने तत्सिंहासनं निक्षिप्तं भविष्यति । पुनः पश्चात् भोजराजहस्तगतं भविष्यति ततः प्रतिष्ठाप्य + शापविमोक्षः इति ॥

Colophon :

— — — —

390

Sl. No : 26912 **विद्यारण्यकोशः** Ms. No : A. 47/14

Beginning :

कर्णाटवीरवरवीरवसन्तशैव-
नागधिनाथसकलोत्तरविश्वदेवः ।
संग्रामसाहिरिति पश्चिमदिक्षु संज्ञां
प्राच्यां पयोजकुलदेव इति प्रसिद्धः ॥
आषाढमासि सितपक्षतिथिर्द्वितिया — ।

End :

एकोनशतसंख्याकचान्द्रसंवत्सरावधि ।
कर्नाटक्षितिदेशानां मण्डलं तु विनश्यति ॥
तदूर्ध्वं क्षत्रियः कश्चित् कर्णाटक्षितिमण्डलम् ।
पालयिष्यति तत्पौत्रीगुणकीर्तिसमन्वितः ॥
तद्वंश्यानां तु राज्यं हि कर्णाटेषु भविष्यति ॥
अष्टाशीतिशतं चैव वत्सराणां च संख्यया ।

Colophon :

इति विद्यारण्यमुनीन्द्रकृते विद्यारण्यकोशे भविष्योत्तरनिर्णयपरिच्छेदः॥

391

Sl. No : 26913 **विद्यारण्यकोशव्याख्यानम्** Ms. No : A. 47/15

Beginning :

अथ विद्यारण्यकोशव्याख्यानं लिख्यते । यस्तु पञ्चकोत्तर पञ्चाशच्चान्द्र संवत्सरावधि राज्यं करिष्यति, स एव हरिनिर्मितायां गुहायां यास्येदिति-द्वितीयेनान्वयः । तस्यैव राज्यकरणसमये चतुर्दिक्षु चत्वारि नामानि भविष्यन्तीति श्रीविद्यारण्यश्रीपादैरागमं निर्णीयोक्तम् । मया तु कृष्ण भारतीयतिना [यतिना] विद्यारण्यकोशस्य व्याख्यानं यथामति क्रियते ॥

End :

ब्रह्मादेरपि तत्र प्रवेशो नास्तीति भावः । गुहायां । तस्य राज्यमाह गुहायामिति । स्वेच्छाविहारः स्वेच्छाचरणम् परकायप्रवेशादिकम् ।

· एतत्सर्वं दत्तात्रेयप्रसादात् भविष्यतीति । समुद्रोऽपि दास्यति मार्गम् । शीततां यास्यति वह्निः । विषमभृततां यास्यति भविष्यत्येव न संशयः ।

Colophon :

इति भारतीतीर्थमुनीन्द्रप्रणीतं विद्यारण्यकोशव्याख्यानं समाप्तम् ।।

392

Sl. No : 26914 वेतालपञ्चविंशतिः Ms. No : 5079

Beginning :

अथ ब्रह्मन् दक्षिणाशां दयितावाप्तदक्षिणाम् ।
मृगाङ्कदत्तो विपिनं विवेश सचिवैः सह ।।
ततों मध्याह्न × श्चण्डकिरणै रवौ ।
अध्वन्यवनिता येन दह्यमाना दवानले ।।

End :

त्वन्तु विक्रमसेनोऽद्य राजवंशविभूषणः ।
भोगापवर्गसुलभां भुङ्क्ष्व विद्याधरश्रियम् ।।
त्रिपुरारिवरात् प्राप्य विद्याभृच्चक्रवर्तिताम् ।
निजं प्रविश्य नगरं प्रभाते च वभौ श्रिया ।।

Colophon :

इति क्षेमेन्द्रविरचितायां बृहत्कथामञ्जर्यां शशाङ्कवतीलम्बके वेताल-पञ्चविंशतिः समाप्ता ।।

393

Sl. No : 26915 वेतालपञ्चविंशतिः Ms. No : P. 5985/2

Beginning :

अथ ब्रह्मन् दक्षिणाशां दयितावतिदक्षिणाम् ।
मृगाङ्कदत्तो विपिनं विवेश सचिवैः सह ।।
ततो मध्याह्नविस्फूर्जन् प्रचण्डकिरणे रवौ ।
अध्वन्यवनिता येन दह्यमाना इवानले ।।

End :

इति विप्रः समाश्वास्य ददौ मे मन्त्रमुत्तमम् ।
येन सिद्धेन वेतालो मम वाहनतां गतः ।।

ततः साक्षान्मया दृष्टः तेन स्वामिसहानुगः ।
इत्युक्त्वा हर्षमतुलं भेजे विक्रमकेसरी ॥

Colophon :

इति श्री व्यासदासापराख्यक्षेमेन्द्रविरचितायां बृहत्कथायां वेतालपञ्च विंशतिः समाप्ता ॥

394

Sl. No : 26916 वेतालपञ्चविंशतिः Ms. No : P. 5653

Beginning :

नमामि शारदां देवीं वीणापुस्तकधारिणीम् ।
सकलं वाङ्मयं सृष्टं यत्प्रसादाद्विलीयते ॥

अस्ति गुणवती नाम नगरी । तत्र गुणकेशो नाम राजा । तं दूरदेशाद्वीरवरो नाम आगतः ।

End :

एवं वेतालं प्रसाद्य विक्रमसेनः स्वनगरं प्राप्तः ॥
सरासारं समादाय कथा-यावत्समुद्धृता ।
अज्ञानां × च प्रबोधाय क्षन्तव्यं तु सदा बुधैः ॥
गोराम्बया प्रसूतेन घन × कुलसूरिणा ।
चरिता वल्लभेनात्र मनसोद्दं × दुकारिणा ॥

Colophon :

इति श्रीवेतालपञ्चविंशत्यां पञ्चविंशतिकथानकं समाप्तम् ॥

395

Sl No 26918 वेतालपञ्चविंशतिः Ms No: P. 9752

Beginning :

भवसञ्चितपापौघविध्वंसनविचक्षणम् ।
विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे ॥

अस्ति दाक्षिणात्ये जनपदे प्रतिष्ठानं नाम नगरम् । तत्र विक्रमसेनो नाम राजा प्रतिवसति स्म ।

End :

एवं वेतालं प्रसाद्य विक्रमसेनः स्वनगरं प्राप्तः ।

सारात्सारं समादाय कथाश्चापि महाद्भुताः ।
अज्ञानां च प्रबोधाय वक्तव्यं तु सदा बुधैः ॥
सूराम्बया प्रसूनेन × कुल (रिणा ।
रचिता वल्लभेनात्र मननोद्दण्डकारिणा ॥

Colophon :

इति वेताळपञ्चविंशत्यां पञ्चविंशतिकथानकं समाप्तम् ॥

396

Sl. No : 26922 शुकसप्ततिकथा **Ms. No : P. 801**

Beginning :

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
सुधर्मायां पुरा राजन् देवेन्द्रो देवतागणैः ।
उपविष्टस्तदाऽपृच्छन्नारदं देवसन्निधौ ॥
परतत्त्वार्थविल्लोके तथा तत्प्रतिबोधकः ।
अस्ति चेत्परमं गुह्यं यथावद्वक्तुमर्हसि ॥
नारदः— शुक एवोभयं वेत्ता इति वेद्मि शचीपते ।
स्वयं तत्त्वार्थविल्लोके परस्मै बोधितुं क्षमः ॥

End :

किमन्येन बहूक्तेन श्लोकं श्लोकार्धमेव वा ।
यः शृणोति पठेद्वापि स यातीह × लं बहु ॥
एवं ब्रुवति वासिष्ठे देवमध्ये शुकस्तथा ।
प्रणम्य प्रययौ शीघ्रं यत्रास्ते जाह्नवी नदी ॥
इन्द्रादयः सुरगणाः स्वं स्वमापुस्तथाऽऽलयम् ।
य इदं × नित्यं वाचयेद्वा समाहितः ॥
सर्वपापविनिर्मुक्तः प्रपेदे वैष्णवं पदम् ॥

Colophon :

इति श्रीशुकसप्ततिकथासु सप्ततिदिनालापनिका ॥

397

Sl No 29927 **शुकसप्ततिकथा** Ms No: P. 4306

Beginning :

× र्माय महता नमः कृष्णाय वेधसे ।
ब्राह्मणेभ्यो नमस्कृत्वा भगव × बादरायणः ॥
सुधर्मायां पुरा राजा महेन्द्रो देवतागणैः ।
पुरातनीं पुराणोक्तां शुकोक्तां वह्निभूभुजे ॥
अस्ति भूमण्डलेना × सर्वशास्त्रार्थवित् ।
सर्वज्ञः कुशलो दक्षः सर्वशास्त्रार्थपारगः ॥

End :

प्रयागमाधवं चान्ते पूजयित्वा फलं भवेत् ।
एवं ब्रुवति वासिष्ठे दे × मध्ये शुकस्तदा ॥
प्रणम्य प्रययौ शीघ्रं × स्तं जाह्नवी नदी ।
इन्द्रादयः सुरगणाः स्वं स्वमापुस्तथाऽऽलयम् ॥

Colophon :

इति शुकसप्ततिकथासु सप्ततिदिनालापनिका ॥

398

Sl. No : 26940 **अनिरुद्धचम्पूः** Ms. No: B. 1076

Beginning :

वन्दे सिन्धुरकन्धराभिधसुधाधाराकरं श्रीकरं
हार्दाकाशविहारमुज्वलमणिज्योत्स्नातटं सुन्दरम् ।
चूडाकल्पसुधांशुखण्डविगलत्पीयूषधाराद्रव
प्रेक्षावन्नवचातकार्तिमुदितं कैलासशैलोपरि ॥ + +
पौराणीयवचोरहस्यमखिलं चम्पूप्रबन्धात्मना
कुर्वे शर्वपरत्वसाधकथमं सर्वेश्वरस्तुष्यतु ॥

End :

कृतापराधे जगतामधीशो क्षतात्वलेपः स तताप बाणः ।
हृतत्वहन्ता कृतमत्सरेऽपि सर्वज्ञयोगेन समेति शान्तिम् ॥
चू– तत्क्षणं रणक्षोणीक्षुभितनिजाऽक्षोहिणी × ×

Colophon :

य: कौण्डिन्यवरेण्यवंशजलधेर्जैवातृको विश्रुतः
श्रीमद्वेङ्कटदासनामकमहोपाध्यायसूनुः कविः ।
श्रीमत्साम्बशिवाख्ययाजनिमते काव्ये तृतीयस्फुर-
च्चम्पूतान्म्यनिरुद्धशब्दमहिते रङ्गस्तरङ्गोऽजनि ॥

399

Sl. No : 26941 — **अभिनवकादम्बरी** — Ms. No: A. 60

Beginning :

नत्वा देवीं श्रीपुराख्यगुरोश्च चरणाम्बुजम् ।
स्वप्रबन्धकथां वक्ष्ये तद्ज्ञानाय समासतः ॥
महीसुरपुरी नाम राजधानी महीयसी ।
चकास्ति विबुधैः पूर्णा देशे कर्णाटनामनि ॥
तामावसत्यखिलधर्मविदार्तवृन्द-
संरक्षणात्तवपुरस्कृतकीर्तिरीड्यः ।
कृष्णक्षमापतिरिति प्रथितप्रभावो
भास्वान्यथा कविबुधानुसृतो ह्यमीक्षणम् ॥

End :

दुष्टानां यमवज्जनस्य पितृवत्कान्तावतेः कामव-
द्विप्राणां वृषवत्कवेस्सुरभिवद्दीनस्य कल्पद्रुवत् ।
आशासंततिमंचयन् स्वयशसा लक्ष्म्या समेतस्सखं
पृथ्वीं पालयति स्म कृष्णनृपतिर्जिष्णुस्त्रिलोकीमिव ॥

Colophon :

इति श्रीमत्काश्यपकुलजलधिकौस्तुभ श्रीनायन्नसूरितनुज रामकृष्णाध्वरी-
न्द्रात्मजाहोबलनृसिंहकविविरचितायामभिनवकादम्बर्यामुत्तरकादम्बरी संपूर्णा ॥

400

Sl. No : 26942 — **अभिनवभारतचम्पूः** — Ms. No : P. 3102

Beginning :

वन्दे मन्देतरानन्दकन्दमिन्दुकलाधरम् ।
वन्दारुवृन्दमन्दारमिन्दुशेखरनन्दनम् ॥

श्रेयो भूयो महः श्रेयो भूयो भूयो ददातु नः ।
रत्नसानुर्धनुर्यस्य नायकः सायकः श्रियः ।।

End :

देवेशि प्रणतार्तिहारिणि मणिग्रैवेयकाञ्चद्गले
गोदेवद्विजदेवपालिनि सतौ भावेन क्लुप्तं मया ।
देवेन्द्रादिसुरोपनीतमनवश्रीवेशवारान्वितं
नैवेद्यं दययोररीकुरु महादेवेन साकं शिवे ॥

Colophon :

इति श्री पण्डितमण्डलीहृद्यनिरवद्यसकलविद्यावैशद्यसनाथविश्वनाथचरण-सरोहसमाधिसमेधित + + चन्द्रशेखरकृतौ नूतनभारतचम्पूनिलिम्पपादे-पञ्चमः स्तवकः ।। (इति १०७ तमे पत्रे)

401

Sl. No : 26943 अभिनवभारतचम्पूः Ms. No : P. 4575

Beginning :

वन्दे मदेन्तरानन्दकन्दमिन्दुकलाधरम् ।
वन्दारुवृन्दमन्दारमिन्दुशेखरनन्दनम् ॥
प्राचां वाचां निगुम्भाः स्फुरदमृतमुचां सन्त्यनन्तास्समन्तात्
काव्यं नव्यं तथापि ग्रथितुमभिलषन् हन्त न व्रीडितोऽहम् ।
प्रत्युद्यानानि हृद्याखिलफलकलनापेशला × मराणी
प्रत्य × द्यानामन्याप्यहह रचयितुं नोद्यमी किन्तु लोकः ॥

End :

वनमाल्यपि तान् नृपालबाला +
+ मुदमद्भिः प्रतिमाविधूनिवाप ॥
क्ष्मावल्लभसुताषट् ते क्ष्मामोदवतीं व्यधुः ।
रीतवतवस्सुमनस्पत्यावनीं माधवनीमिव ।। (?)

इति श्री पण्डितमण्डलीहृदयनिरवद्य निरवद्यनिखिल + +
निखिलंपपादपे षष्ठःस्तबकः ।

Colophon:

इति चन्द्रशेखरकृतौ विलसद्वरबालभारतकथानुसृतौ ।
बुधहृद्यगद्यमृदुपद्ययुतस्तबकोपगुहाननमितो गमितः ॥
नूतनचम्पूभारतस्समाप्तः ॥

402

Sl. No : 26946 **अभिनवभारतचम्पूः** **Ms. No : P. 10240**

Beginning:

अथ तत्तादृशस्य मध्ये —
द्विजेन्द्रहृद्यामपि यानहीनां
तथा सुपूर्णामपि यां सुहृद्भिः ।
पुरीमरीणां कलयन्ति सन्तः
सा हस्तिनाख्या नगरी विभाति ॥

End:

प्राप्ताभीष्टो विनिहितनिखिलारातिः मुकुन्दकृपायालम् ।
वृषभरतो धर्मसुतः कुम्भरत इव प्रपालयामास ॥
अक्षरमधुरसयुक्तं सुमनोहृद्यश्च सुरभिरिति विदितः ।
द्वादशसंख्यःस्तवकः सन्तु प्राज्ञा ह्यनेन सामोदाः ॥
कण्ठे कण्ठीरवाख्यां प्रतिकलमधुरां बिभ्रतः सूरिचूडा
रत्नस्यान्ते वसन् यः कलयति कवितां गद्यपद्यावलब्धाम् ।
तस्य श्री धर्मराजप्रभुवरचरितं वेंकटेशस्य काव्ये
नानाभंगीमनोज्ञः कविमशकशिशोः सार्थकोऽयं प्रयासः ॥

Colophon :

इति श्रीमच्छ्लेषकाव्यपारावारपारगमननौकायमानचरणाभिनन्दननृकंठीरवाचार्यसूरिहीरान्तेवास्यन्यतमस्य अक्लिष्टक्लिष्टरचनापटोः निजकीर्तिकदम्बधवलितदिग्भित्तिर्वेंकटगिरिनिवासि वेङ्कटक्ष्मापालयुगलाश्रितस्य अप्रयाससापादित साहित्यकलस्य देशिकचरणसरसीरुहसमर्पितनिजसुकृतस्य भट्टवेङ्कटेशस्य कृतिषु अभिनवचम्पूभारते द्वादशस्तबकः पर्याप्तः ॥

403

Sl. No : 26947 **अभिनवचम्पूभारतम्** Ms. No: C. 1970

Beginning :

पत्रं सिन्धुसुता स्तने रचयति स्कन्धे भुजङ्गद्विष-
स्तिष्ठत्युत्कलिकां व्रजांगनयना चित्ते मुहुर्यच्छनि ।
सेवायां त्वरयत्यहो सुमनसः योऽभूत्स्वयं पल्लवः
सोऽयं चित्रतमी ददातु सुफलं श्रीकृष्णकल्पद्रुमः ॥
स जयति निर्जरलोकश्लाघ्यौ यः सृष्टवान् किलात्मभुवौ ।
तत्रैकमुदरकमलात्कमलोदरतस्तथैवान्यम् ॥

End :

इत्येवमहमिवाकण्ठकण्ठीरवसूरिचरणांभोजं चिन्तयन्नेव तं दिवसमनयत् ।
अक्षरमधुरसयुक्तः सुमनोहृद्यश्च सुरभिरिति विदितः ।
आद्योऽयं स्तबको यदि सन्तु प्रज्ञास्त्वनेन सामोदाः ॥

Colophon

इत्यभिनवचम्पूभारते भट्टवेङ्कटेशस्य कवेः कृतिषु प्रथमस्तबकः ॥

404

Sl. No : 26948 **अभिनवचम्पूभरातम्** Ms. No: P. 1884

Beginning :

कल्याणं नः प्रगल्भं विनरतु सततं नीलजीमूतरोचिः
तुल्याकारौघदूराध्वगनियमघनव्रातरक्षासुसाक्षात् ।
कल्याणं यादवा × तरधरणिभ्यश्चित्ततसोर्ध्वकायः
शर्याणां कोपि पुण्योच्छ्रय इव विलसन् वल्लवी × ॥

End :

समराध्वरसीम्नि दीक्षितोऽहं
× × पशुमारमप्यरातीन् ।
अभिहत्य युधिष्ठिराग्नितृप्तिं
रचयन् यामि शतक्रतोः पदं तत् ॥
× × सौबलीसुतान् ॥ अथ × ×

Colophon :

१३८ पत्रे — इत्यभिनवचम्पूभारते एकादशः स्तबकः ॥

405

Sl; No : 26951 आनन्दकन्दचम्पूः **Ms. No : C. 1811/a**

Beginning :

भक्तेः सद्मयुतमिवाम्बुधिसुतां निक्षेप्तुमभ्यर्हते
त्रातुं विघ्नघटाभिघाटनमुरीत्तत्पेव तत्प्रत्ययम् । (?)
दानाम्भोलहरीभिरार्द्रमुररीकुर्वाणमम्भोरुहं
हेरम्बस्य करं भजे भगवतः क्रीडाजुषो मानसे ॥ + +
प्रारम्भि मित्रमिश्रेण विबुधानन्दवर्धिनी ।
स्वर्णसंपूरिता चम्पूः इयं पूरिव भैरवी ॥

End :

कैलासाद्रियशोविमर्दिसुषमावर्धो हिमाद्रिप्रति-
स्पर्धो मेरुमयन् रमेरुफलवत्सम्भावयन् भासते ।
लेखान् लेखगतानिवाभ्रविलसल्लेखान् जगल्लेखयन्
उल्लासीकृतकेशिमर्दनमनाः प्रासादचूडामणिः ॥

Colophon

इति श्रीमित्रमिश्रकृतौ चम्पूकाव्ये सप्तमोल्लासः ॥

406

Sl. No : 26953 इन्दिराभ्युदयः **Ms. No: P. 72/4**

Beginning :

वन्दे तं देवमनिशं वाञ्छितार्थप्रदं सताम् ।
यो हरिस्सकलैः कण्ठादुपर्येवेति कथ्यते ॥
यन्नाम शर्वहृदये परिवर्तमानं
क्ष्वेलं रुरोध गल एव तदा निपीतम् ।
लोकस्य नित्यममृतं तनुते विहाय
तं देवमन्यमिह कं शरणं भजामि ॥

End :

प्रियोक्तिं वक्तुं वा प्रभवति किमासां कमलभूः
न देवी सध्रीकृतवदनभूर्यच्चदनिशम् ।
प्रियाक्रान्तार्धाङ्गः स्मररिपुरयं चापि सुदतोः
इमाः क्रोडीकर्तुं न भवति समर्थः कथमपि ॥

Colophon :

— — —

407

Sl. No : 26954 | उत्तररामायणम् | Ms. No : P. 4916

Beginning :

लक्ष्मीनिकेतनभुजान्तरमन्तराळं +
+ जयति वाञ्छितदायि तेजः ॥
श्रीमति जठरे नाभ्यां + ॥
नमो वैदिकसम्राजे + आदर्शबिम्बवत् ॥
इह जयति परिव्राजां + मानसं नः ।
नल्लान्ववायबारिधीन्दु + षष्ठं—
काण्डमहावशिष्टमधुना + प्रवर्तामहे ।

End :

शिशिररघुवरा भूप्रेमधारानुबन्धाव्
महितहरिपदश्रीशैलकण्ठोद्गतेयम् ।
घनरसपरिपूर्णा वाग्धुनी बह्वगाधे
गघुवरहृदयाब्धौ संगमं संविधत्ताम् ॥

Colophon:

— — —

408

Sl. No : 26955 | उत्तररामायणम् | Ms. No : P. 195/3

Beginning :

श्रीभिक्षावनमण्डनं श्रुतिवधूसीमन्तसीमोल्लसद्
सिन्दूरारुणिताङ्घ्रिविश्वजननस्थेमान्तलीलान्तरः ।

तं कल्याणास्पदमस्तहेयमसमं कल्याणवल्लीसखं
प्राप्यं तत्खलु वीरराघवपरब्रह्म प्रपद्यामहे ॥

End :

श्रीवत्सान्वयसिन्धुकौस्तुभमणिः श्रीवेङ्कटार्यः पिता
साध्वी यस्य हि राघवस्य विदुषः श्रीशैलनाम्नी प्रसूः ।
तेनैवं रचितं सतां परकृपामालम्ब्य लोकोत्तरम्
सर्वस्मिन् जयतु श्रियोत्तरमिदं रामायणं सन्ततम् ॥

Colophon :

इति श्रीवत्सकुलतिलकस्य श्रीराघवस्याचार्यस्य कृतिपूत्तरचम्पूरामायणं संपूर्णम् ॥

409

Sl. No : 26966 रामायणचम्पूः **Ms. No: P. 9510/5**

Beginning :

वदनहसितचन्द्रा वल्गुवात्सल्यसान्द्रा
विमलचरितहृद्या वेदवेदान्तवेद्या ।
मम शुभगुणनीवी मङ्गलयाथ देवी
भवतु कनकवल्ली सत्कृ × ॥
× लक्ष्मणादिफणितीराकर्ण्य ऐच्छद्गुरुराघवः ॥

End :

रामः स्वयं कनकवल्लिकया समेतः
× अधिवसन् नगरीमयोध्याम् ।
अवधारयाद्य हृदयङ्गमामिमां
चमत्कृतिं शुभगुणां च मत्कृतिम् ॥
श्रीवत्सान्वयसिन्धुकौस्तुभमणिः श्रीवेङ्कटार्यः पिता
साध्वी यस्य हि राघवस्य विदुषः श्रीशैलनाम्नी प्रसूः ।
तेनैवं रचितं सतां किल कृपामालम्ब्य लोकोत्तरम्
सर्वस्मिन् जयतु श्रियोत्तरमिदं रामायणं सन्ततम् ॥

Colophon :

उत्तरकाण्डः समाप्तः ॥

410

Sl. No : 26970 उत्तररामायणम् Ms. No : P. 2823/1

Beginning :

अव्याद्व्याजभक्तिप्रचयपरिचयस्फीतविज्ञानसंपत्-
संपन्नानन्दसान्द्रामृतरसशिशिरस्वान्तसिंहासनाग्रे ।
कृत्वा रामाङ्घ्रियुग्मं किमपि भरतवत् सार्वभौमप्रशस्ति
प्राप्यापश्यद्रघूणां परिवृढमपि यः सोऽयमस्मद्गुरुर्नः ॥
+ संचोदितो वेङ्कटकृष्णयज्वा
संदर्भयत्यौत्तरकाण्डमर्थम् ॥

End:

वाधूलान्वयवार्धिशीतकिरणात् विद्वद्गणाग्रेसरात्
मान्यायामिह वेङ्कटाद्रिविदुषो मङ्गाम्बिकायां गुरोः ।
जातेनाद्य विदर्भलक्ष्मणकृते चम्पूप्रबन्धे कृतः
काण्डो वेङ्कटकृष्णयज्वविदुषो जीयाच्चिरं सप्तमः ॥

Colophon :

उत्तरचम्पूः समाप्ता ॥

411

Sl. No : 26973 उत्तररामायणम् Ms. No : P. 195/2

Beginning :

श्रीमद्धाम समामनन्ति कमलं तद्धान्धवं वा ययो-
रक्षीन्दीवररूपमाहुरथवा तद्बन्धुरूपं बुधाः ।
सावर्ण्यं तु तदेतयोः शुभतरं धत्तेऽथवा यद्गता
भूयास्तां भुजगेन्द्रशैलवसती तौ दम्पती संपदे ॥

End :

श्री रामचन्द्रः चन्द्र इवोदयाद्रिं
भद्रासनमधिरूढः भ्रातृभिरमात्यैः पौरवर्गैश्च ।
उपासितः शतक्रतुरिवामरावतीं
शशास द्वीरमयोध्यानगरीम् ॥ (?)

Colophon :

अरशाणि + पालीयः उत्तरचम्पूः सम्पूर्णः ॥

412

Sl. No : 26981 कुवलयाश्वविलासः Ms. No : C. 2481

Beginning :

सापायादगजा जगन्निजकरप्रक्षिप्तमुक्तामणि-
प्राग्भारामरसूदने समुदयत्सान्द्रानुरागे मुहुः ।
उन्मीलन्नयनाग्निलीनमदनोद्भेदाय भूयः स्वयं
बीजानि क्षपतीव या विजयते देवी विवाहोत्सवे ॥

End :

त्रिविक्रमकृतामेतां शीतांशुसहजासखः ।
त्रिविक्रमः कृतिं पायात् अपायादर्पसम्भवात् ॥
पुण्यश्लोकानुषङ्गेण नीरसापि कृतिर्मम ।
ग्राह्या सतां यथा × सौरभेणैव केतकी ॥

Colophon :

इति श्री कुवलयाश्वविलासे षष्ठोल्लासः सम्पूर्णः ॥
जयति धृतपुण्ड्र + संवर्तः ।

413

Sl. No : 26982 कुशलवचम्पूः Ms. No: C. 562

Beginning :

श्रीराममाश्रये कस्मै चिन्तितार्थाय सोऽपि कः ॥
न वक्षे तमसो साक्षी न जानाति किमान्तरम् ॥
कल्याणं नः क्रियासुः कविकलनजुषः कस्यचित्कामजेतुः +
भेजे खद्योततेजःपटलपरिपतत्पोतखद्योतरीतिम् ॥

End :

+ + +

स्यादावमर्दक्षुमिता सुरेन्द्राः ।

ससर्जुरेककृतुपुष्प × ।

× रन्यत्र च वाष्पवृष्टिम् ॥

कुशं च लक्ष्मणं वीक्ष्य कुशल × कुशलावृताः ।

× × कोपि तद्वाष्पं नारदो यदुदीरयत् ॥

Colophon :

यः श्रीरामपुरीवरेश्वरकृपासंप्राप्तषड्दर्शने

साम्राज्यान्वि × योगकवितासर्वङ्कषप्राभवः ।

चम्पूनामनि वेङ्कटप्रभुमणेः × तस्य ×

× पार्याब्धिसुधाकरस्य × मुल्लासोगमत्पञ्चमः ॥

करुणाकलशा + मृष्टये + ॥

414

Sl. No : 26984 कृष्णचम्पूः Ms. No : P. 3767/2

Beginning :

वन्दे गजेन्द्रमुररीकृतवर्णिभावं

अन्तर्मुखाशयसदन्दुकबद्धवश्यम् ।

शङ्के स्वधामकविनिर्मथनाभिशङ्की

यस्यान्तिकं परिहरत्ययमिक्षुधन्वा ॥

अस्ति खलु समस्तभुवननिर्माणविशेषनिर्णायकशतपर्णासनकरतला

वर्जितकमण्डलुमुख + मधुरा नाम नगरी यदुराजधानी ॥

End :

प्रत्यगात्मविदितं महः परं

ब्रह्म यत्किमपि तत्त्वमुच्यते ॥

× × नेरवकण्य सत्याः

स्तुत्यस्सतां स हरिरुल्लसितप्रमोदः ।

संप्रेष्य तानथ मुनीन् सममर्हणाभिः

आनन्दनिर्भरमनाः भुवमध्यवात्सीत् ॥

Colophon:

अष्टमोच्छ्वासः ॥

415

Sl. No : 26985 कृष्णचरित्रचम्पूः Ms. No :P : 4656

Beginning :

कृष्णस्य वन्दे चरणारविन्दं
किञ्जल्कितं नूपुररत्नभासा ।
बृन्दारकाभृङ्गचयन्ति यत्र
मन्दाकिनी यन्मकरन्दबिन्दुः ॥

End

द्वारकां भूसुराशीर्वादनादमोदमानः प्रविवेश ॥
तत्र चित्रमणिसौधसहस्रे × स्म
× राजकुमारी पाणिपीडनमहं च समञ्चन् ।
भौमागारानितारा मासहस्रप्रेमाली × भोघिवैमानिक द्रो
सीमातीतप्रभावश्रीनिवासनगधरवसुदेवानन्दकारीन् घृतारिन् ×
ललितगुणितमङ्गलं करिष्णो सहिष्णो जयकुवलयदाम ×
श्याम शौरे मुरारे ॥ (?)

Colophon :

इति श्री र × रायवेश्याभुजङ्गमजग्नोच्चगण्डकदनमाण्डीविबिरुदप्रधानि
राघाटदेसूरि पेटगङ्ग × लक्ष्मीमाम्बागर्भशुक्तिमुक्ताफलश्रीकृष्णभूपालकृतौ
श्रीकृष्णचरित्रनाम्नि × तविलासो नामाष्टमाश्वासः ।
श्रीकृष्णचरित्राख्या श्रृङ्गाररसाञ्चिता ।
× न कृष्णक्षितीन्द्रकृतिरेषा ॥

416

Sl. No : 26988 गङ्गावंशानुचरितम् Ms. No : A. 870

Beginning :

श्रीनीलाचलतुङ्गश्रृङ्गविहरन्मातङ्गभङ्गीभृतो
दुर्दैवातपतापतप्तमनसा कादम्बिनीकन्दलः ।
पादाम्भोरुहरक्तभक्तजनताकारुण्यपाथोनिधिः
यस्सोऽयं जगदीश्वरो वितनुतां श्रेयांसि भूयांसि नः ॥ +

गंगावंशावतंसानां राज्ञामाज्ञानपेक्षया ।
जातोऽस्मि गुणलोभेन कीर्तिकीर्तनकौतुकी ॥
तत्रापि वैतालिकयोर्द्वयोरपि परस्परम् ।
प्रश्नोत्तरापदेशेन मयाभिमतमुच्यते ॥

End :

सर्वात्मा भगवानिति प्रति मुःहुः सिद्धान्तसंवादिभिः
यद्यत्प्रोक्तमशेषखण्डनपरैस्तत्तत्तथा नान्यथा ।
यन्निलाचलचारुकन्दरतटीसिंहासनाध्यासिनः
तस्यायं नयनोत्सवः समजनि त्रैलोक्यनेत्रोत्सवः ॥

इत्युक्त्वा प्रणम्योत्थाय प्रतिहारिणासमं दक्षिणद्वारेण निर्गत्य मुक्तिमण्टपसमीपं प्राप्तः ॥

Colophon :

इति श्री राजगुरुपदवीप्रतिष्ठित वासुदेवरथसोमयाजिकृतौ गङ्गावंशानुचरिते चम्पूकाव्ये द्वितीयः परिच्छेदः ॥

417

Sl. No : 26989 गङ्गावतरणचम्पूः Ms. No : .648

Beginning :

अव्यादव्याजकारुण्यभव्यायतनमव्ययम् ।
अव्याहतरमासेव्य × × ॥
मधुरमिदं काव्यफलं ममानभिज्ञस्य महीरुहस्येव × ।
श्रीरम्यमंजुलकीर्तिधुरीणलक्ष्मी-
नारायणेन कृतिना कृतिनायकाय ।
गङ्गाधिपाय विहितार्पणभाजि जातो
गङ्गावतारसुकृतौ प्रथमस्तरङ्गः ॥

End :

सन्धानदक्षेन तत्त्राणदक्षेन × त्रैक्यभानंशुमते विचत्रतत्तादृशक्लान्तिसर्वस्वनिर्वापणप्रौ × ढकृतप्रकारानुबन्धे ×

Colophon :

— — —

418

Sl. No : 26991 | **गोदापरिणयचम्पूः** | **Ms. No: P. 3150**

Beginning :

कल्याणकरुणासारशीतलापाङ्गवीक्षणैः ।
कुर्वती पातु मां नित्यं गोदा वेदान्तदीपिका ॥
गोविन्दानन्दजननीं कोमलार्थपदावलीम् ।
गोदा ददातु मे वाणीं मोदाय कविचेतसाम् ॥

End :

स याचितश्चैवमशेषबान्धवैः
सुवर्धयन् सर्वजनस्य मङ्गलम् ।
उपास्त तत्रैव × दया
श्रीरङ्गवासैकरसोऽपि माधवः ॥
गोदापरिणयसन्तोषेण स तत्कालोचित- ×

Colophon :

१२ पत्रे —
इति गोदापरिणये चतुर्थः स्तबकः ॥

419

Sl. No : 26992 | **गौरीपरिणयचम्पूः** | **Ms. No : C. 768**

Beginning :

× न्नुतभवे + भवभीतिहन्त्री
दुर्गे भजामि भवतीं भुवनैकमातः ।
सर्गस्थितिप्रलयकारिणि भव्यमूर्ते
स्वर्गापवर्गफलदे मयि सुप्रसीद ॥

End:

गौरीगौरीशौ कैलासे जयेतां यावदन्तरम् ।
तावत्कृतिर्ममेषा हि विख्याता जयतां भुवि ॥

Colophon:

इति श्रीम[illegible]वेङ्कटसूरिविरचितायां गौरीपरिणयः समाप्तः ॥

420

Sl. No : 26993 चम्पूप्रबन्धामृतम् Ms. No : P. 10398/2

Beginning :

कल्याणं नः प्रभूतं कलयतु ललितालापशैलेशबाला-
लीलाजालानुकूला शिशिरकरकलाभानुमालाजटाला ।
एषाशेषाभि × ष्टा परिकलितसुधापूरधारानुकारा
भद्रा मुद्राविनिद्रा पुरहरणविधौ कापि कारुण्यपूर्णा ॥

End :

यस्मिन् शङ्करदारसौरभझरीजृम्भत्कटाक्षच्छटा-
पाताः कल्पलतावितानसुमनोगुम्भःप्रियंभावुकाः ।
तस्यासौ नवकालिदासविदुषश्चम्पूप्रबन्धामृते
प्रायः काव्यविदां प्रकल्पितसमुल्लासो विलासोऽगमत् ।
अनाथश्चैवाहं दुरितभरिताज्जातु × भूयोदतस्येत्यहनिहनाहन्तविधिना-
यो भूर्भक्तोऽपि मुहुर्मुहुर्नम × प्रेमास्पदम् ॥

Colophon :

— — — —

421

Sl. No : 26995 चिन्तामणिविजयः Ms. No: P. 2839

Beginning :

कैलासाचलभूषणं कमलभूवैकुण्ठरुद्रार्चितं
गोकर्णेशमुपास्महे शशिकलाचूडं शरण्यं सताम् ।
प्रायश्शैवविभूतिमेव रसना स्तोतुं मदीया भवेत्
प्रभ्वी राजतशैलनाथ भगवान् भूयो नमस्ते नमः ॥

End :

गोकर्णनाथपरिसेवनमुक्तपाप्मा
जाबालिचित्तपरिकल्पितनीतिमार्गः ।

ताभ्यां दिदेश गिरिराजसुतयापगाभ्यां ।
कैलासनाथ इव साकमसौ नृपालः ॥
अद्यापि सोऽयं ह्यनुशास्ति राष्ट्रं
ते सूर्यनारायण × पादः ।
जयन्ति लोकस्य हिताय सत्यं
त एव भद्रं वितरन्तु भूयः ॥

Colophon :

इति श्रीमद्भारद्वाजगोत्रपारावारशीतांशोः शैवागमसंप्रदायप्रवृत्तस्य निसर्ग दयासागरस्य भगवतोऽण्णय्यमखिनः कृपासुधासारस्नापितेन केनचिद्बालकेन विरचिते चिन्तामणिविजयनाम्नि चम्पूकाव्ये पञ्चममञ्जरी ॥

422

Sl; No : 26998 जप्येशोत्सवचम्पूः **Ms. No : A. 783**

Beginning :

लक्ष्मीं सन्ततमातनोतु नितरां सर्वार्थविश्राणन-
प्रत्याख्युन्नतदर्पकल्पकतरुस्स्वर्द्धेनुचिन्तामणिः ॥
प्रत्यूहाचलकूटपाटनविधौ दम्भोलिलीलावहं ।
वेदान्तैकविभाव्यमब्जरुचिनो हैरम्बमङ्घ्रिद्वयम् ॥
अपिच – भूषाचन्द्रकिशोरभास्वरकरस्पर्शप्रफुल्लोत्पल-
लोलाम्बाधृतकैरवामरधुनीं राजत्कपालोज्वलः ।
श्रीद्गोत्रसुताश्रितप्रविलसद्वामाङ्कभागस्समा-
भक्तानुग्रहतत्परो दिशतु मे श्रेयांसि जप्येश्वरः ॥

End :

सांबा × द्धरोण्यहं रतिः सांबे परब्रह्मणि महेशानं तात्द ×
रवर निर × चरमत × भापूराकारा परव नमोवेद्य शिब ते ॥
णरहितामेय × विमलस्वरापरामित गुणाकार विवृते निराधारा ×

Colophon

इति चम्पूकाव्ये चतुर्थाश्वासः ॥

423

Sl. No : 26999 जीवन्धरचम्पूः Ms. No:P. 65

Beginning :

यस्य श्रीनखकान्तिनाकसरितः कूर्मीयतेऽङ्घ्रिद्वयम्
सेवानम्रसुरेन्द्रवज्रमकुटीमालामरालायते ।
पश्यन्निर्जरयोषिदम्बकततिः मीनः प्रपञ्चायते
क्षोणीशाञ्जलयः पयोजमुकुलं त्वाद्यो जिनः सोऽवतात् ॥
भजे भव्यत्रयं प्रत्नं भव्यलोकैकभूषणम् ।
तोषणं मुक्तिकान्तायाः पूषणं × सन्ततेः ॥

End :

कुरुकुलपतेः कीर्तौ राकेन्दुसुन्दरचन्द्रिका
विमलविशदालोकेऽप्यानन्दिनी परिवर्धताम् ।
मम च मधुरा वाणी विद्वन्मुखेषु विजृम्भताम्
विलसितरसा सालङ्कारा विराजितमन्मथा ॥

Colophon :

इति श्री महाकवि हरिश्चन्द्रविरचिते श्रीमति चम्पुजीवन्धरे मुक्तिलम्भो नामैकादशलम्भः ॥

424

Sl. No : 27002 ज्ञानाङ्कुरचम्पूः Ms. No: C. 748

Beginning :

आख्यातुं श्रीपयोरंक्य शङ्खचक्रं दृशां त्रयीम् ।
बिभ्रते सम्भडिम्भाय कस्मैचिन्महसे नमः ॥
देवं देवपतीड्य न्यग्रोधावालवासिनं नत्वा ।
लक्ष्मीनरसिंहोऽहं रचयिष्ये संविदङ्कुरम् ॥

End :

स्वात्मा भेदेन विश्वेशं ध्यायन्तौ हृदयाम्बुजे ।
अध्यवात्तां विश्वनाथराजधानीमिमामुभौ ॥

श्रीमत्कौण्डिन्यगोत्रस्य कृपाधिजः सन्ततेः । (?)
सेयं लक्ष्मीनृसिंहस्य कृतिर्विजयतेतराम् ॥

Colophon :

इति श्रीमन्नृसिंहमनीषीविरचितो ज्ञानांकुरः समाप्तः ॥

425

Sl. No : 27004 तत्त्वगुणादर्शः Ms. No : B. 119

Beginning :

श्रीमच्छ्यामाभिरामच्छविहृदयगुहाध्वान्तसंक्रान्तिगुप्तं
प्रत्नं देवेषु रत्नं नविशदमभवद्यत्ततोऽप्याश्रितानाम् ।
इत्येतद्व्यक्तिकृत्यैः मधुमथनहृदास्थानमास्थाय कल्प्ता-
मन्दस्मेरस्मितेन्दुद्युतिरतिकृपया श्रेयसे स्तात् श्रियो नः ॥
तत्त्वार्थनिर्धारणबद्धबुद्धी
मत्वा स्वमत्या निखिलं च शास्त्रम् ।
मोदान्मिथः चक्रतुरप्रमादं
वादं मुदा शाम्भववैष्णवौ द्वौ ॥

End :

श्रीमत्कोसलवंशमौक्तिकमणिः श्रीराघवक्षोणिभृ-
द्दुर्भक्षीरपयोधिशीतमहसः श्रीवेङ्कटक्ष्माभृतः ।
आस्थाने स्थितमास्थितेन भजता धुर्यां तदाचार्यतां
श्रीशैलान्वयदिक्षितेन रचितः तत्त्वार्थधीदर्पणः ॥

Colophon :

— — —

426

Sl. No : 27008 त्रिविक्रमचम्पूः Ms. No : P. 3651

Beginning :

श्रीरार्द्रा करुणारसेन हृदये ताराधिपाभानना
स्मेराब्जायनिकायदक्षनयना स्मारा प्रमोदेन सा ।

पारावारसुता प्रसूनहसिता नारायणोरस्थिता
सारापाङ्गविसारमाकलयतु क्रूराघशान्त्यै मयि ॥

विषयविषधरधराधराधीशविश्राणितमधुरकवनविधेन × गोपालार्याभिधेन कवितासुधासाधारणत्रिविक्र × × कथोपपादकस्समेधितरसधुरश्चम्पूप्रबन्धः क्रियते ॥

End :

तदुप्राज्ञवर्यः कविर्भगवदाज्ञसबलिकृतक्रतुपूर्तिमकरोत् । एवमसुरेश्वरं निगृह्य सुराधिपाय स्वाराज्यं प्रददावमुरारिः ॥

Colophon :

इति गोपालकविना कृता पापाविशान्तये ।
सुपर्वपाच्युतनुतिर्मुदमापारयत्वसौ ॥
त्रिविक्रमचम्पूग्रन्थस्सम्पूर्णः ॥

427

Sl. No : 27010 दमयन्तीपरिणयचम्पूः Ms. No : B.908

Beginning :

वन्दे तन्मिथुनं चिरन्तनमहं गाढं मिथस्सङ्गतं
संप्राप्ते प्रथमं विहृत्य बटुभिर्वामं यदीयं स्तनम् ।
हेरम्बे पिबति स्तनान्तरमथायामेनवेक्ष्योरसि
स्कन्दे विस्मयमभ्युपेयुषि तदा लोकेन जाता स्मितम् ॥

लब्ध्वाहमुद्दामदयारसार्द्र-
कटाक्षवीक्षाकणिकां त्वदीयाम् ।
चम्पूप्रबन्धं निषधाधिराज-
कथा निधानं करवाणि वाणी ॥

नत्वाग्रजौ भीमनरेन्द्रपुत्री-
विवाहचम्पूं सरसं करोमि ॥

End :

दृप्यन्मन्मथगाढकर्षणगलत्पर्वेक्षुचापक्षरत्-
सारस्फाररसोर्मिनिर्मितरणक्रीडा यदीया गिरः ।

यत्कीर्तिश्शरदिन्दसुन्दरमहस्सन्दोहसन्देहदा
सोऽयं चक्रकविर्विभाति विनयी सौजन्यसम्पन्निधिः ॥

Colophon :

दमयन्तीपरिणयचम्पूसमाप्तः ॥

428

Sl No · 2701 दिव्यसुमनोगुणवैजयन्ती **Ms. No : P . 5016**

Beginning :

× यस्मिन्न्यस्त भरे परः ॥
पराङ्कुशघनस्तृष्णां हन्तु मे चातकस्थितेः ।
यदुपज्ञं प्रसन्न × भवद्गसुधातले ॥

End :

कृतवन्तौ महत्कर्म धीरशान्तैश्शुभावहम् ।
नाथौ शुभावहं वन्दे साहसं क्षम्यतामिति ॥
अत्र न्यूनातिरिक्तादिदूषणं महतां क्षमा ।
श्रुत्यन्तपठितानुधादाविर्गीर्भिरिति वक्रक् ॥ (?)

Colophon:

इति श्री समानपदवाक्ययोजनाभागस्याप्यसमानपदवाक्ययोजनाभागस्य + श्रीनिवासदासेन विरचितायां दिव्यसुमनोगुणवैजयन्त्यां अष्टमः स्तबकः ॥

429

Sl. No : 27032 नीलकण्ठविजयव्याख्या **Ms. No : P. 1685**

Beginning :

तं मदनान्तकं–मदनस्य–मन्मथस्य अन्तकः नाशकः तं शिवं कमथपि कृच्छ्रेण स्तोतुं यत् यत् × यः उद्योगः व्य + कृतः मयेति शेषः । तेन कारणेन हे भारति वाग्देवते त्वां त्वरयामि ॥

End:

इत्थेवं विधं मां कथयिष्यति व्याकरणमीमांसादिशास्त्रज्ञं शिवभक्तमित्ये वदिष्यतीत्यर्थः । इति मत्वा मया यदेतत् काव्यं रचितं निर्मितमित्यर्थः । तत् काव्यं अथवा तावत् तत्सकलमित्यर्थः वक्ष्यति– अभिधास्यति ।

अथवा न वक्ष्यति तस्य काव्यस्योपरि काव्य एवेत्यर्थः । समस्तः सकलः । भरः भारः । न्यस्तः समर्पितः ॥

Colophon :

इति श्रीमद्भारद्वाज वल्लाल महादेवविरचितायां नीलकण्ठ विजयव्याख्यायां पञ्चमाश्वासः ॥

430

Sl. No . 27036 पार्वतीस्वयंवरः Ms.No : A. 685

Beginning :

श्रीमत्यां दक्षपुत्र्यां पितरि कमितृनिन्दातिरूक्षे प्रकोपात्
उद्दीप्ते योगवह्नौ हुतवपुषि रुषा प्रस्फुरन्नुद्भटौजाः ।
भीतैर्जातानुतापैः सपदि सुरगणैः सान्त्वितः शान्तमन्युः
कुर्वन् गुर्वीं तपस्यामकृत हिमगिरौ वासमीशश्चिराय ॥

End :

अथ विविधमुनीन्द्रानिन्दमौलिर्विसृज्य
क्षितिधरपतिकन्यामादधानः करेण ।
कनककलशरक्षाशक्तिशोभासनाथं
क्षितिविरचितशय्यं कौतुकागारमागात् ॥

Colophon :

इति भट्टनारायणविरचितः पार्वतीस्वयंवरचम्पूः समाप्तिमगात् ॥

431

Sl. No : 27037 पुरुदेवचम्पूः Ms. No : P. 3986

Beginning :

क्रियाद्वः कल्याणं भ्रमरहितरसामोदसुमन-
स्समासेव्यः श्रीमान् वृषभ इति विद्वत्सुविदितः ।
ददानः कल्पद्रुः श्रितजनततेरागमफलं
समासीनो दिव्यध्वनिमृदुलताऽलङ्कृतमुखः ॥

End :

वृषभसेनमुखागणिनस्तथा
सकलजन्तुषु सख्यमुपागताः ।

विमलशीलविशोभितमानसाः
परमनिर्वृतिमापुरिमे क्रमात् ।
जयतां मृदुगम्भीरैर्वचनैः परनिर्वृतेः हेतुः ।
सुरसार्थसेवितपदः पुरुदेवः तत्प्रबन्धश्च ॥

Colophon :

इत्यर्हद्दासकृतौ पुरुदेवचम्पूप्रबन्धे दशमः स्तबकः ॥

432

Sl. No : 27042 प्रभावतीपरिणयचम्पूः Ms. No: C. 2168

Beginning :

× × द्रोघो × बारकः ।
पुष्पा तु मां श्रीपतिः श्रुत्वा × पत्रमयः ॥
× त्कज्जालारेखालीढक × क्षबाण × न + लो × इदं तन ×
धरामृत रसति + समस्तुखायाः + भैष्म्या—

End :

श्रीरुक्मिणीनाथ र × तोषणाय × बाम × ×
विवाह सम्बोधकरी प्रभूयात् !
करोति × णतरं कल्याणमनसा × किन्तु मयेष्टसिध्यै प्रकीर्तिता ॥

Colophon

इति श्री × श्रीवत्स × क्षीराम्बुधिसञ्जातवासुदेवगुरुराज × राघव
द्विजराजदास विरचितं प्रभावतीपरिणया × का × समाप्तम् ॥

433

Sl. No : 27044 बाणासुरविजयचम्पूः Ms. No: A. 434

Beginning :

श्रीलक्ष्मीकान्तनाभीकमलमधुझरीलोलरोलम्बमाला-
झङ्कारसम्पदोघं दिशतु विधिचतुर्मुख्यदीर्णां समानाम् ।

तादात्म्यं ख्यापयन् यः स्वरनिखरमयः पादपद्मानतानाः-
मिन्द्रेशानादिदेवप्रवरपरिषदां कामितार्थामरद्रुः ।।
कन्दाळान्वयकल्पभूजकुसुमश्रेणीभवत्कीर्तना-
विद्वत्कर्णमधूलिकाद्भुतसुधाधारालसत्सूक्तिना ।
श्रीवासार्यतनूभवेन विदुषा श्रीवेङ्कटेशायुजा
क्लृप्तो बाणजयाह्वयो विजयतामेषः प्रबन्धश्चिरम् ।।

End :

हारीतान्वयशुक्तिमौक्तिकमणिः विद्यानिधिः सन्निधिः
वेदान्तार्यगुरुस्सगर्वकथको भाधीशकण्ठीरवः ।
अस्मन्मानसपङ्कजातरसिकः स्ताद्वावदूकाग्रणीः
अस्तोकाय शुभाय सूरिजनतामान्योऽण्णयार्यात्मजः ॥

Colophon :

इति श्रीमद्वाधूलकुलकलशपाथोनिधिराकासुधाकर + वेङ्कटाचार्येण कलिते बाणासुरविजयाह्वये चम्पूप्रबन्धे षष्ठोल्लासः ।।

434

Sl. No : 27047 ब्रह्मोत्सवचम्पूः Ms. No : P. 1053/2

Beginning :

श्रीवेङ्कटेश्वरः पायादिन्दिरारमणो हरिः ।
अस्मान् स्मितमुखः श्यामवर्णः स्वर्णाम्बरोज्वलः ॥
वन्दारुजनमन्दारं वन्दे नन्दात्मजं हरिम् ।
इन्दीवरदलश्याममिन्दिराभूमिशोभितम् ॥

End :

श्रीवेङ्कटेश्वरं सहस्रकृत्वः प्रणम्य य × प्रपेदिरे प्रमोदपर्याकुल-मानसेषु ब्रह्मदेवे दिवंग ×
श्रिया सहावाप्य समस्तभोगान् ।
ललास लक्ष्मीपतिरम्बुदाभः ॥

Colophon :

इति श्रीनिवासाचार्यविरचिते ब्रह्मोत्सवनामके चम्पूप्रबन्धे पञ्चमोल्लासः ॥

435

Sl. No : 27057 **भागवतचम्पूः** **Ms. No : P. 7229/2**

Beginning :

कल्याणं नः प्रभूतं कलयतु ललितालापशैलेशबाला-
लीलाजालानुकूला शिशिरकरकलाभानुमाला जटाला ।
एषा शेषाहिभूषा परिकलितसुधापूरधारानुकारा
भद्रा मुद्रा विनिद्रा पुरहरणविधौ कापि कारुण्यपूर्णा ॥

End :

यस्मिन्शङ्करदारसौरभजरीजृम्भत्कटाक्षच्छटा-
पाताकल्पलतावितानसुमनोगुम्भप्रियंभावुकाः ।
तस्यासौ नवकालिदासविदुषश्चम्पूप्रबन्धामृते
काव्ये षष्ठविदां प्रकल्पितसमुल्लासे विलासोऽगमत् ॥
श्रीमत्कृष्णकथासुधामधुरिता विद्वन्मनोहारिणी
शृङ्गारादिरसोज्वलाऽमृतझरीकल्पा गुणाल्पेतरा ।
धीमन्नूतनकालिदासकविराड्वाणी गभीरा शुभोऽ-
हीनानूनधृतो समास्थितिमगादापुष्पवत्तारकम् ॥

Colophon :

समाप्तोऽयं ग्रन्थः ॥

436

Sl. No : 27069 **भागवतचम्पूः** **Ms. No: P. 3012**

Beginning :

कमलया प × भणलोलया
करि × शेव निजाङ्कमुप × स × ।
मधुर × पि × ।
× स्वैवावतुः नः कृपया हरिः ॥

श्रीमान्नः सारसाक्षः कलयतु कुशलं यत्पदाम्भोजय ×
× ळी श्वश्रूर्मातामहर्षे × तृ वनभर × का यत् ।
साम्राट् भूत्वा ततान प्रतिभटदळनो यद्धनुर्बद्धदीक्षा
यद्दीक्षा राज्यदाभूद्धरिनिशिचरयो यत्पदं योगिसेव्यम् ॥
श्रीमानात्रेयगोत्रामृतजलधिविधुः कृष्णमाचार्यनामा
तस्यैतस्य सुतः कलासु निपुणो रानुजत्वं कला । (?)
जन्मभ्यामपि वीरराघवसुधीश्चम्पूप्रबन्धं स्फुटं
दासःश्रीसखसेविनां वितनुते गद्यैश्च पद्यैरसौ ॥

End :

श्रीमान् देवः कृपाब्धिः सततमिह कलौ प्रीतां वासुदेवः ॥
कृष्णार्यस्सुषुवे जितेन्द्रियचयं यत्तत्कृतश्रीपतेः
वक्त्रालङ्कृतगद्यपद्यमहितश्चम्पूप्रबन्धं स्फुटम् ।
अम्बा नामगिरी रसैकनिलयश्चाकल्पमाकल्पतां
जीयात्प्राप्य च वीरराघवकविः धीरश्रुतीनां किल ॥

Colophon

श्रीमदात्रेयवंशमौक्तिकीभवद्वीरराघवार्यपौत्रस्य वेङ्कटरङ्गाचपुर्यपुत्रस्य-विद्वज्जनश्लाघितचरितस्य श्रीकृष्णमाचार्यस्य तनूभवेन नामगिर्यम्बासुचरित सुधाब्धिकौस्तुभेन तातपुरवास्तव्येन वीरराघवाचार्येण विरचिते चम्पूभागवते द्वादशस्तबकः ॥

437

Sl. No : 27070 भागवतचम्पूः Ms. No:P.9475/1

Beginning :

वेदान् व्यस्तवते समस्तजगतां सन्तोषमातन्वते
श्रीमद्भारत एव दर्शितवते वेदार्थतत्त्वं महत् ॥
विद्युत्पिङ्गरुचो विबोधिततपःकूटाजटाबिभ्रते
मेघश्यामळमूर्तयेऽस्तु मुनये व्यासाय तस्मै नः ॥

End :

परामाल्लेन च समाराध्य कृतप्रणामाः समध्यमाः पारणोत्सवं पतङ्ग-दुहितुः पार्श्वे एव पुष्पितपादपे निर्वर्त्य गृहीतवीटिकाः तत इतः प्रचेलुः ॥

Colophon :

इति श्रीशैलपूर्णवंश्यश्रीवेङ्कटनाथसूरिविरचिते भागवतचम्पूप्रबन्धे प्रथमाश्वासः ॥ (१३तमपुटे)

438

Sl: No : 27074 भागवतचम्पूव्याख्या **Ms. No: P. 1845**

Beginning :

भद्रे किं प्रियमस्ति ते मम मनश्चन्द्रावतंसे स किं
दुष्प्रा × × सम × पि मे लभ्यस्तदेवोच्यते ।
कस्मादम्बरसंस्पृशि प्रतिने दोलभ्यमित्यादिभिस्स- (?)
पृष्टा या नवसङ्गमेषु जगतां मातः स्मितं पातु नः ॥

पुरुषार्थोपायकं च भागवतचम्पूनामकं महाकाव्यं चिकीर्षुः चिकीर्षितविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलमाशीर्नमस्क्रियावस्तुनिर्देशोवापितन्मुखमित्याचार्यदण्डिवचसा प्रबन्धमुखलक्षणत्वेनावगतमाशीरूपं मङ्गलं ग्रन्थादौ श्लोकषट्केन निबध्नाति कल्याणमित्यादिना ॥

End:

स्वग्रन्थं व्यङ्ग्यमर्यादया परमेश्वराय समर्पयति ।
नवकालिदासकवितांबुधेः
उपरिप्लवाय विहिता मया तरिः ।
अवलम्ब्य चेदयमिमां विगाह्यते
किमलभ्यमत्र गुणरत्नमस्तु वः ॥
कालिदासस्य नव्यस्य काव्यव्याख्यां यथामति ।
कार्त्स्न्येन विवरीतुं यो प्रभवेदिपुरोखरः ॥

Colophon :

इति पदवाक्यप्रमाणपारीण श्रीमहोपाध्याय पक्षधरयल्लयार्य भ्रातृतनयेन अक्कय्यसूरिणा विरचितायां चम्पूव्याख्यायां सारा(रत्ना)वली समाख्यायां षष्ठो विलासः । चम्पूभागवतव्याख्या समाप्ता ॥

439

Sl. No : 27085 भारतचम्पूः Ms. No :P . 1463

Beginning:

कल्याणं नो विधत्तां करटमदधुनीलोलकल्लोलमाला-
खेलल्लोलम्बकोलाहलमुखरितदिक्चक्रवालान्तरालम् ।
प्रत्नं वेतण्डरत्नं सततपरिचलत्कर्णतालप्ररोह-
द्वाताङ्कुरार्जिहीर्षा दरविवृतफणाशृङ्गभूषाभुजङ्गम् ॥

End :

राज्ञां मौळिपरंपरां चरणयोः पाणौ प्रदानश्रियम्,
बुद्धौ राजनयोदयं हृदि कृपां सत्यं रसज्ञाञ्चले ।
बाहौ सागरमेखलां वसुमतीं मस्ते किरीटं मुदा
कुर्वन् धर्मतनूभवः चिरमसौ गोपायति स्म प्रजाः ॥

Colophon :

इति अनन्तभट्टस्य कृतौ श्रीमति चम्पूभारते द्वादशः स्तबकः ॥

440

Sl. No : 27128 भारतचम्पूव्याख्या Ms. No: P. 1130

Beginning:

अस्तु श्रीनिगमान्तदेशिकगुरूत्तंसाय चन्द्राय ते
श्रीमत्कौशिकवंशदुग्धजलधेः स्वामीष्टदेवात्मने ।
क्षेत्रश्रीनरसिंहनामविदुषा पुत्रेण सप्रश्रयं
दासेनाचरितं शरीरवचनस्वान्तैः नमः पादयोः ॥
वेदान्तचार्यकृपया चम्पूभारतदीपिका ।
सरस्वतीविलासाख्या नृसिंहार्येण तन्यते ॥

End:

धर्मपुत्रस्य राज्ञः किरीटादिना आत्मनः पट्टाभिषेकं कृत्वा राजसङ्घानप्यथ × त्य अत्यन्तमुदा दातृत्व × गुणसागरः सन् × समस्तभूमिमपि धर्मेण पालयतीत्यर्थः ॥

Colophon

इति श्री कौशिककुलकलशपारावार × द्राकचन्द्रस्य पूर्वस्तबकोक्त विशेषणविशिष्टस्य श्रीमद्वे × नामधेयस्य तत्सुतस्य श्री नरसिंाचार्येन म्नः कृतिषु चम्पूभारतव्याख्यायां सरस्वतीविलाससमाख्यायां द्वादशस्तबकः ॥

441

Sl; No : 27146 चम्पूभारतव्याख्या Ms. No : C. 4276

Beginning :

तृतीयस्तबको व्याख्यायते । पितृव्येति । अथ धृतराष्ट्रेण राज्यार्धं प्रदानानन्तरं पितृव्यस्य धृतराष्ट्रस्य वाचा यूयमिन्द्रप्रस्थमधिवसतेति गिरा एषः पृथातनूजः युधिष्ठिरः । हरिं कृष्णं पुरोधाय अग्रे कृत्वा ।

End :

कृषेः लुकि कृष्णोऽर्जुन इति । कृष्णार्जुनौ । नरपतेः धर्मराजस्य उपान्तं समीपं विविशतुः जग्मतुः इत्यर्थः ।

ColoPhone

इति श्रीमदनन्तकविकृत चम्पूभारतव्याख्यायां धारवाडतन्त्रिकपीताम्बरसूरि विरचितायां चन्द्रिकोपाख्यायां तृ × यः । स्तबकः समाप्तः ॥

442

Sl. No : 27151 भैष्मीपरिणयम् Ms. No : C. 4276

Beginning :

ललितगमना नार्यो राजन्मनोजनितान्तभाः
सुरतिसदृशाः ताः सन्मुख्यो भवानपि तत्पुनः ।
वनभुवमितो गेहादेको न गच्छतु मा विने-
त्यसकृदुदितः पित्रा नमो जयत्यनघो हरिः ॥

End :

ततश्च बलभद्रेन मोचितः रुक्मी लज्जया समं भोजकरहं कृष्णोऽपि + कीर्त्यासाकं कृतार्थतामाप ॥
तावुभौ श्लाघ्यसुरतौ सततं प्रमदोज्वलौ ।
श्री रुक्मिणीवासुदेवौ रेमाते द्वारकापुरे ॥

Colophon :

इति श्रीमच्छ्लेषकाव्य पारावारपारगमन नौकायमानचरणाभिवन्दनाकण्ठ कण्ठीरवसूरिहीरान्तेवासि + अन्यतमस्य भट्टवेङ्कटेशस्य कृतिषु भैष्मीपरीणयो नाम श्लेषोत्तरकाव्यबन्धः पर्याप्तः ॥

443

Sl. No : 27152 भैष्मीपरिणयः **Ms. No : P. 7173/1**

Beginning :

आलम्बे जगदालम्बं लम्बोदरपदाम्बुजम् ।
शुष्यन्ति यद्रजस्स्पर्शात् सद्यः प्रत्यूहवार्धयः ॥
दन्तिज्योतिर्दिवाप्रदीपबिरुदः +
रत्नखेटमखिना सेयं कृतिस्तन्यते ॥
अस्ति खलु प्रशस्तशोभानन्दित—

End :

तावुभौ श्लाघ्यसुरतौ श्यामौ सप्रमदोज्वलौ ।
श्रीरुक्मिणीवासुदेवौ रेजतुर्द्वारकापुरे ॥

Colophon :

इति विश्वामित्र कुलजलधिकौस्तुभस्य सर्वतन्त्रस्वतन्त्राद्वैतविद्याचार्यस्य दन्तिद्योतिदिवाप्रदीपादि बिरुदाङ्कितस्य साग्निचिद्विश्वजिदतिरात्रयाजिनः श्लेषयमकचक्रवर्ति लक्ष्मीधरसूनोः चतुरधिकशतप्रबन्धनिर्मितप्रथितपाण्डित्यस्य सत्यमङ्गल महाग्रामवास्तव्यस्य रत्नखेट दीक्षितस्य कृतिषु भैष्मीपरिणये (?) श्लोकः । समाप्तोऽयं ग्रन्थः ॥

444

Sl. No : 27162 भैष्मीपरिणयव्याख्या **Ms. No : P. 1795/1**

Beginning :

वन्दे तं देशिकमणिं कण्ठे कण्ठीरवाभिदम् ।
यस्य स्मरणमात्रेण नानार्था मे वशंवदाः ॥
अथ भट्टवेङ्कटनामा कविः
'भारतीयकथाबन्धं मद्भक्तैरेवनिर्मितम् । यः पठेच्छृणुयाद्वाऽपि,—

End :

श्यामा—वनिताभेदः । प्रमदा सूज्वला ॥ इति श्रीमदिति । नौकायमानं चरणाभिवन्दनं यस्य । अन्तेवासिनः शिष्याः । अन्यतमः कश्चित् ॥

Colophon:

इति श्रीभैष्मीपरिणयाख्यश्लेषोत्तरकाव्यप्रबन्धस्य टिप्पणिका ज्योत्स्नाभिधाना धरणीधरभूपविरचिता—पर्याप्ता ॥

445

Sl. No : 27164 **भैष्मीपरिणयचम्पूव्याख्या** **Ms. No : P. 4119/2**

Beginning :

यत् प्रकाशात् प्रकाशन्ते देहेन्द्रियमनोधियः ।
सर्वोपाधिविनिर्मुक्तं तमात्मानमुपास्महे ॥

+ सत्काव्यविषयतां च निश्चिन्वन् भैष्मीपरिणयनामकं चम्पूं चिकीर्षुरविगीतशिष्टाचारप्राप्तं निर्विघ्नपरिसमाप्तिफलकं नमस्क्रियात्मकं मङ्गलं स्वयमाचरन् शिष्यशिक्षायै ग्रन्थतो निबध्नाति— आलम्बे इति । पद्मोः पादयोः रजसो धूलेः । धूलिः पांसुर्ना न द्वयो रज इत्यमरः ॥

End :

वाल्मीकिर्विपरीतनामकथनान्मुक्तस्तथाजामिलः
त्वन्नामस्मरणेन पुत्रमिषतः पूतः पुराभून् किल ।
श्रुत्वैवं तव नामकीर्तनफलं नामोच्चरन्तं सदा
पाहि श्रीरघुनाथक त्वदपरं नास्त्येव मे दैवतम् ॥

Colophon :

इति श्रीमद्विद्वन्मुकुटालङ्कारहीरवरकरवीरपुरपालकशिवछत्रपतिगुरुमहाराजेत्यादिबिरुदौघभ्राजमन श्रीमत्सिद्धेश्वरयोगिराजसूनु श्रीरामपण्डितात्मज श्रीकृष्णपण्डिततनयेन रावजीमहाराजापरनाम्नः श्रीनिवासपण्डितेन विरचिता सज्जनरञ्जन्याख्या श्रीमद्भैष्मीपरिणयचम्पूव्याख्या समाप्तिं जगामतराम् ॥

446

Sl. No : 27166 मद्रकन्यापरिणयः Ms. No :P . 2907

Beginning :

कल्याणमव्याहतमातनोतु
सव्यानलीलाकृदभूद्गजास्यः ।
कर्णानिलेनापसृतेंऽशुकान्ते
यो वल्लभायास्स्मृतपल्लवेन ॥

End

नन्द्या वा निन्द्या वा मत्कृतिरेषाऽद्य यत्कृपोत्पन्ना ।
शैशवपाणीव पितुः नन्दतनूजनन्दिनी भूयात् ॥

Colophon

इति श्रीमदुदयकुलकलशजलनिधिचन्द्रमसः पण्डितमण्डली मान्यस्य दत्तात्रेयविपश्चितः सुगृहीतनाम्नः तनयेन गङ्गाधरकविना विरचिते मन्द्रकन्यापरिणये पूर्णः पञ्चमोल्लासः ।। ग्रन्थः पूर्णः ॥

447

Sl No 27167 मधुरोष्ठीसन्देशः Ms. No : b . 1055

Beginning :

बर्हीतानवरोचिषा तदनु तां केलीवर्तीं श्रीपते-
स्तन्वन्नुरपलिनीमुपेत्य च नमोवाकं ब्रुवन् चक्रिणा ।
केकिन्नेहि कुतोऽसि गोपतरुणीसन्धानचातुर्यभाक्
प्रागद्यागमनं वदेति गदितो वाणीमभाणीदिमाम् ॥

End :

मधुरोष्ठीसन्देशं माधवगुणयोगनिचितमाधुर्यम् ।
रसिकाः प्रसवगुलुच्छं भ्रमरवदास्वादयन्तु निरसूयाः ।।
गङ्गाधरकविरचितः श्रृङ्गाररसैधमानपरभागः ।।
सन्देशोऽयं सरलः कन्दलयतु नन्दनन्दनामोदम् ॥

Colophon :

इति मधुरोष्ठीसन्देशः समाप्तः ।।

448

Sl. No : 27169 **मीनाक्षीपरिणयचम्पूः** Ms. No : P. 4415/1

Beginning :

श्रेयो मे विदधातु मत्तमधुपश्रेणीमिळद्दण्डभू-
शुण्डादण्डविखण्डिताखिलजगद्विघ्नेक्षुकदण्डावलिः ।
वामाङ्काश्रितवल्लभाकुचतटीसङ्घट्टितोरुस्थलः
श्यामा कामुकशेखरः श्रुतिशिरःकान्तारचारीकरी ॥

End :

उन्मीलन्निजवाक्चमत्कृति × × जगन्मङ्गलम् ॥

तस्य भगवतः कुमारेण कामाक्ष्यम्बागर्भशुक्तिमुक्तामणिना कामुकायन विश्वामित्रगोत्रेण श्रीमदादिनारायणसूरिणा विरचिते महाप्रबन्धे मीनाक्षी परिणये चतुर्थोल्लासः ॥

Colophon :

इति चतुर्थोल्लासः ॥

449

Sl. No : 27172 **मुकुन्दचरितम्** Ms. No : P . 247

Beginning :

कल्याणानि करोतु नित्यमनघः कारुण्यपाथोनिधिः
श्रीमान्यादवशैलशेखरमणिः नारायणः श्रीसखः ।
यत्पादाब्जयुगं विभाति विनमद्गीर्वाणसङ्घेश्वरं
ब्रह्मेशादिकिरीटरत्नघृणिभिः नीराजितं सर्वदा ॥

End

मुकुन्दचित्ते वस नस्सदा त्वं
चित्तं त्वयि स्थापय नस्सदा च ।
त्वत्पादभक्तिं सुदृढां च देहि
जगद्गुरो नः परिपालयार्थान् ॥

केशवाखिल लोकेश × × ×

Colophon :

सप्तमस्तवकान्ते समाप्तिवाक्यं यथा—

इति श्रीनिवासकविविरचिते मुकुन्दचरिते सप्तमस्तवकः ॥

450

Sl No · 27173 — यतिराजचरितम् — Ms. No : P . 143

Beginning :

वन्दे जगत्कन्दलकन्दमिन्दु-
कुन्दाभमन्दस्मितमिन्दिरेशम् ।
वन्दारुमन्दारमपाटसान्द्र-
कूपारसं दैवतसार्वभौमम ॥
प्रत्यग्रं सततानुभूतमपि यत्प्राचीनवाचालिहः
पालिष्वद्भुतधामसर्वं सर्वसुदृशां प्राणप्रियंभावुकम् ।

End :

अमुं यतीन्द्रस्य कथाप्रभावं
योऽध्यापयेद्यस्तु पठेल्लिखेद्यः ।
तनोतु तेषां यतिसार्वभौमः
शास्त्रे स्वकीये कृपया बुभुत्साम् ॥

Colophon :

इति श्रीशैलघनगिरिवंश्येन लक्ष्म्माम्बागर्भशुक्तिमुक्तामणिनावेङ्कटसुधीमणि सूनुना श्रीमद्राजगोपाल मुनिवरप्रसादसमासादितवेदान्तविद्येन अहोबलसूरिणा विरचिते यतिराजचरित्रचम्पूग्रन्थे अष्टादशोल्लासः । प्रबन्धः समाप्तः ॥

451

Sl· No : 27179 — यतीन्द्रप्रवणचम्पूः — Ms. No : 2. 709

Beginning :

श्रीमान् पूर्णस्थितेशो दिशतु करुणया तुन्दिलम्मंगलं वो
लक्ष्मीवक्षोजराजन्मृगमदमकरीमुद्रिकालक्ष्यवक्षाः ।
तत्पादद्भक्तिभास्वच्छररिपुमुनिवाक् जाह्नवीमूलपादो-
दान्तौघोत्तंसदान्तप्रमुखनतजनप्रार्थनापारिजातः ॥ +
पुत्रात्त्रिगोलजननत्कुरुकाधिवासि
सत्सेवको वकुलभूषणनाथसूरिः ।
रम्योपयन्तृमुनिपादपयोजभक्त्या
चम्पूं दयामहिमाब्धिविधुं व्यधत्त ॥

End :

श्रीवत्सचिह्नायसहस्रकैः..
तस्मै नमः स्वामिदयाम्बुदेऽहम् ।
यत्सन्निधानास्थितिमत्रमाजा
मयाकृतोऽयं वरयोगिचम्पूः ॥
सुधीजन वश्चचरणाम्बुजानि
प्रणम्य बद्धाञ्जलिरद्य याचे ।
दोषेषु जाग्रत्स्वपि मेऽत्र पाण्या
मया समुद्वीक्ष्य मुदाद्रियध्वम् ॥
जयतु यतिसार्वभौमप्रवणः षर्यायभोगेन्द्रः ।
जीयात्तद्गुणदीपश्चम्पूश्चाशेषदेशकालेषु ॥

Colophon :

इति श्रीवत्सकुलतिलक वरदगुरुचरणसरसिज + शठरिपुगुरु तनुजेन श्री वकुलाभरणसूरिना विरचितश्रीमद्यतीन्द्रप्रवण प्रभावसद्दीपे वेदान्तभूषणापरनामधेये चम्पूप्रबन्धेऽष्टमः स्तबकः ॥

452

Sl. No : 27180 यादवशेखरचम्पूः **Ms. No: A. 370**

Beginning :

चक्रीयः कलकण्ठकण्ठमुरलीसङ्गीतकर्णेजपः
सङ्गल्लत्सुमनोमनोहररसः सारालिकेलीमुखः ।
आलोकोत्कालिका × न कुलशः क्षोणीपरागालिकृत्
नव्यो यादवशेखरोऽस्तु सुदृशामामोदकृत्पल्लवः ॥

End

सरोजनाथोऽपि समः किलेन्दुः
किरीटसेवाकृतधन्यतास्तः ।
इति द्युरत्नं किल सेवितुं हरिं
पूर्वाद्रिशृङ्गे स्वकरान् करोति ॥

Colophon :

यादवशेखरचम्पूनामकग्रन्थः समाप्तः ॥

453

Sl. No : 27184 राजशेखरचरितम् Ms. No : P. 4607

Beginning :

श्रेयांसि मम भूयांसि दत्तां किमपि दैवतम् ।
भूषणं भीषणं यस्य मदनः सदनं रुषः ॥
नवीनकालिदासस्य शिष्यो भूष्यतमः सताम् ।
काव्यामृतरसाभिज्ञो नाम्ना रसिकशेखरः ॥
सुबुद्धिनाम्ने मित्राय पात्राय विविधाः कथाः ।
कथयामास यास्तासां सङ्ग्रहोऽत्र विधीयते ॥
कविकुञ्जरनाम्नो मे प्रबन्धो रसबन्धुरः ।
सभारञ्जननामायं जयतु क्लेशभञ्जनः ॥

अस्ति खलु प्रशस्तमतिरभिनवकालिदाससुकवेरन्तेवासी चिरतरतदीयसहवाससमुपचितरसिकतोत्सेकः श्रीमानसिकरो खरः ॥

End :

वेणीरसालसा × ता × स्य विलासिन्यो राजशेखरभूपतेः ।
× × चारुशीला पठन्ति ॥
नृत्यन्त्याः किर्तिनट्यास्त × रणिपते नृत्तशालाविलोकी
दिक्साला:प्रेक्षितारः शतमखमुखशः स्वत्प्रतापः प्रदीपः ।
धर्मस्तत्सूत्रधारः सकलजलधयो यान्ति मार्द × करवं
संबाधं प्रेक्षकाणां विदधति शिथिलं दिग्गजाः × ॥
उपहारिकृतं हारं भूपतिः पाण्ड्यभूभुजा ।
अदिशच्चारुशीलायै कवितापरितोषितः ॥

Colophon :

— — —

454

Sl. No : 27188 रामकथासुधोदयः Ms. No: P. 3299

Beginning :

बुद्धिर्बलं यशोधैर्यं निर्भयत्वमरोगता ।
अजाड्यं वाक्पटुत्वं च हनूमच्छरणाद्भवेत् ॥

जय भानुकुलचन्द्र जय जन्यनिस्तन्द्र
जय सुगुणगणसान्द्र जय कोसलेन्द्र ।
जय पाल्यमुनिचन्द्र जय गुप्तधरणीन्द्र
जय विनमदमरेन्द्र जय रामचन्द्र जय जय ॥

End :

श्रीसहचराय श्रितजनमान्याय श्रीसरसरक्षाय श्रीशोभनाय ।
श्रीसदनायश्रीसीतासहिताय श्रीरामाय मङ्गलम् ॥
यतः प्रवृत्तिर्जगतोस्य शाश्वती
यदाश्रिताविं × × द्धि विश्रुताः ।
निजात्मभूतैर्गुरुभिश्च सूरिभि-
स्स प्रीयतां वः स्तुतितः श्रियः पतिः ॥

Colophon:

इति श्रीशैलकुलतिलक श्रीनिवाससूरिविरचिते श्रीरामकथा सुधोदये युद्ध-काण्डस्समाप्तः ॥

455

Sl. No : 27189 रामाभिषेकचम्पूः **Ms. No : P. 329**

Beginning :

× × × याक सैन्ये—
सर्वं सुपर्वसुदृशां समकम्पताक्षी ।
सत्येतराणि फणिनश्च सहस्रमूर्ध्नः ॥
तदनु तारतारेयदधिमुख ॥

End :

रघुकुलपतिरित्थं रञ्जयन् युद्धलक्ष्मी-
मवनिजनितपुत्रीमप्यतीव प्रगल्भः ।
अरमत सुविचित्रैराञ्जनेयप्रसङ्गैः
अपि च कपिचरित्रैः अन्वहं रामभद्रः ॥

Colophon

इति श्रीकोटिसागरभट्टतनयपद्मनाभाचार्यसूनुदेवराजदेशिकविरचिते रामाभिषेकनामनि चम्पूकाव्ये युद्धकाण्डः समाप्तः ॥

456

Sl. No : 27194 | रामायणचम्पूः | Ms. No : P. 1370

Beginning :

लक्ष्मीं तनोतु नितरामितरानपेक्षं
अङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम् ।
हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं
विघ्नाद्रिभेदशतधाधुरंधरं नः ॥

End :

साकेतं समुपेयिवान् स विजयी संसेवितो भ्रातृभिः +
रामः पालयति स्म कीर्तिविभवैरामोदिनीं मेदिनीम् ॥
साहित्यादिकलावतामनगरग्रामावतंसायित +
काण्डो लक्ष्मणसूरिणा विचितः षष्ठोऽपि जीयाच्छतम् ॥

Colophon :

इति भोजलक्ष्मणकृतं चम्पूरामायणाख्यकाव्यं समाप्तम् ॥

457

Sl. No : 27268 | रुक्मिणीपरिणयः | Ms. No: P. 3863

Beginning :

श्रीमान् यादवनन्दनः त्रिजगतां क्षेमङ्करो यः करं
रुक्मिण्याः प्रचरत्त्रपान्तरमितापाङ्गेक्षणायाः पुरा ।
साकूतेक्षणमन्दहासरुचिरं प्रत्यग्रहीदग्रणीः
सर्वेषां त्रिदिवौकसां स दिशतु श्रेयांसि भूयांसि नः ॥

End :

तथापीदमस्तु—
धर्मो वृद्धिमुपैतु साधुषु खला नश्यन्त्वसूयापराः
ब्रह्मण्याः क्षितिपा भवन्तु सुखिनः सन्त्वेव गोब्राह्मणाः ।
प्रेमप्रौढविवाहमङ्गलकथां ये चावयोरादरात्
शृण्वन्ति प्रवदन्ति चास्तु भगवान् तेषां स्थिरं मङ्गलम् ॥

Colophon :

इत्यम्माळ्शास्त्रिणा विरचितरुक्मिणीपरिणयचम्पूप्रबन्धकाव्ये तृतीयाश्वासः ॥

458

Sl No : 27270 रुक्मिणीवल्लभपरिणयः Ms. No : B . 1011

Beginning :

अन्योन्यातिशयावहैर्नवनवैः नित्यानुभूतैरपि
स्वच्छन्दैः गुणरूपविभ्रमवयोलावण्यभावादिभिः ।
आनन्दामृतसिन्धुमग्नहृदयं शेषाद्रिभूषायितं
दिव्यं दैवत × दिशतु मे कल्याणपारम्परीम् ॥

End

दामघोषिरपि दन्तिराजव-
न्माधवोऽपि मृगराडिवागतः ।
एकमामिषमिदं कथं भवे.
दित्यशेषजनता व्यचिन्तयत् ॥

Colophon

इति रुक्मिणीवल्लभपरिणयाख्ये चम्पूप्रबन्धे चतुर्थः स्तबकः ॥

459

Sl. No : 27271 रुक्मिणीविलासः Ms. No: C· 1268

Beginning :

यश्चर्कर्ति जगच्चराचरमयं दादद्धि कल्पक्षये
यो जङ्घन्ति निजाङ्घ्रिकञ्जमधुपं जाघ्राढि सन्तं जनम् ।
यो जाहाति सुरेश्वरातिनिवहं वर्वृत्ति वारंतरे
यो मोमोत्ति सरस्वदात्मभवया जर्गर्दु देवः स नः ॥

End

भद्रं श्रीकरलालनीयकलुषद्वेषश्रयाणीति ते
रम्योरुश्रवसः पदाङ्घ्रिकमलं श्रीकृष्णवीरध्वज ।
सद्रुक्मिण्यभिलाषपूरकदिरोश्वेतस्थितं चिन्मयं ×

Colophon :

इत्यष्टमो विलासः ॥ (६४तमपत्रे)

460

Sl. No : 27272 लीलावतीसन्देशः Ms. No: B· 1058

Beginning :

निस्सीमोदयमानयौवनवती लीलावति कामतो
नित्योज्जृम्भददम्भकुम्भकुचसंश्लेषं चिरं तन्वती ।
आढ्यंभावुकतावकीनकुशलं पृष्ट्वाऽगदीद्यद्भवान्
गोपीजार विदाङ्करोतु सरसं तद्वाचिकं सादरम् ॥

End :

इत्थं निगद्य कृतसान्तरगात्रयष्टिः
आनम्रखिन्नवदना तरुणी तवेऽयम् ।
नोवाच किञ्चिदथ गद्गदिकापरीत-
कण्ठी रमेश रमयाश्रुतरं वराकीम् ॥

Colophon :

— — —

461

Sl. No : 27273 वज्रमुकुटीविलासः Ms. No : P. 2919

Beginning :

श्रीमद्यादवशैलाग्रशेखरं सद्गुणाकरम् ।
योगानन्दनृसिंहाख्यदैवतं पर्युपास्महे ॥
तत्सूनुरळशिङ्गाख्य भट्टोऽयं कविकेसरी ।
विधत्ते वज्रमकुटी विलसं चम्पुमुत्तमम् ॥
अहमत्र तु पञ्चरात्रशास्त्रे प्रथितं कथयामि—

End:

वर्धन्तां सर्ववेदाः क्षितिविबुधगणाः ।
वर्धन्तां तैर्नुताङ्घ्रेः यदुधरणिधरा धीशितुः वैभवौघाः ॥
वर्धन्तां तद्वदेतत्कविवररचिताः सुप्रबन्धाश्च भूमौ—

वन्दारुबृन्दमखिलं मन्दार इवावनीं गतोऽभीष्टैः ।
आनन्दयन्न इन्धे योगानन्दाय मङ्गलं भवतु ॥

Colophon :

इति श्री मौञ्ज्यायनकुलतिलकस्य यदुगिरीशचरणकमलार्चकस्य योगानन्द-भट्टाचार्यतनयस्य अळशिङ्गभट्टस्य कृतौ वज्रमुकुटीविलासः समाप्तः ॥

462

Sl. No : 26276 वरदाभ्युदयचम्पूः Ms. No : P. 240/1

Beginning :

कल्याणैकनिकेतनं तदनघं कालाम्बुदश्यामलं
चित्ते नृत्यतु शेषभूधरशिरोरत्नं चिरन्तं महः ।
यस्योरस्यनिशं सुता जलनिधेः यस्यास्ति तन्मेखिला
पार्श्वेयस्य पदे च तत्प्रियतमा यत्तत्र शेते समम् ॥

End :

समीहा चेद्वोढुं सहृदयसभारंजनविधं
प्रबन्धोऽयं ग्राह्यः पद्य चद्य गिरो वेङ्कटकवेः ॥ (?)
शरदश्शारदश्शतं प्रबन्धान्
स्वगुणाख्यायिन एव कारयेन्माम् ॥
वहतां स्वपाम्बुजैकदास्यं
महतामेधयतां मयि प्रसादम् ॥

Colophon :

काञ्चीनगरनायक ताताचार्य भागिनेयाप्तोर्यामादियाजि श्री श्रीनिवासाचार्य तनूभवस्य श्लेषयमकचक्रवर्तिनो रघुनाथाचार्ययज्वनः श्रीनिवासकृपातिशयसुविदिततनयेन सीताम्बागर्भसंभवेन श्रीमदात्रेयवेङ्कटाचार्ययज्वना विरचिते वरदाभ्युदयाभिख्ये चम्पूप्रबन्धे पञ्चमोल्लासः ॥

463

Sl. No : 27280 वासुदेवानन्दिनी Ms. No : C. 2411/2

Beginning :

सौख्यं संततमस्माकं दोग्धु दुग्धाभयामृतम् ।
सच्चिदानन्दसान्द्रं तत्कृष्णाख्यं परमं महः ॥

ओं नमः श्रीनिवासाय वेङ्कटाचलवासिने ।
तमोदैत्यनृसिंहाय सुमनश्चक्रवर्तिने ॥

दाक्षयण्यामासादितोदयेन दिवस्पतिनेव तिम्मरायशर्मणापि गुरुचरणैं-र्वात्सल्येन गोपालकृष्ण इत्याहृतेन श्रीमन्महीशूरपुरवराधोश्वर श्रीमच्चामराजेन्द्र मुख्यामात्यवर्य शेषाद्रिनाथ परिपोषितेन कविना विरचितेयं रसिक हृदया-नन्दिनी अध्येतृजनपापापनोदिनी कविजनेष्टसन्दायिना वासुदेवानन्दिनी विजयताम् ॥

End :

गोपालकृष्णचरितामृतबद्धतृष्ण-
गोपालकृष्णकविवागमरस्रवन्ती ।
गोपालकृष्णचरणाब्जमधूलिधारा.
संपातसंभृतरसास्तु सतां सुखाय ॥
रामाश्वोपस्कृतनवशता + चतुस्सहस्रेषु ।
कल्यब्देषु गतेषु ग्रथिता कृतिरियमुदरार्था ॥

Colophon:

इति वासुदेवानन्दिन्यां पञ्चमोल्लासः समाप्तः । पद्यसंख्या ६८० गद्य संख्या १३८

464

Sl. No : 27281 विजयविजयचम्पूः Ms. No :P : 872

Beginning :

× × मौसिल्गौराजेन्द्रम्—
वन्देऽहं रघुपुङ्गवं वन्दारुव्रजकल्पकम् ।
कन्दर्पायुतसन्निभं सुन्दश्रीमद × × ॥
किञ्च नौम्यौयो मालिनी । सुरवरनुतपूर्ं सुन्दजाया सुहारं +
सरयमहमुदारं संश्रये रामशूरम् ॥

End

अयं नरोऽनघं परस्वरक्तमोहहं हरिं
हरित्करिस्तुतं कलाकरि × विक्रमम् ।
कृपाकृतिं क्षितिव्रतिप्रियं जराजयं च वि-
श्वविग्रहं यमी यदा भजत्यजस्त्वजं विभुम् ॥

Colophon :

इति श्रीमिहिरान्वयनृपशेखर पदपङ्कजमधुपायित मरुदात्मजकरुणारसभर सेचनजनितासमकविताभिध ललितलता व्रजनन्दनीये अहोवलाचार्य तनूभवेन लक्ष्मीनरसिंहकविना विरचिते विजयविजयाख्ये चम्पूकाव्ये पञ्चमोल्लासः ॥

465

Sl. No : 27283 विरिञ्चिपुरनाथचरितम् Ms. No : C 21315

Beginning :

कटस्थलोन्मीलितदानवारये
कटाक्षसंरक्षितदानवारये ।
करोमि × साहितमातुलायते
नमस्कृतीं येन रमातुलायतिं ॥

End :

तत्रैव त्रिभुवनत्राणकारणाय सततं सन्निधीकरोमीति चामीकराचल धनुस्तमनुर्बभाषे । यत्र स्थितः सहतया सरणी सहायस्तीर्थस्यतिर भुवि ॥ (?)

Colophon :

इत्यवनितलप्रसिद्ध नवनीतकवि विरचिते विरिञ्चिपुरनाथचरिते तृतीय आश्वासः ॥

466

Sl. No : 27288 विश्वगुणादर्शचम्पूः Ms. No :P : 1704

Beginning :

श्रीराजीवाक्षवक्षःस्थलनिलयरमाहस्तवास्तव्यलोल -
लीलाब्जान्निष्पतन्ती मधुरमधुझरी नाभिपद्मे मुरारेः ।

अस्माकं लोकमात्रा द्वियुगमुखशिशोराननेष्वर्प्यमाणं
शङ्खप्रान्तेन दिव्यं पय इति विबुधैः शङ्क्यमाना पुनातु ॥
कर्न्नामण्डलमण्डनस्य मखिनः कर्णाटभूभृद्गुरोः—

End :

जगतु जयति लक्ष्मणार्यपक्षो
जयतु वचः श्रुतिमौळिदेशिकानाम् ।
जयतु निगमवर्त्म निःसपत्नं
जयतु चिराय मुरारिरञ्जनाद्रौ ॥
प्रकाशदोषप्रचुरेऽप्यमुष्मिन् +
ग्रन्थे मदीये करुणानुबन्धात् ।
प्रसादवन्तो न कृशानवन्तु
परन्तु विश्वावसुवन्तु सन्तः ॥

Colophon :

इति श्रीपञ्चमतभञ्जन निबन्धनविख्यात तातयज्व भागिनेय वाजपेय सर्वे पृष्ठोप्तोर्यामादियज्वात्रेयवंशमौक्तिक + भगवदप्पयाचार्यतनूभव श्लेषयमक चक्रवर्तिरघुनाथाचार्य दीक्षिततनयस्य श्रीनिवास कृपातिशय सुविदितनयस्य सीतांबागर्भसंभवस्य श्रीमत्काञ्चीनगरवास्तव्यस्य वेङ्कटाचार्ययज्वनः कृतिः विश्वगुणादर्शः सम्पूर्णः ॥

467

Sl. No : 27308 विश्वगुणादर्शचम्पूव्याख्यानम् Ms. No: P. 9098/1

Beginning :

× णादिकल्याणगुणवस्तु दोषत्वस्याविष्कारं आक्षेपं कथंकारं कथमित्यर्थः ॥ गुराविति । अग्र्यः ज्येष्ठोऽपि स रामचन्द्रः गुरौ पितरि दशरथे असत्योक्तेः वरद्वयाप्रदाने सतीति निरासः ॥

End :

अत्र नीलाद्रौ वेङ्कटेशाख्यं स्कन्दरूपं सदाशिवं इत्यादि शम्भुरहस्य वचनानि ॥

अञ्जनाद्रौ नीलाचले मुरारिः श्रीनिवासः रामानुजीयैः कलौ कल्पितः श्रीनिवासनामा सुब्रह्मण्यरूपः सदाशिवश्च जयतु सर्वोत्कर्षेण वर्तताम् ॥

Colophon

इति श्रीमत्कौशिककुलपयःपारवार यज्ञेश्वरविद्वच्चूडामणेरात्मजेन सुब्बाशास्त्रिणा सङ्ग्रहतः कृतं भावदर्पणं नाम विश्वगुणादर्शव्याख्यानं संपूर्णम् ॥

468

Sl No : 27312 वीरभद्रविजयचम्पूः Ms. No : P . 4714

Beginning :

श्रेयो मे विदधातु शङ्करजटागङ्गातरङ्गानिल-
व्यालोलेन्दुकलानिरर्गलगलत्प्रोद्दामधारासुधा ।
यामालोक्य करप्रसारणपरो मायाकरीन्द्रो गुरोः
वामाङ्कस्थितपार्वतीस्तनयुगस्तन्यं पिबन्मोदते ॥

End :

पुष्णन्पादावनम्रान्पुरहरचरणाम्भोजपूजां वितन्वन्
धीन्वन्कामैः कवीन्द्रान्द्विषदवनिपतीन्भञ्जयन्दोर्विलासैः ।
रक्षन् सानन्दमुर्वीमवहितमनसा धर्मशास्त्राणि शृण्वन्
श्रीमान्वीरावनीराडनुभवति सदा सर्वसाम्राज्यलक्ष्मीम् ॥

Colophon:

इति श्रीमन्निखिलतन्त्रस्वतन्त्रविरुदसमर्थ × × × पुम्भावशारदारूपस्य मुक्तीश्वरदीक्षितस्य तनूभवयलहङ्क मुम्मडीकेम्पभूपाल सभाभरणेनैकाम्रदीक्षितेन विरचिते वीरभद्रविजये श्रीमति चम्पूप्रबन्धे पञ्चमोल्लासः ॥

469

Sl. No : 27315 वीरभद्रविजयचम्पूः Ms. No : P. 3385

Beginning :

दद्याद्दन्तावल × खन्तेजो × दध्यमायुषाम् ।
स्वेच्छाविहारिणो यूनोस्सुकृतं यच्चिरार्जितम् ॥

\+ + + +

अस्ति सकलजगत्प्रशस्तमहिमा वैमानिकसरणिलंघनजंघालश्रृंगोन्नतिमूर्तिमिवानुवर्तमानः—

End :

ततश्च सकलभुवनजननीभवानीविस्मयनीयशौर्यधैर्यावष्टम्भमन्तिकवर्तिनं वत्सं वीरभद्रं + + अनवधिकानुरागोत्तरंगितमयांगयान् ब्रह्मस्तम्बैककुटुम्बिपरमनुकम्पानिधिरवतुस्ततमखिलजगदीश्वरो भगवान् परमेश्वरः ॥

Colophon :

इति कुमारडिण्डिम इति कविराज इत्यग्रे वाद्यमानबिरुदावली + + + लक्ष्मणभट्टेन चरितचिरकालतपःफलस्य सावित्रीगर्भशुक्तिमुक्तामणेः भारद्वाजगोत्रशतपत्रमार्ताण्डस्य द्राह्यायणसूत्रिणः छन्दोगस्य पुर × × रचरणभूयसी भक्तेः स्फुलिंग इति कविपुङ्गवैः कलितापरनामधेयस्य श्रीमल्लिकार्जुनकृतौ वीरभद्रविजयनाम्नि चम्पूप्रबन्धे कैलासशिवयोर्वर्णनं नाम चतुर्थः अश्वासः ॥

470

Sl. No : 27317 **आचार्यचम्पूः** Ms. No: P. 602

Beginning :

यद्भक्ति परिचिन्वतामनुकलं लक्ष्मीर्जरीजृम्भते
यल्लाक्षारसलक्ष्मचारुमुरजिद्वक्षो दरीदृश्यते ।
यत्प्रह्वत्रिदशावरोधललनामौलौ परीवृत्यते
तत्पद्माचरणाम्बुजं मम गिरां लाभाय बोभूयताम् ॥

End :

कल्पद्रोः कविवादिकेसरिगुरोः प्रज्ञासुधावारिधे-
र्जातः कश्चन कल्पितार्थविततिश्चम्पूप्रबन्धात्मना ।
तस्याम्नायकिरीटदेशिककथामाध्वीझरीमुद्वहन्
षष्ठोऽयं स्तबकः करोतु सुमनःकर्णावतंसश्रियम् ॥

Colophon:

इति श्रीकौशिककुलतिलकश्रीवेङ्कटेशदेशिकदयिततनयस्य परवस्तुवेङ्कटगुरु चरणजलजषट्चरणान्तःकरणस्य कविताकिंकसिंहस्य वेदान्ताचार्यपरनामधेयस्य कृतौ वेदान्ताचार्यविजयाह्वये चम्पूप्रबन्धे षष्टस्तवकः ॥

471

Sl. No : 27327 आचार्यविजयचम्पूः **Ms. No : P. 7128/2**

Beginning :

यद्भक्तिं परिचिन्वतामनुकलं लक्ष्मीर्जरीजृम्भते
यल्लाक्षारसलक्ष्मचारुमुरजिद्वक्षो दरीदृश्यते ।
यः प्रह्वस्त्रिदशावरोधललनामौलौ बरीवर्त्यते
यत्पद्माचरणाम्बुजभ्रमगिरां लाभाय बोभूयताम् ॥ +
सामर्थ्यं परवस्तुवेङ्कटगुरोर्वार्त्स्यस्य कस्साधयेत् ॥ +
विद्याविलासे यदि ते विवित्सा
विचित्रयुक्तौ यदि वा सिसृक्षा ।
अपास्य शङ्कां मयि चित्तहर्षात्
आम्नायचूडागुरुमाद्रियेथाः ॥ +
कथासुधां कामपि तस्य सूरेः
अशेषलभ्यां म × × लैर्वितीनाम् ।
गिरां भरैर्गुम्भितपद्यगद्यैः
सतां मुदे सम्प्रति दर्शयामः ॥

End:

जयति निगमचूडाजीविका देशिकानां
जयति गुरुरमुष्याजन्मसीमा दयायाः ॥
जयति भुवनरक्षाजागरीका तदुक्तिः
जयति जगति तस्यां जातहर्षस्समाजः ॥

Colophon:

इति श्रीकौशिककुलतिलकस्य श्रीवेङ्कटदेशिकदयिततनयस्य श्रीपरवस्तु वेङ्कटगुरुचरणजलजषट्चरणान्तःकरणस्य कविताकिंकसिंहस्य वेदान्ताचार्य परनामधेयस्य कृतौ आचार्यविजयाह्वये चम्पूप्रबन्धे षष्ठः स्तवकः ॥

472

Sl. No : 27333 **शङ्करचम्पूः** Ms. No : P. 4739

Beginning :

× द्भुताववविना भूतौ प्रतनौ दम्पती मुहुः ।
लीलयैव जगज्जन्मस्थितिसंस्थितिमध्ययोः ॥
तथापिसूत्रे न पुराणवेत्रा
प्रपञ्चितं यच्छिवयोश्चरित्रम् ।
तदेव संक्षिप्य करोमि गद्य-
पद्यात्मकं काव्यमतीवहृद्यम् ॥

End:

धर्मो वृद्धिमुपैतु भूम्नि सुसुखं तिष्ठन्तु सन्तो जनाः
पर्जन्योऽपि दधातु वृष्टिमभितो यान्तु क्षयं दुर्जनाः ।
श्रीमान् शाङ्करिरप्यमीष्टनिचयं भक्ताय देयात्स मे
लोकाः स्युर्निरुपप्लवाः कृतिरियं जीयाच्चिरं भूतले ॥

Colophon :

इति श्रीमदक्षन्तलकुलललाम वेङ्कटरामनामक सूरीन्द्रसूनुना कोलाहल नगरवास्तव्येन लक्ष्मीपतिनाम्ना विरचितायां शङ्करचम्पूनामक कृतौ देव-काण्डः समाप्तः ॥

473

Sl. No : 27335 **शङ्करानन्दसौरभः** Ms. No : C. 2562/5 b

Beginning :

नीलाम्बुवाहमहनीयशरीरकान्ति-
च्छन्दानुवर्तिपशुपालवधूहगन्तात् ।
गीर्वाणपूर्वसरन्ध्रपदारविन्दा-
त्स्वान्तं पुराणपुरुषान्न पराञ्चतान्नः ॥
श्रीशङ्कराख्यो गिरिशावतारो
लीलाश्चकार क्षपितांहसो याः ।
सङ्मथ्य तास्साधितसर्वकामाः
महेश्वरं प्रीणयितुं प्रवर्ते ॥

End :

स विधाय नीलकण्ठः शङ्करमन्दारसौरभाभिख्याम् ।
चम्पूमिमां मुरद्विट् चरणाम्बुजयोरुपायनमकार्षीत् ॥

Colophon :

इति श्रीमत्त्रिविक्रमविद्वन्मणिसूनोः पार्वत्यम्बातनयस्य नीलकण्ठस्य कृतौ शङ्करमन्दारसौरभे षष्ठस्तरङ्गः । समाप्तं शङ्करमन्दारसौरभम् ॥

474

Sl. No : 27338 शङ्करानन्दचम्पूः **Ms. No: P. 3527/1**

Beginning :

श्रीकण्ठस्नेहसर्वस्वनिधिं लम्बोदरं भजे ।
शिखावतंसशीतांशुलेखाभिज्ञानचीटिकम् ॥
पातु गजेन्द्रो + पुनर्मुञ्चन् ॥
स कालिदासो जयतादजागळस्तनीं +
यदुक्तिमाधुर्यभरैः तिरस्कृता ।
सिताऽपि मध्ये परिगृह्यतेऽधिका ॥

End :

पशुपतिरिति श्रुत्वा शिष्यद्वये ×
कृतिमभिनवां गीतां द्वैपायनस्य तपोनिधेः ।
सदसि मुदितस्स × व्यैनं विनोदकलान्तरैः
अरमत चिरादात्माराम × × कन्यया ॥

Colophon

इति गुरुस्वयंभूनाथरामकृतौ शङ्करानन्दनाम्नि किरातार्जुनीये चम्पुकाव्ये पञ्चमोच्छ्वासः ॥

475

Sl. No : 27342 शिवचरितम् **Ms. No: P. 10345/18**

Beginning :

वन्दे वेतण्डवदनं यच्छन्दोलीलयोद्धृता ।
ब्रह्माण्डमण्डपारंभस्तम्भतां लभते क्षणम् ॥

वाणीताण्डवमा × तां मज्जिह्वारंगमण्टपे ।
हृद्या यद्भूमिकालीला विद्या वेदपुरस्सराः ॥
अभूदभूतप्रतिमे महेश्वरे
निरुद्धचेता निगमान्तसारवित् ।
कलानिधिः कौशिकवंशवारिधेः
कविप्रतीतः कविवादिशेखरः ॥

End :

इति प्रसादसुभगमभिधाय परमेश्वरेण विशिष्टब्रह्मादयो देवाः स्वस्वमावास मयासिषुः । पशुपतिर्देवैरपि (?) रहितः परमयोगिभिः सह विश्वकार्य विमुखस्थानंदरसिकसमाधिपर एव प्रशममध्यवासीत् ॥

Colophon

इति श्री कविवादिशेखरकृतौ शिवचरिते तृतीयोच्छ्वासः ॥

476

Sl. No: 27344 **शिष्टभूषणम्** Ms. No: P. 1978

Beginning :

तन्मतानुवर्तिनां केषांचिदेषा चेष्टा वैदिकानां चेष्टा । पश्य —
मुञ्चन्तः पञ्चयज्ञान् द्रविडफणितिभिः मोहयन्तोऽनभिज्ञान्
निन्दन्तो हन्त यज्ञान् असकृदपि हरेर्वन्दनं वारयन्तः ।
लुम्पन्तः शुद्धचर्यां यतिमपि गृहिणो वन्दनं कारयन्तः
सद्वेषं धारयन्तः कति चिदविहितैरेव कालं क्षिपन्ति ॥

End :

स्वयं तरितुमक्षमः किमपरानसौ तारयेत्
इति स्वमवि × गणयन् धनानां ।
व्ययम् × डंगुरुरिति भ्रमाच्छ्रयति पुस्तकाडम्बरैः
बहूपकरणान्वितैः पृथु ×वता विग्रहैः ॥

Colophon :

— — —

477

Sl. No : 27346 लीलावतीसन्देशः Ms. No: C· 642

Beginning :

वंशस्ते मुरली तदस्तु भण भो गोत्रं फणीन्द्राचलो
मातार्द्धं जगतां त्रयस्य सविता वामेतरा दृग्मम ।
क्वास्ते ते शरणं त्वमेव सुमुखी चैवं हि पद्मावती
वाचा संमदयन् जयत्यनुकलं श्री श्रीनिवासो हरिः ॥
श्री श्रीनिवासो नाम वसुधाधिपः ॥

End :

अथ विविधप्रयत्नेन प्राप्तप्रबोधः पौरवृद्धैः समं संमन्त्र्य समं विभज्य पद्मावत्या सह भोगीन्द्राचलं प्रत्युदचलत् ॥

कण्ठे कण्ठीरवाख्यं प्रतिकलमधुरां बिभ्रतस्सू × चूडा
रत्नस्यान्तर्वसन् यः कलयति कवितां गद्यपद्यावबद्धाम् ।
तस्य श्री श्रीनिवासप्रभुवरचरिते वेङ्कटेशस्य काव्ये
पर्याप्तः शेषसारे कविमशकशिशोः पञ्चमोऽयं विलासः ॥

Colophon

इति श्रीमच्छलेषकाव्य पारावार पारगमन नौकायमान चरणाभिवन्दन कण्ठ कण्ठीरवाचार्यसूरिवरान्तेवास्यन्यतमस्य अक्लिष्टश्लिष्टरचनापटोः निजकीर्ति दम्बधवलितदिग्भित्तिर्वेंकटाचलनिवासि वेङ्कटक्ष्मापालाश्रितस्य देशिक चरण सरसीरुह समर्पित निजसुकृतस्य अप्रयासासादित साहित्यकलस्य कविमशक शिशोः भट्टवेङ्कटेशकृतिषु उत्तर श्रीनिवास विलासो नाम श्लेषोत्तरकाव्यबन्धः समाप्तः ॥

478

Sl No : 27355 यतिराजचरितम् Ms. No : B . 986/1

Beginning :

पुष्यत्सौरभपारिजातकुसुमद्रास्तोरणस्त्रग्विणीं
यामेव प्रतिबिम्बितां जलनिधौ यामाशशङ्क जनः ॥

साकं निष्प्रतिमप्रतापगरिमभ्राजिष्णुभिर्वृष्णिभिः

श्रीकृष्णः ससुखं सगर्भ्यसहितस्तामध्यवात्सीत्पुरीम् ।

End :

विप्राशीर्वचनप्रहृष्टहृदयः कृष्णः समं जिष्णुना

कीर्त्या कार्तिकचन्द्रिकाधवलया भूमण्डलं मण्डयन् ॥

इत्थं भक्तविधेयतामतिजगल्लीलागिराबोधयन्

अध्यास्त स्वपुरीं पुरन्दरपुरीवन्द्यां जनान्नन्दयन् ॥

Coloph on:

इति अश्विनीयुवराजरचितः सन्तानगोपालप्रबन्धः समाप्तः ॥

479

Sl. No : 27362 समरपुङ्गचम्पूः Ms. No : P. 3396

Beginning :

श्रियं स पुष्णातु वृषध्वजो मे

जिगीषतो यस्य पुरानुपूर्वीम् ।

चक्रीभवद्भूधरचापसङ्गी

बाणोऽपि चक्री भवति × जैत्रः ॥

अस्ति समस्तविध्यण्डरञ्जनोच्चण्डताण्डवो + वटवनाभिधाना राजधानी।

End :

× श्चक्रसरोवगाहनियमैरश्रान्तयात्राक्रमैः

अस्तोकद्विजसौहितीविरचनैरावश्यकैरध्वरैः ।

विद्याव्याकरणैश्च शिष्यसदसे विश्वेशमाराधयन्

काश्यामास्त कलत्रसूनुसहितः कल्याणसंवृद्धये ॥

वाधूलान्वयपावनाय गिरिशव्यासक्तचेतःस्पृशे

विद्याशीलविनीतपौरुषतपोविश्राणनासङ्गिने ।

अन्यस्त्रैणपराङ्मुखाय करुणामार्तेषु सम्बिभ्रते

मूर्ध्ना सन्नतिम × जाय महते मोदा × कर्ष हे ॥

Colophon :

इति समरपुङ्गवदीक्षितस्य कृतौ चम्पूकाव्येऽष्टमाश्वासः ॥

480

Sl. No : 27368 सीताविजयचम्पूः Ms. No : A. 699

Beginning :

तेजो वाजिमुखं करोतु + प्रभं चिन्मयम् ॥
वेदान्तरामानुजनामधेयो वेदान्तविद्वज्जनपादरेणुः ।
सीताविजयाभिख्यं कर्तुं चम्पूप्रबन्धमिच्छामि—

End :

राजन्वानेष देशो भवतु यतिपतेः वर्धतां लोकमान्या +
वैष्णवश्रीरपि चिरसुखिनः सन्तु सन्तो महान्तः ॥

Colophon

इति घण्टावतारविरचिते चम्पूसीताविजये षष्ठः स्तबकः ॥

481

Sl. No : 27369 आञ्जनेयविजयचम्पूः Ms. No : P. 2791

Beginning :

आशेषार्चितपदपङ्कजातयुग्मं
कीशाधीश्वरहितदायिसत्कटाक्षम् ।
धीशालिस्तुतमरविन्दपत्रनेत्रं
श्रीसीतारमणमुपाश्रये नितान्तम् ॥

End:

इह × रघुवंशमण्डनः
सत्कृपारसधानपतिस्तदा ।
वायुजायघनसम्मुदाददन्-
नित्यतां स्वपदकञ्जभक्तताम् ॥

Colophon:

इति श्रीचण्डभानुकुलमण्डन राकाचन्द्र रामचन्द्र पदपयोजमदवदिन्दिरसमीर कुमारवरकरुणारस संपर्क निरर्गलदर्गलत्सहृदय हृदयानन्दवृन्दमन्दार कविता सुधामरापगासारेण श्रीतातयाचार्यकनकाम्बाभिख्याविख्यातदम्पतिहृदयपुण्डरिक चण्डभानुना श्रीमदहोबलाचार्यवुच्चमाम्बाहृदयानन्दसंन्दायकनन्दनेन श्रीलक्ष्मी नृसिंहकविना विरचिते हनुमद्विजयाभिख्ये चम्पूकाव्ये पञ्चमोल्लासः ॥

482

Sl. No : 27370 **हयवदनविजयचम्पूः** Ms. No: P. 770/1

Beginning :

लक्ष्मीं सिंहासनस्थां स्फटिकमणितिरस्कारधीरप्रतीको-
भक्ताभीष्टार्थधानव्रतसमदितस × बद्धपाणिः ।
तुङ्गैः पीयूषधाराविकिरणशिशिरैनिर्मचापाङ्गजालैः-
देवस्सम्मानयन्मामवतु हयमुखो देवतासार्वभौमः ॥

End:

अल्पैरप्यलमलमस्मदीयवचनैरेतैर सारै रवि-
प्रीतो मे कमलासखो मधुच्छेयांसि देयात्सदा ।
धानामुष्टिभिरेव तुष्टिमधिकं चेलायस (?)
श्रीमान् किं न ददौ श्रियं सुरपतिश्लाघाविशेषोचितम् ।।

Colophon:

श्रीमद्वाधूलवंशांबुधि + + कटाक्षौ ।
वेङ्कटराघवदासो वेङ्कटगुरुवर्यपादसक्तमनाः ।।
हयवदनविजयसंज्ञं काव्यं तनुते गद्यपद्यमयम् ।।
इति षष्ठोल्लासः ।।

483

Sl. No : 27373 **हरिगुणचम्पूः** Ms. No : P. 7019

Beginning :

कल्याण × प्रमूतं कलयतु ललितालापशैलेशबाला-
लीलाजालानुरक्ताशिशिरकरकलाभानुमाला जटाला ।
एषा शेषाहिभूषापरिकलितसुधापूरधारानुकारा.
भद्रा मुद्राविनिद्रा पुरहरणविधौ कापि कारुण्यपूर्णा ।।
अभिनवपदपूर्वः कालिदासः प्रगल्भ-
स्त्रिनयनदयितायाः प्रेम × भस्तृतीयः ।
विरचयति तयैवति पूरितः प्रेमपूर्वं (?)
हरिगुणपरिण × चारि चम्पूप्रबन्धम् ।।

End :

आश्चर्यमेतत् –
न चेदिभर्तुः श्रुतिमन्त्रजापि
शुभेत्तरकौतुकायरणाभृत् ।
द्विजनुनो लौकीकमन्त्रतोऽपि
सिद्धा भवत्यै वाशुभाय शौरेः ।। (?)

Colophon :

तस्यासौ नवकालिदासविदुषः काव्ये तृतीयः पुन-
श्चम्पूनामनि धीमतां कृतसमुल्लासो विलासोगतः।।

484

Sl. No : 27347 हरिवंशचम्पूः **Ms. No : B. 1132**

Beginning :

श्रियं नः पुष्णातु श्रितनिचयनीरेरुहरविः
पविः प्रत्यूहाद्रेः करिवरमणिः कश्चन घृणी ।
निरातङ्कोदञ्चत्कटनिकटखेलन्मधुकरी-
रवामोदश्लाघाचरणनिपुणो रूदरफणी ॥

End :

एवंविधानि चरितानि हरेर्विचित्रा-
ण्यन्यानि सन्ति शिशुपालवधादिकानि ।
सन्दर्शितान्यपि रणे कुरुपाण्डवानां
नान्यत्र नैव कथितानि पुरा श्रुतानि ।।
इत्युक्त्वा स पुनः प्राह सूतः तल्पेऽपि पौष्करे ।
विवाहे नारसिंहे च यद्वृत्तं वामनेऽखिलम् ॥

Colophon :

इति श्री भारद्वाजकुलजलधिचन्द्रेण दासप्पार्यपौत्रेण वेङ्कप्पार्यपुत्रेणवेङ्कोबा
चार्यशिष्येण वेङ्कटसूरिणा विरचितायां हरिवंशचम्प्वां दशमोवि लासः ।।

485

Sl. No : 27375 **अनङ्गजीवनम्** Ms. No : P. 182

Beginning :

कृष्णस्य व्रजयोषिदम्बरमुषः कुन्दद्रुमालाङ्कृतः
पायाद्वः प्रतिविम्बमम्बुनि धृतं भानोर्दुहित्रा चिरम् ।
व्यातेनुः पवनच्छालाद्विव × नायस्योपरि प्रस्फुर-
द्वेगोरिक्षप्तनितम्बबिम्बसुषुमं वीरायितं गोपिकाः ॥

End :

किमन्यदवशिष्यते । तथापीद— मस्तु । भरतवाक्यम्
भूयादियं विततभूरिकलाधरित्री
राजा चिरञ्जयतु रञ्जितसर्वलोकः ।
दारिद्र्यमुत्थितकवीन्द्रकुटुम्बवासं
लब्धास्पदं भवतु लोभगुणौ नृपाणाम् ॥
इति निष्क्रान्तास्सर्वे ।
बोधायश्रोत्तमश्रीवरदगुरुकवेर्वाजपेयाग्निचित्या-
सर्वस्तोमोऽतिरात्रप्रमुखमखशिखी श्रीनिवासार्यसूनुः ।
तारुण्ये चाग्निहोत्री दिशि विततयशास्तर्कतन्त्रस्वतन्त्रः
स्वाधीनो वाचि धीमान् वरदकविवरो भाणमेतं व्यतानीत् ॥

Colophon

इत्यात्रेयवरदकृतिरनङ्गजीवनं नाम भाणः संपूर्णः ॥

486

Sl. No : 27378 **अनङ्गमङ्गलम्** Ms. No : P. 13766/1

Beginning :

उत्सङ्गे विनिवेश्य साधमुचिते भूमिं निजप्रेयसीं
कस्तूरीमकरीं लिखन् कुचतटे गण्डस्थले च स्फुटम् ।
तस्याश्चारुतरा × रामितसुधाधारातिदसः परं
शृङ्गारैकनिधिस्स्वयं दिशतु नः श्रीमान्वराहः श्रियम् ॥
श्रीनिवासकविराजः । स बभाण हि भाणमसावन्वर्थमनङ्गमङ्गलं नाम ॥

End

तथापीदमस्तु भरतभारती-
फलतु भवतु पृथ्वी पार्थिवः पापहीनः
× × सज्जनानां सुतानाम् ।
भ्रमतु भुवनभागे पञ्चबाणीयबाणः
शमयतु दुरितम्मे सुषणधामा मुकुन्दः ॥

Colophon :

अनङ्गमङ्गलं सुम्पूर्णमू ॥

487

Sl. No : 27385 अनर्घराघवं Ms. No : P. 1690

Beginning :

निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्षणः
कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने ।
याभ्यामर्धविबोधमुग्ध × धुरश्रीरर्धनिद्रायितो
नाभीपल्लवपुण्डरीकमुकुळः कम्बोस्सपत्नीकृतः ॥

सू + स्मरणमभिनीय सोल्लासम्। अस्ति मौद्गल्यगोत्रसंभवस्य महाकवेर्भट्टश्रीवर्धमानतनू × तत्सुमतीहृदयानन्दनस्य मुरारेरभिनवमनर्घ-राघवं नाम नाटकम्॥

End :

देवस्यात्मभुवः कमण्डलुजलस्रोतांसि मन्दाकिनीं
गङ्गा भोगवतीमधावि तनुते यावत्त्रिलोकीमिमाम् ।
ता × शो रसायनमधुस्यन्दः कवीनामयं
जागर्तु श्रुतिशष्कुलीफलयितव्योमावगाही गुणः ॥
इति निष्क्रान्तास्सर्वे ॥

Colophon :

श्रीमन्मुरारिनामधेयबालवाल्मीकिकृते अनर्घराघवनामनाटके सप्तमोङ्कः ॥
समाप्तमिदं नाटकम् ॥

488

Sl. No : 27397 **अनर्घराघवव्याख्या** Ms. No : P; 2797

Beginning :

× य विज्ञामदायिने लोकसाक्षिणे ।
करुणामयवीक्षाय दक्षिणामूर्तये नमः ।। +
लक्ष्मीधरस्तदनुजो + सुधीः ।।
सन्यस्याजनि योगीन्द्री रामानन्दाश्रमाभिधः ।।
स करोति महायोगी मीमांसाद्वयपारगः ।
अनर्घराघवव्याख्यां प्रीतये विदुषां शुभाम् ॥

End :

इति हेतौ । निष्क्रान्तौ-निरगाताम् ।
'संसूच्य पात्रं निर्गच्छेत्सूत्रधारःसहेतरैः' इति वचनम् । पात्रं संसूच्य नटेन सह निर्गत इत्यर्थः । इति प्रस्तावनेति + प्रस्तूयतेः उपक्षिप्यते × × ति प्रस्तावना ।।

Colophon :

— —

489

Sl. No : 27400 **अनर्घराघवव्याख्या** Ms. No : P. 506

Beginning :

अन्योन्यव्यस्तसामान्यसमावेशनिदर्शनम् ।
अव्याजभक्तिसुलभमव्याद्वयमुखं महः ।।
ऐश्वर्येहा + । + सिद्धये ॥
व्युत्पन्नशब्दः प्रथितो यथा व्युत्पन्नतामगात् ।
सोऽयं हरिहरः प्राह टीकामानर्घराघवीम् ॥

End :

तज्जागर्तु चिरमविरामेण प्रकाशताम् ।
भारद्वाजो नृसिंहार्यसुतो हरिहरस्सुधीः ॥
सप्तमाङ्कं विवृतवान् मुरारिकृतनाटके ।

Colophon

— — — —

490

Sl. No : 27419 अभिज्ञानशाकुन्तलम् **Ms. No : P. 2016/1**

Beginning :

या सृष्टिःस्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुस्सर्वभूतप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वः ताभिरष्टाभिरीशः ।।

End :

तथाप्येतदस्तु । भरतवाक्यम्—
प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहता महीयताम् ।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥
इति निष्क्रान्ताः सर्वे ॥

Colophon :

इति सप्तमोऽङ्कः ॥

491

Sl. No : 27442 अभिज्ञानशाकुन्तलव्याख्या **Ms. No: P. 787**

Beginning :

वेदादीनां विशुद्धानां विद्यानां जन्महेतवे ।
पार्वतीपरतन्त्राय परस्मै वस्तुने नमः ।।
अत्र शाकुन्तलाख्ये नाटके कालिदासः प्रारीप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थमिष्टदेवतास्मरणपूर्वकमाशिषं प्रयुंक्ते । या सृष्टिरिति ।।

End :

आत्मभूः स्वयंभूः परमेश्वर इत्यर्थः । ममापि पुनर्भवं पुनर्जन्म क्षपयतु अपाकरोतु । अत्र भरतो नाट्याचार्यस्य परिसमाप्तत्वादनुकार्यत्वमुत्सृजेत्याशिषं प्रयुक्तवानित्यनुसन्धेयम् । अत्र शुभाशंसनाख्यप्रशस्तिर्नाम × ×

Colophon :

इति श्रीकाव्यवेमभूपालपतिविरचिते कुमारगिरिराजीये शाकुन्तल व्याख्याने सप्तमोऽङ्कः ॥

492

Sl. No : 27448 अभिज्ञानशकुन्तलव्याख्या Ms. No : P. 1450

Beginning :

लक्ष्मीर्मे सुतरां तनोतु मधुकृल्लक्ष्मीमुखाम्भोरुहो
भक्ताभीष्टवरप्रदाननिपुणः श्रीवेङ्कटेशो विभुः ।
लीलापङ्कजमध्यगं मधुकरं संबन्धुमङ्के स्थिता
नेत्रं श्रीर्विदधाति यस्य कुतुकात्सव्येतरं पाणिना ॥

अपि च—

पायाद्वो वेङ्कटाद्रीशवक्षःश्रितरमास्मितम् ।
भातीव चित्तसंसक्त शौरिवामाक्षिचन्द्रिका ॥

End :

उद्घात्याद्रिकषोडशाङ्गसहिता प्रस्तावनाथोचतु-
ष्पथ्यङ्गान्वितपञ्चसन्धिक्रमतो पञ्चाप्यवस्थास्तथा ।
विष्कम्भादिमपश्चिमं यदुदिते वस्तुत्रयं नाटके
षट्त्रिंशत्समलङ्क्रियाश्च स विप्रौढिः समढौकत ॥

Colophon :

इति श्रीरमणवेङ्कटाचलेश्वर पादारविन्द पूजक वैखानसमूलतिलककौशिक गोत्र श्रीवेङ्कटभट्टेतिगोत्रक्रमागतभट्टविरुदश्रीतम्मयाचार्यस्य पुत्रेण ध्वनि प्रस्थान परमाचार्याष्टभाषाचक्रवर्ति श्रीनिवासाचार्येण विरचितायां शाकुन्तल व्याख्यायां सप्तमोऽङ्कः ॥

493

Sl. No ; 27457 अमृतमन्थननाटकम् Ms. No : P. 9561

Beginning :

विश्वानुग्रहधूर्वहस्य सततं विद्यानिधेः पूर्णया
भक्त्या वेङ्कटदेशिकस्य चरणौ ध्यायाम्यहं सद्गुरोः ।

ध्यानादेव ययोरनेकविबुधश्रेणीशिरोव्यापिनी
गङ्गाकर्णनमात्रतस्सुखकरी वाङ्मय्युदेति क्षणात् ॥ +
सू— आर्ये साम्प्रतमादिष्टोऽस्मि परिषदा अमृतमन्थनं नाम श्रीशैलवंश
मुक्तामणिनार्यवेङ्कटनाथेन कविकुलाकृतमपूर्वं नाटकमिदानीं प्रयोगतो दर्शनीयं ,

End :

तथापीदमस्तु । भरतवाक्यम् ॥
निजाः प्रजा इव नृपतिः प्रजा इमाः
महाभुजस्सुनययुतोऽभिरक्षतु ।
अयं चतुर्भुजविनिहितस्य दोर्भरः
चतुर्भुजस्सह रमतां श्रिया सह ॥

Colophon :

इति श्रीशैलपूर्णवंश्यतातसूरितनुजवेङ्कटनाथविरचितेऽस्मिन्नमृतमथनाख्ये नाटके पञ्चमोऽङ्कः । समाप्तममृतमथनं नाम नाटकम् ॥

Extra information :

श्रीमच्छ्रीशैलपूर्णान्वयजलधिविधोः राघवार्यस्य सूनुः
श्रीवासाख्यो हि धीमानलिखदिह महीशूरनाम्न्यां नगर्याम् ।
प्लावासाद्वाहाथमासासितगुरुदिनयुक्पाञ्चयोपूर्वयामे
प्रीत्या स्वीयप्रशस्तममृतमथनमिदं रूपतां पूर्वमेव ॥
इत्येकः श्लोको वर्तते ॥

494

Sl. No : 27460 **अमृतमथननाटकम्** **Ms. No: P. 2139/1**

Beginning :

श्रीमद्वानुकुलावतंसचरणाम्भोजद्वयोपासन
प्राप्तानन्यसमाननाथविभवा × यतिं देशिकम् ।
यः शोकार्णवमुत्ततार विजयं लेभेऽप्यसाधारणं
लक्ष्मीं कामपि सर्वलोकविनुतामासाद्य हर्षं ययौ ॥
आञ्जनेयविजयाभिनयदिदृक्षवः इमे सभ्या इति विभावयामि ॥
भाष्यकाराभिधो यः सादरं लालितो तेनेदं रचितं नाटकं नव × पा ॥

End :

तत्र—

पश्यन्त्यमून् कुसुमितान् क्वचित्क्वचिच्च
अश्यत्फलप्रकरकीर्णतलांस्तथान्यान् ।
फुल्लाम्बुजन्मनि × रुणि बरजः कदम्ब-   (?)
संवासिताश्च सरसीः मुदितश्च बाल ॥

तत्र—

शृङ्गाग्रभागचरदम्बुदशोभमानं ॥ ×

Colophon :

— — —

495

Sl. No : 27461 आदिमचक्रवर्तिचरितम् Ms. No : P. 9558

Beginning :

वन्दे वाचं जगद्वन्द्यां वाञ्छितार्थप्रदामहम् ।
करसन्दंशनिष्यन्दसुधादीधितिकन्दळाम् ॥

(नान्द्यन्ते सूत्रधारः)

सू— (स्मरणमभिनीय सानन्दम्)

आर्ये सम्यक् प्रबोधितोऽस्मि भवत्या । यन्मयानुशिष्टः कुशीलववर्गः । आर्ये वेङ्कटनाथ ग्रथितवस्तुकं प्रयोक्तव्यमिदानीमादिमचक्रवर्तिचरितम् । + ततः प्रविशति मृगयानस्थो राजा हरिश्चन्दः रथेन सूतश्च ॥

End :

रा— किमतः प्रियमस्ति यद्भवन्तस्सत्येनाराधिताः । तथापीदमस्तु । भरत वाक्यम् ॥

यथेप्सितं विसृजतु वारि वासवः
प्रजाः प्रजा इव जनकोऽवतु प्रभुः ।
गुणान्विता जयतु सरस्वती कवेः
उपास्यतां जननिवृत्तये हरिः ॥

इति निष्क्रान्तास्सर्वे ॥

Colophon :

आदिमचक्रवर्तिचरिते पञ्चमोऽङ्कः ॥

496

Sl. No : 27462 उन्मत्तराघवम् **Ms. No : P. 520/2**

Beginning :

कला चान्द्री शम्भोः प्रणयकलहप्रापितरुषः
प्रणामे पार्वत्या पदकमललाक्षापरिचिता ।
श्रियै भूयादस्या वदनशशिनः कोपकलुषात्
प्रसादेनारुण्यं विनिमयवशेनेव दधती ॥

नान्द्यन्ते सूत्रधारः । नेपथ्याभिमुखमवलोक्य ॥

आर्ये इतस्तावत् । + विद्यारण्यश्रीचरणारविन्दवन्दनमहोत्सवमिलितेन +
उन्मत्तराघवं नाम यत्प्रेक्षणिकमुक्तवान् ।
भास्करकृतिना मान्यः तत्त्वयाद्य निरूप्यताम् इति ॥

End :

अत्र– किं ते भूयः प्रियमुपकरोमि ।

रामः– इतः परं किं प्रियमस्ति । तथापीदमस्तु । भरतवाक्यम् ॥

समयविहितवर्षस्सस्यपूर्णा धरित्री
जरयतु जलदौघः प्रेरितो वासवेन ।
भवजलधिमध्ये मज्जतां सज्जनानां
भवतु तरणिरूपा सद्गतिः सज्जनानाम् ॥

इति निष्क्रान्तास्सर्वे ॥

Colophon :

समाप्तमिदं भास्करसूरिविरचितमुन्मत्तराघवं नाम प्रेक्षणिकम् ॥

497

Sl No 27474 उत्तररामचरितम् **Ms. No : P . 2106/3**

Beginning :

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।
वन्देमहि च तां वाणीं अमृतामात्मनः कलाम् ॥

नान्द्यन्ते सूत्रधारः । भगवतः कालप्रियनाथस्य यात्रायां आर्यमिश्रान् विज्ञापयामि ॥

End :

तथापीदमस्तु । भरतवाक्यम् —

पाप्मभ्यश्च पुनाति वर्धयति च श्रेयांसि चेयं कथा
माङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च ।
तामेतां प्रतिभावयन्त्वभिनयैः विन्यस्तरूपां बुधः
शब्दब्रह्मविदः कवेः परिणतां प्राज्ञस्य वाणीमिमाम् ॥

इति निष्क्रान्ताः सर्वे ।

Colophon :

इति सप्तमोङ्कः ॥

498

Sl No 27485 उत्तररामचरितव्याख्या Ms. No : P. 1235

Beginning :

पुरी भुवि महितायां भूमिसाराभिधायां
अधिभुवि गुमुनितीर्थोपान्तमारब्धरवे × ।
× × तळपङ्क्ववल्ली
जगदधिपतिसंज्ञद्वन्द्वमानन्दयन्नः ॥
ज्ञानं सार्वपथीनं चेत्तद्धेतुश्चेद्धयाननः ।
स चेद्धक्तपराधीनः तं विना कं व्रजाम्यहम् ॥
भूसारवास्तव्यो × × घवः ।
भवभूतिकृतिं हृद्यां व्याचक्षे करुणामयीम् ॥

End :

× गभीरत्वाद् स कश्चित्कथिता मया भवभूतेः ।
कवीन्द्रस्य क्व गम्भीरो गिरांभरः ॥
क्व मन्मतिरतिस्वल्पा सदयोऽत्र हयाननः ।
अनवरतभावनाभिर्योऽर्थः क्लेशेन मयालब्धः ।
तस्य प्रकाशिनीयं व्याख्या विदधातुकौतुकं सुधियाम् ॥

Colophon :

दाशरथिवंशजनुषो भूसारनिवासराघवार्यस्य उत्तररामचरितव्याख्यायां सप्तमोऽङ्कः × वङ्गरापरनामधेयेन विरचितोत्तररामचरितव्याख्यायां भवभूति तलस्पर्शिनीसमाख्यायां सप्तमोऽङ्कः ॥

499

Sl. No : 27487 उत्तररामचरितव्याख्या **Ms. No: P. 2104/1**

Beginning

नत्वा दूरीकृताघौघं लक्ष्मीचरणपङ्कजम् ।
उत्तरं रामचरितं मया व्याख्यायते लघु ।।

इदं कविभ्यः एतत्कविभ्यः । यद्वा पूर्वभ्यः ।। इदं नमोवाकं प्रशास्महे प्रकर्षेण वदामः ।।

End :

अनेन कविकल्पितमिति द्योतितं भवति । अभिनयैराङ्गिकसात्विकवाचिका हार्यैः विन्यस्तरूपां विन्यस्तदृशां रूपं दृश्यतयोच्यते । चकारः प्रत्येकं पुरुषार्थं मूलानि परिभावयन्तु अनुसन्दधतु ।।

Colophon

इति सप्तमोऽङ्कः ।।

500

Sl. No : 27491 उद्धतवृकोदरप्रेक्षणिकम् **Ms. No : SB. 263**

Beginning :

दोधूयन्तां दुरन्ता नश्चिन्ता आकण्ठदन्तिना ।
केनचिद्घोरसंसारवाराशिडडबाग्निना ।।
किञ्च — + + नान्द्यन्ते सूत्रधारः —
सर्वतोऽवलोक्य अलमलमधिकप्रसङ्गेनेति ।।

End :

प्रतिज्ञादुस्तरास्तीर्णः कृपातस्तव केशव ।
जयश्रीरपि राज्यश्रीर्लब्धा कीर्तिश्च दुर्लभा ।।
तथापीदमस्तु । भरतवाक्यम् —
धर्मात्मैष धरेशस्सन्तोषितसज्जनश्चिरं जयतु ।
समये वर्षत्विन्द्रस्साध्वी गुरुकरुणयास्तु मे बुद्धिः ।।
इति निष्कान्ताः सर्वे ।।

Colophon :

— — —

501

Sl. No : 27494 उर्वशीसार्वभौमहोमृगः **Ms. No : P. 2586/4**

Beginning :

जयति पतिरखिलजगतां जलदपतिरेष दशमुखारातिः।
वशमेत्य यस्य कीर्तिः वासव जगदलञ्चक्रे ॥

अपि च—

दशास्यतेजोवल + वीरवानरः ॥

End :

यः श्रीरामपुरीविलासवसती श्रीरामनामा विभुः
तस्यानुग्रहसंपदा विजयतां त्रैलोक्यनित्योत्सवः ।
यः साहित्यरमाविलासभवनं जीयाच्चिरायुः प्रभुः
यस्यौदार्यवाशत् भृशं विजयते लोकः सलोकोत्सवः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon :

इति ईहामृगः समाप्तः ॥

502

Sl. No : 27496 कन्दर्पदर्पणभाणः **Ms. No: C. 2221**

Beginning

यस्य घ्राणसुखाः शराः श्रुतिसुखा मौर्वी रसज्ञा प्रियं
कोदण्डं नयनोत्सवः प्रियसखः स्पर्शाभिनन्द्यो रथः ।
चेतः प्रीतिकरी जनित्रिजगती हृद्यं च बाह्वोर्बलं
सोऽयं पञ्चशरस्तनोतु भवतां शृङ्गारमव्याहतम् ॥

अपि च—

नृत्यत्कर्ण विभूषणं—

End

मर्यादाचरणं जनस्य महतो वर्णक्रमे वर्तताम्
सस्यैः पूर्णरसादिभिः समधिका सर्वंसहा जायताम् ।

आदेशो भुवनत्रये रतिपतेरव्याहतो वर्धतां
चित्ते पुण्यवतां शिवस्य चरणद्वंद्वं परिस्पन्दताम् ॥

इति निष्क्रान्तः॥

Colophon :

इति अभिनवकालिदाससूनोः श्रीकण्ठस्य कृतिः कन्दर्पदर्पणो नाम भाणः संपूर्णः ॥

503

Sl. No : 27497 कंसान्तकनाटकम् **Ms. No : C. 1987**

Beginning :

यो ब्रह्मादिभिरर्थितः सुरगणैः भूभारभूतान् खलान्
कंसादीनसुरान्नृपाकृतिभृतो हन्तुं यदोरन्वये ।
देवक्यां वसुदेवतः समजनि प्राच्यामिवाहस्पतिः
विश्वोत्पत्यवनाप्ययादिविधिकृत् देयात्स सर्वेप्सितम् ॥

End :

आशिषं ददौ 'यथा किल'—
समग्रा श्रीर्यस्मिन् विलसति समग्रोऽपि हि × षः
समग्रं चैश्वर्यं विलसति समग्रं पृथुयशः ।
समग्रं वैराग्यं विलसति स विज्ञानमतुलं
श्रियः कान्तो देयात् अखिलपुरुषार्थान् स भगवान् ॥
॥ इत्याशिषो दत्वा ते सर्वे निष्क्रान्ताः ॥

Colophon :

इति श्री लक्ष्मीनृसिंहसूनुना रचितं इति श्रीनृहरिसूनुः रम्यम् ॥

इति श्रीकंसान्तकाभिधे नाटके पञ्चमोऽङ्कः समाप्तमभवत् ॥

यादृशं + न विद्यते । अदृष्टभावात् + परमेश्वरः ॥

504

Sl. No : 27501 **कमलिनीकलहंसम्** Ms. No : P. 7631

Beginning :

संसक्तानिव पातुमौपनिषदव्याहारमाध्वीरसा-
नुन्मार्ष्टुं व्रजसुन्दरीकुचतटीपाटीररेणूनिव ।
उन्मीलन्मुरलीनिनादबहुलामोदोपसीदद्भ्रुवी
जिह्वालीढमलीकवल्लवशिशोः पादाम्बुजं पातु नः ॥
पुनरपि निजनाथ × क्त्रा भवानी ॥

शङ्करः सकलसत्कविमान्यः

सहितः सरसकाव्यविशारः ।

शारदातिलकमुज्वलशय्या-

कोमलं खलु बभाण स भाणः ॥

End :

लक्ष्मीपयोधरधराधरशृङ्गसङ्ग

संपूर्णसंभृतरतेः पुरुषोत्तमस्य ।

भक्तिप्रियस्य निरपायकृपाविशेषात्
आचन्द्रतारकमियं कृतिरत्र जीयात् ॥
इति निष्क्रान्तः ।

Colophon :

इति श्रीशङ्कराख्येन कविना रचितोऽधुना ।
शारदातिलकं नाम भाणः पारमजीगमत् ॥

587

Sl. No : 27838 शारदातिऽकम् Ms. No : B. 4606

Beginning :

जयति नवदुकूले केलिकालेऽपनीते
झटिति जघनभागे छादिते चन्द्रपादैः ।
तदपनयनबुद्ध्या तत्र लीलाग्रहस्ते
पुनरपि निजबाधे सेरवक्त्रा भवानी ॥

End :

इति श्री शङ्कराख्येन कविना रचिताधुना ।
शारदातिलकं नाम भाणः पारमजीगमत् ॥
सुधियः कृतिमालोक्य सारासारौ विचार्य च ।
नन्दन्तु वा विनिन्दन्तु कवयो हि निरङ्कुशाः ॥
सुवर्णमालिकानीकसाक्त × यं कृतिः ।
विदुषां कण्ठपालीषु केलिभूषायतां भुवि ॥

Colophon :

इति श्रीशङ्करकविविरचितशाङ्करभाणः समाप्तः ॥

588

Sl. No : 27839 शुकाभिपतनम् Ms. No: B. 1196/1

Beginning :

+ न्दत्रीं वसुधात्तधरेन्द्रतनयां वार्धेश्च विभ्रत्सुतं
त्रै + सोवहितोऽयं न वदने वामाध्वके वक्षसि ।
लोकानां तनुते त्रिमूर्तिरमलस्वर्गापवर्गस्थितिं
माभूवन्मम तत्पदप्रवणिनो मातुः पयःपीतयः ॥

आर्यं किं नु स्मरत्यत्र भवान् + शुकाभिपतनं नाम श्री वेङ्कटनाथकवि
× यित्वस्तुकमभिनवं —

End :

पश्यन्तोरनयोर्दु × शङ्केति प्राप्तानुनीचोच्चता
म × स्सरितामिवात्र पुरुषा × व्ययोपार्जनैः ।
वाताधूतपलाशपल्लवमिव द्रा × च्चितोदञ्चितं
बिभ्राणा नियतेर्बला ह्रहुविधैस्तापैरुपेतं वपुः ॥

Colophon :

तृतीयाङ्कसमापनवाक्यं यथा— इति तृतीयोऽङ्कः ॥

589

Sl. No : 27840 शिवनाटकम् Ms. No : C. 4652/4

Beginning :

अस्ति समस्तप्रशस्तगुणस्तोमसीमा भूपाललल।मायितो वेङ्कटेशनामा-क्रतुपुरदेशाधीश इति प्रथितः । तेनेदं शिवनाटकं प्रतापरुद्रीयनाटकं अनुसृत्य विरच्यते ॥

End :

तदा ब्रह्मविष्णुमहेश्वराः एतन्नाटकस्याध्येतारः आयुष्मन्तः अरोग्य-वन्तो धनवन्तो बहुपुत्रवन्तः कीर्तिवन्तः परमपुरुषार्थवन्तो भूयासुरित्या-शिषो दत्वा सपरिवाराः सर्वे निष्क्रान्ताः ॥

Colophon :

इति शिवनाटके पञ्चमोऽङ्कः समाप्तः ॥

इति शिवनाटके क्रतुपुराधीश वेङ्कटवाजपेयी महाकविविरचिते-पञ्चमोऽङ्कः ।। शिवनाटकं समाप्तम् ।।

590

Sl. No : 27841 भृङ्गारकोशभाणः Ms. No : P. 3470/2

Beginning :

इतश्चेदानीं —
मुवक्ता वेणु × रममीदारे ×
रूणातपस्पृशि × शनैरलीय पारावताः ।

पक्षाणां हितसत्क्रियां विदधतः तुण्डैर्व्यलत्कन्धरैः
दंपत्योरिव वीक्षितुं रतिविधिं ऐ × रमा तन्वते ॥

End :

भरतवाक्यम्—
अनितररसाधीनं भूयादनङ्गवशंवदं
हृदयसम × शृङ्गाराद्वैतशृङ्खालितं नृणाम् ॥
शशधरकलावतंसं श्यामारुणं करुणालयं
शमयतु पुनर्जन्मक्लेशं ममापि परं महः ॥

Colophon :

इति अभिनवकाळिदासस्य कृतिषु शृङ्गारकोशं नाम भाणस्संपूर्णः ॥

591

Sl No 27842 शृङ्गारतरङ्गिणी Ms. No :P. 124/1

Beginning :

श्रीस्तनस्तवकन्यस्तकस्तूर्यध्यस्तकौस्तुभम् ।
निस्तुलोरस्थलं शस्तं वस्तु स्वस्तिकृदस्तु नः ॥ +
ज्योतिर्भूतप्रतापो विमलगुणनिधिः श्रीनिवासार्थवर्यः । +
निर्वाहकृज्जयति सर्वार्थदोऽण्णयगुरुः ।

तत्तनयेन समधिगतनयेन तच्चरण परिचरणैकभूम्ना स्वाग्रजश्रीनिवा तातचार्यकरुणापरिणाहलब्धपूर्वतन्त्रमहिम्ना वेङ्कटाचार्यनाम्ना + विरचितमस्ति समस्तसुगुणमणिपेटकं शृङ्गारतरङ्गिणीति नाटकम् ॥

End :

तदेहि त्वरितमिति । सत्य । – सख्यः इमां रत्नपर्यङ्किकां तत्र सज्जीकुरुत । सख्यः तहेति यथोचितमाचरन्ति । इति निष्क्रान्तास्सर्वे ।

Colophon :

इति श्रीशैलवंशसुत्राम्बुधिपूर्णचन्द्रस्य प्रचण्डोद्दण्डपण्डिताखण्डलमण्डली-सार्वभौमस्याभिनवकविताकिंकण्ठीरवस्य सर्वतन्त्रस्वतन्त्रशिरोमणेर्वेङ्कटाचार्य-वर्यस्य कृतौ शृङ्गारतरङ्गिणीनाम्नि नाटके पञ्चमोऽङ्कः ॥

प्रज्ञावासुकिवेष्टिताचलमनस्संक्षुब्धविद्यापयः-
पारावारसमुत्थिता सुमनसामानन्दसन्दायिनी ।
या शृङ्गारतरङ्गिणीति विदिता लक्ष्मीरियं शाश्वती
दत्ता तिर्मलवेंकटार्यकृतिना शेषाद्रिभूषामणेः ॥

592

Sl. No : 27851 — शृङ्गारतिलकभाणः — Ms. No : P. 3995/3

Beginning :

पाणिग्रहावसर एव दृढोपगूढा
रागस्पृशो रघुपतेर्नयनाञ्चलेन ।
लज्जावशात्परवधूरिव संकुचन्ति
× तुरस्तु विभूतये नः ॥ +
स एव सरसः कविर्जयतु रामभद्रस्सुधीः ॥

End :

तथापीदमस्तु । भरतवाक्यम् —
आचन्द्रार्कमिदं भवेदविरलं गोब्राह्मणेभ्यश्चिरं
भूरस्त्वागमवृद्धसेविभिरियं राजन्वती राजभिः ।
लाल्यन्तां सरसोक्तयश्च कवयः शश्वद्रसज्ञैर्मुदा
स्यादेतस्य कवेश्च भक्तिरचला देवे रघूणां वरे ॥
इति निष्क्रान्तास्सर्वे ॥

Colophon :

इति कौण्डिन्यकुलमण्डनरामभद्रविरचितशृङ्गारतिलको नाम भाणस्संपूर्णः ॥

593

Sl. No : 27852 — शृङ्गारभूषणभाणः — Ms. No: P. 3470/1

Beginning :

मैत्रीं येन मनोभवो विरचयन् विश्वं जयत्यञ्जसा
तेनोद्दीपनकारिणा विजयते शृङ्गारनामा रसः ।
रम्या यत्किरणश्चकोर + चन्द्रमाः ॥

अपिच— ताराजालक +

श्रीमान् वामनभट्टभाणसुकविः साहित्यचूडामणिः ।।

तेन महाकविना प्रणीतं शृङ्गारभूषणं नाम भाणं—

End :

भरतवाक्यम्—

वेधाविष्णुमहेश्वरप्रभृतिभिः संभाविता निर्जरैः

आज्ञाशम्बरशासनस्य महती लोकत्रये दीव्यति ।

सत्स्वन्येषु रसेषु वास्तुविजयी शृङ्गार एकोऽरसः

सन्नाहस्तनमङ्गलं मृगदृशां तारुण्यमुज्जृम्भताम् ॥

Colophon :

इति वामनभाणः समाप्तः ।।

594

Sl. No : 27857 शृङ्गारमञ्जरी **Ms. No : P. 10631/1**

Beginning :

गोपीनां जलकेलिमुक्तवसनान्यादाय कूले द्रुमे

लीनस्तद्बहिरेत्य पाणिकमलैः संवृण्वतीनां ह्रिया ।

गृहीतोन्नमितैर्भुजैरिति मनाग्विस्रंसमानाम्बर

ग्राहोऽक्षिप्तभुजोरुमूलमसकृत्पश्यन् हरिः पातु नः ॥

End :

तथापीदमस्तु भरतवाक्यम् ॥

शृङ्गागार एव रसतामुपयातु यूना-

माभोगतृप्तिरचितस्थितियौवनं स्यात् ।

अस्मादृशेषु विदितेऽपि महापराधे

कोपारुणेन निपतन्तु वधूकटाक्षाः ।।

इति निष्क्रान्तास्सर्वे ॥

Colophon :

समाप्तः शृङ्गारमञ्जरी नाम भाणः ।।

595

Sl. No : 27858 | श्रृङ्गारयोगकल्पद्रुमः | Ms. No : P. 4866/2

Beginning :

वात्सल्याद्युगपत्कपोलयुगलीमासन्नयोः चुम्बतोः
पित्रोरात्मभवस्य येन वदने नीतेन्यतः सज्जते ।
अन्योन्यं × तयोरभू × दनयोःसंसृष्टयोर्या क्रिया
तद्दर्शी करताडनैः प्रविलसन् लम्बोदरः पातु वः ॥

End :

इन्द्रोपेन्द्रविरिञ्चिचिन्तितपदः कन्दर्पदर्पापहा
कोऽस्यर्कद्युतिपुञ्जरञ्जिततनुः श्रीमद्विरूपाक्षराट् ।
श्रीयोगीन्द्रवृषप्रभुप्रभृतिनां × सद्मा सदा
दत्त्वा भक्तिविरक्तिचिद्भवसुखं पायदपायत् स वः ॥
रेणुकान्वयसम्भूतवीरणाराध्ययोगिना ।
अकारि शृङ्गारयोगकल्पद्रुमसमाहृतिः ॥

Colophon :

इती श्रीशृङ्गारयोगकल्पद्रुमे गोपालकृष्णस्य श्रीपरमेश्वरप्रसन्नता नाम तृतियोऽङ्कः ॥

596

Sl. No : 27853 | श्रृङ्गारभूषणभाणः | Ms. No : P. 4764

Beginning :

मृडाणी नेत्रनीलाब्जराकाचन्द्रनिभाननम् ।
प्रत्यूहगिरिदम्भोलीमीडे मुरा × ॥
लक्ष्मीनारायणाभिख्यस्सुकविर्विदितो बुधैः ।
विद्वन्मणिस्तस्य तनूज × श्रीकोण्डमा ×
× × वरगर्भजातः ×
वैधेयगोष्ठीविमुखान्तरङ्गो नारायणाख्यस्सुकविः श्रुतो नः ॥

End :

तथापिदमस्तु भरतवाक्यम् ।
धर्मेण भूपाः परिपान्तु पृथ्वीं
काले सुवृष्टिं विदधातु शक्रः ।
कविर्भवानी भवतात्कृतार्थः । × ×
शकवर्षचये पयोधिचक्षु
स्सगचन्द्रप्रमितेन उच्यतेति ।
अथ दुन्दुभिवत्सरे प्रणीता
कृतिरार्या रमणेऽर्पिता मयैषा ॥

Colophon :

इति नारायणविरचितोऽयं शृङ्गारविलसितं नाम भाणस्समाप्तः ॥

597

Sl. No : 27862 **शृङ्गारविलासभाणः** Ms. No : B. 1072

Beginning :

भगवान् । श्रीरङ्गनगरी राजधानीति । तत्कतमो महोत्सवः स्यात् ।
अधुना कृतमलं सन्देहेन ।
शीलितकोकिलगानो
विजितगन्धादिशीतलसमीरः ।
अंकुरितमारशौर्यो
हरति मनो हन्त माधवारम्भः ॥

End :

मन्दानिलेन मधुना रजनीविटेन
मैत्रीं समारचयतो मकरध्वजस्य ।
आज्ञाभिरुत्पलदशां सकलातिशायि
तारुण्यमस्तु तरुणैरुपभुज्यमानम् ॥

Colophon :

शृङ्गारविलासाख्यो भाणो विद्वद्भिरादृतः सर्वैः ।
आकल्पं भुवि जीयात् बालकविसाम्बशिवेन रचितोऽयम् ॥

598

Sl. No : 27863 श्रीनिवासदयाविलासः Ms. No: B. 1250

Beginning :

× × कल्य × ×

नान्द्यन्ते सूत्रधारः— आदिष्टोऽस्मि + पुरन्दरप्रमुखसुरासुरनिकर + शठवैरिणः वैशाखोत्सवसेवायै +

End :

महिम्नस्त्वानन्त्ये प्रतिहतगतौ जाग्रति विभोः ।

× गु अहो महाराजस्य विश्वविख्यातवीर्य × ॥

Colophon :

— — —

599

Sl. No : 27865 श्रीरङ्गराजचरितम् Ms. No : B. 3652

Beginning :

निखिलनिगमवेद्यं निर्मलानन्दमाद्यं

यदपि परममेयं यज्वभिस्सामगेयम् ।

तदिह जयतिरङ्गे तत्त्वमुत्तुङ्गशृङ्गे

वरगुणमणिनीवीं वक्षसाश्लिष्य देवीम् ॥

भगवतः श्रीरङ्गनाथस्य फाल्गुनोत्सवसंभवेन + + श्रीनिवासविबुध विरचितेन श्रीरङ्गराजचरितनाम्ना बाणव्यायोगानुकारिणा प्रबन्धेन—

End :

तथापीदमस्तु भरतभारती ।

निश्शङ्कं निचुळापुरीन्द्रतनयासंभोगचिह्नं वहन्

रङ्गेन्द्रः प्रणन कुपितां श्रीरङ्गलक्ष्मीं गतः ।

नुन्नस्तत्परिचारिकाभिरसकृन्नुत्या स नत्या रहो

गत्वा तां स्ववशं नयन् विजयते शृङ्गारिणामग्रणीः ॥

Colophon :

— — —

600

Sl. No : 27870 सङ्कल्पसूर्योदयव्याख्या Ms. No : P. 1410

Beginning :

यद्भक्तिप्रचयात्मके दिनमुखे दृष्टिक्षमः क्षेत्रिणः
क्षिप्रं संसृतिशर्वरीं क्षिपति यत्संकल्पसूर्योदयः ।
× × × ×
श्रीमानस्तु स मे समस्तदुरितेत्ताराय नारायणः ।।

End :

अङ्गीकुर्वन्स्वकलुषधियः नित्यमध्यत्मविद्यां
आद्यो धर्मः स्पृशतु वसुधामाशिषः पारवर्ती ।
देवः श्रीमान्निरवधिकदयासिन्धुरस्मिन्निबन्धे
वक्ता श्रोता वचनविषयः प्रीयतां वासुदेवः ॥

Colophon:

इति कवितार्किकसिंहस्य + कृतिषु संकल्पसूर्योदये दशमोऽङ्कः ॥
स्तोतुं निन्दितुं + + सततं भजामि ।।

601

No : 27879 सङ्कल्पसूर्योदयव्याख्या Ms. NO : P. 378

Begening :

श्रीशं श्रियं वेंकटदेशिकेन्द्रं
पराङ्कुशार्यं यमिनं प्रणम्य ।
अहोबलोऽयं विवृणोति विद्वान्
संकल्पसूर्योदयमत्रिवंश्यः ।।

इह खलु भगवान् कवितार्किककण्ठीरवसर्वतन्त्रस्वतन्त्र × ×
शिष्यानवलोक्य दयालुतया × अर्थजातं सुखेन प्रतिबोधयन्
नाटकं × × × ×

इत्यात्रेयगोत्रसम्भूतेन श्रीमदहोबलनाम्ना विदुषा विरचिते सङ्कल्पसूर्योदय
व्याख्याने प्रभाविलासाख्ये नवमोऽङ्कः ।

End :

एवं धर्मो मनुष्याणां यदात्मविनिवेदनम् । × ×

कोऽन्योर्थस्यावशिष्यत इति । अङ्ग × × मये किं पुनरात्मा वर्ण्यते । × × खलु युष्माकं मोक्षसिद्धिः । सकृदिति । समास + × येयमङ्गे भागवर्धये वश्यसत्य × मेरुराशन विरमति तत्र हेतुमाह विषमेति ।

Colophon :

— — —

602

Sl. No : 27882 सङ्कल्पसूर्योदयव्याख्या **Ms. No: P. 34333**

Beginning :

नमस्तुरङ्गवक्त्राय चण्डपाण्डित्यदायिने ।
खण्डितोद्दण्डमोहाय पुण्डरीकामलत्विषे ॥
नमस्तस्मै कस्मैचन भवतु निष्किञ्चनजन
स्वयंरक्षादीक्षासमधिकसमन्धानयकने ।
सुराधीशस्वैरक्षणकुपिशापा × धवधू
दृषत्तादुर्जातप्रशमदपदाम्भोजरजसे ॥

End :

अत्र विरक्तिविष्णुभक्त्यादिसहायगवेषणयत्नदर्शनात् संहाराख्यं प्रति मुखसन्धेरङ्गं निरुक्तं भवति । सहायानुवृत्तिवर्तनेन कथायावर्तनं संहारइति तल्लक्षणात् ॥

इति द्वितीयोऽङ्कः ॥

Colophon:

श्रीशैलराजगोपालसूनुना रङ्गसूरिणा ।
आश्विने सौम्यवर्षीये त्रयोदश्यां गुरौ तथा ।
संकल्पादित्योदयाख्या व्याख्या तु ग्रथिता मया ॥

603

Sl. No : 27884 सङ्कल्पसूर्योदयव्याख्या Ms. No : A. 834

Beginning :

तपस्विनीमिति । सर्वोच्छैदविषयकतपःशालिनीमित्यर्थः । तस्मादेव तद्वदनं प्रथमं कर्तव्यमिति हृदयम् । विप्रलम्भे नानाविधोपायैर्वञ्चयामीत्यर्थः ॥

End :

अयं प्रभुः कृपायत्त निरन्तरायविलासः भावनाश्रयोचितं रूपं परिकलय-तीत्यन्वयः पारितोषिकं परसन्तोषकवस्त्रभूषणाद्यलङ्कारम् ॥

Colophon :

इति श्रीसङ्कल्पसूर्योदव्याख्याने कमलामोदाख्याने शुभाश्रय निर्धारण रूपो नाम सप्तमोऽङ्कः ॥

604

Sl. No : 27885 सङ्कल्पसूर्योदयव्याख्या Ms. No: P. 1034

Beginning :

श्रीवेंकटाचार्यवर्यस्य पदपद्मप्रभावतः ।
श्रीमद्वेङ्कटनाथार्यरूपकं व्याकरोम्यहम् ॥
श्रीरंगराजदिव्याज्ञालब्धवेदाचार्यापरनामधेयः ।
परमात्मनि यो रक्तो विरक्तोऽपरमात्मनि ॥

End :

संस्कारशक्त्या पूर्वसंस्कारसामर्थ्येन प्रणिहितरुचिभेदं कृततच्द्रुचिविशेष विषयं रूपं दिव्यमङ्गलविग्रहं भावनालम्बनार्हं ध्यानाश्रययोग्यं य × यते × × × × × ×

Colophon :

इति यतिवरचरणसरोरुहभृङ्गायमाणश्रीवेङ्कटगुरुकृपालब्धश्रीभाष्याद्यन्वयेन श्रीवत्सकुलतिलक श्रीनिवासार्यावरजेन श्रीभाष्यनारायणसूरिणा विरचितासु कृतिषु संङ्कल्पसूर्योदयविवरणे सप्तमोऽङ्कः ॥

605

Sl. No : 27886 **संकल्पसूर्योदयव्याख्या** Ms. No : P. 2006

Beginning :

भगवन्तमिवानन्तकल्याणगुणसागरम् ।
वेदान्तदेशिकं नौमि वेङ्कटेशं गुरूत्तमम् ।। +
यत्र सर्वे गुणाः पूर्णा दोषो यत्र न कश्चन ।
व्याकुर्महे तं सङ्कल्पसूर्योदयमनुत्तमम् ।। +

इह ङ्कल्पसूर्योदये सकलशारीरकशास्त्रर्थः संगृहीतः । शारीरकशास्त्रार्थश्च पञ्चविधः ।

End :

साडम्बरो × न्तस्सारत्वेऽपि बहिस्ससम्भ्रमैः परैरितरैः किं प्रयोजनम् ?
श्रीमद्रामानुजोक्त्यमलसुरनदीप्लाविताशेषलोकः
विद्यासम्पन्निषद्याकविकथकघटामस्तकन्यस्तपादः ।
अव्याद्दिव्यैः प्रबन्धैः श्रुतिगहनगुणादीपमालासगन्धैः
वेदान्ताचार्यवर्यो गुणनिधिरिह मां सर्वतन्त्रस्वतन्त्रः ।।

Colophon :

सम्पूर्णा सङ्कल्पसूर्योदयव्याक्रिया ।।

606

Sl. No : 27899 **सट्टकम्** Ms. No : P. 1792

Beginning :

हृदि भवतु सरस्वत्याः कवयो नन्दन्तु व्यासादयः ।
अन्येषामपि परं प्रवर्ततां वाणी विदग्धप्रिया ।।
वैदर्भी तथा मागधी स्फुरतु नस्सा किञ्च पाञ्चालिका ।
रीतीर्विलिहन्तु काव्यकुशला ज्योत्स्नां चकोरा इव ।। +

सू – कः पुनस्तस्य कविः । + + +
सू— अये प्रश्नोत्तरमेतत् । (प्रकाशम्) अपि राजशेखरः ।
पा— स तस्य कविः ।

End :

अनुदिवसविस्फुरन्मनीषी
जनसकलगुणविनाशकरः ।
रिक्तत्वदावाग्निर्विरमतु
कमलाकटाक्षवर्षेण ॥

Colophon :

सट्टयं नाम नाटिका सम्पूर्णा ॥

607

Sl. No : 27900 — सत्यभामपरिणयम् — Ms. No : P. 9572

Beginning :

× चकुम्भमम्भृतलसत्पाटीरपंकैर्घनं
वक्षोजस्य विजृम्भितान्तरकृपापूरोर्मि फेनैरिव ।
× वंशवारिधिविधुः कृष्णो मघोंलीकृत
स्पर्धो नः कवितां करोतु सुलभां मद्राज्य × ॥ +
× भावनीयास्सभादः । + + अस्ति खलु सत्यभामापरिणयं
नाम नाटकं अपूर्वमभ्यस्यम् । + नन्वयमेव कृष्णराजसार्वं ×
यः पुनरेवं वर्ण्यते कविभिः ।

End :

सत्यभामा (त्वं) हं घि × रेंमिम एन्घ एन्घ ठादुहि अआणं राओ-
णिओ एदिळञ्चावुण बळवदी अण्णदो करिसदि (इत्युत्तिष्ठ × (इया-
नेव ग्रन्थ:)

Colophon :

इति तृतीयोऽङ्कः ॥ (२३ तमे पत्रे)

608

Sl. No : 27901 — सरसकविकुलानन्दभाणः — Ms. No: P. 545

Beginning

कल्य णं नितनोतु दारुकवने य मे प्रेयसि ।
वाचातीतमनोज मे भवकलालीलासु लोलश्शिवः ॥

प्रालेयाचल भागधेय + लया प्रेम्णाङ्कमालोढय
निर्व्याजप्रवहद्वया तरलया नित्यं समा × ॥
वाग्विजयते श्रीरामचन्द्रकविः ॥ +
तेन प्रणीततं सरसकविकुलानन्दनं नाम भाणमभिनीय—

End :

तथापीदमस्तु भरतवाक्यम् ॥
भवतु सकलसस्यैः भूरियं पूरिताशा
नृपतिरतिदयालुः पातु सानन्दमेनाम् ।
कृतिरियमपि लोके सर्वतः स्यप्रसिद्धा
गुरुचरणकटाक्षोव्यात्स्कविः पूर्णकामः ॥
इति निष्कान्तः ॥

Colophon :

सरसकविकुलानन्दं नाम भाणः सम्पूर्णः ॥

609

Sl. No : 27906 सारस्वतोल्लासभाणः Ms. No : B. 4987

Beginning :

वन्दे गिरिसुतागर्भशुक्तिमुक्तायितं महः ।
प्रत्यूहव्यूहवार्वाहगन्धवाहमरावहम् ॥
शिवसङ्गतसर्वमङ्गलो यदसि त्वं मङ्गलानिमे ।
अविभावितसर्वमङ्गलं न च याये भवदन्यदैवतम् ॥ + +
कृतवान्स्तत्तनूजोऽयं विद्वत्सन्दोहनन्दनीयोक्तिः ।
वेङ्कटरामकवीन्द्रो भाणं सारस्वतदर्शनम् ॥

End :

इदानीमिदमस्तु भरतवाक्यम् ।
शृङ्गारस्य सर × तन × शादुमालिङ्गितस्वां
गेशा × याततः किल तया तादात्म्यमासेदिवान् ।
सानन्दं सुखयत्वमन्दविभवश्रीचन्द्रचूडामणिः
सन्दोहं रसवेदिना हृदयानं × यिनाम् ॥
सर्वे भवन्तु साहित्यरसदुग्धपयोनिधौ ।
जलमानुषतादात्म्यं लोको भवा + ॥

Colophon :

इति श्रीमदक्षि × कुलललामेन तन्नि शास्त्रीति कैश्चिदाहूयमानेन वेङ्कटरामकविना विरचितस्सारस्वतोल्लास × ॥

610

Sl. No : 27908 साहितीसमुल्लासः Ms. No : B. 793

Beginning :

श्रेयश्शैशवमातनोतु भवतश्शैवाल × ललिता
क्षीणे गोलककोणघूर्णनदलत्कोणेसिमौलिस्थयोः ।
पित्रोरुत्सवकारिवारिधिकरव्युत्सेकलीलाकला
निर्णिक्ताण्डकटाहनीतजलज × व्यानाथि × ॥
विद्वद्रत्न स्तबकविक × भावसंपादकौर्कों
मुक्ताहारो मुखजनसदसां मुद्दुवेङ्कार्यनामा ॥
सूत्र— साहितीसमुल्लासो नाम ।

End :

तातयोस्सन्निधानादन्वेक्षक्या संभृतश्च प्रसादः । एव × नुग्राहात् । तथापीदमस्तु । भरतवाक्यम् —
पूर्वाचार्यानमितरतयस्सन्तुनिर्मत्सरेषु स्वे स्वे धर्मे भजतु च ॥

Colophon :

इति दशमोऽङ्कः समाप्तः ॥

611

Sl. No : 27914 सीताकल्याणवीथी Ms. No : B. 192/6

Beginning :

पातु श्रीरामचन्द्रप्रणतजनततिप्रौढसंपत्प्रदान-
प्राचुर्यौदार्यचर्याप्रकटितसुरभूजातविख्यातसान्द्रः ।
यस्मिन् शृङ्गारलीलाप्रकलिततनुलताभासमाने समाने
पर्यासीनाभिधानाविनितहृदया प्राप्तसौख्या न लक्ष्मीः ॥
अहो मम नैपुण्यं यज्ज्ञातं मया झडिति सीताकल्याणमिति ।
जगद्विख्यातबिरुदाङ्कमपि वेङ्कटार्यमधुना ज्ञातव्यमाकलयसि ॥

End :

तच्चापीदमस्तु । भरतवाक्यम् —

साहित्यसाहित्यवतां नराणां
दारिद्र्यविद्रावणमस्तु लोके ।
योऽयं प्रभुविद्वदनीभिः (?)
श्रीरस्य जय्याज्जगति प्रकामम् ॥

इति निष्क्रान्ताः सर्वे ।

Colophon :

वीथी संपूर्णा ॥

612

Sl. No : 27917 सुदर्शनसिद्धान्तभेरीनाटकम् Ms No : B. 402/2

Beginning :

चतुश्चात्वारिंशदर्थान् चरमे संप्रदर्शिनम् ।
श्रये श्रीमद्भाष्यकारं सुदर्शनजगद्गुरुम ॥

अनन्तोऽस्मानव्याद्युवतिवरणायेव कलितैः
त्रिलक्ष्याः सञ्चारैः जनितमपनेतुं श्रममिव ।
श्रितोऽब्धिं तत्कन्याकलितपदसंवाहनसुखा-
वगर्धोन्येषेऽभूदपि शयितवज्जाग्रदिव यः ॥

End :

इतिहासे कौरुजोऽद्रिरिति ह्यस्त्युत्तमो गिरिः ।
मतिमानत्र गायत्रीं प्रतीयात् कोऽप्यवन्ति भाक् ॥
इत्यवन्तीपतिसेवालोभकरवाहारश्च कारितः ।।
सू — अयमेवाद्वितीयो वा को वास्तु अ ×

Colophon :

—

613

Sl No : 27918 सुभद्रानाटिका Ms. No : P. 3999

Beginning :

अर्हन्तमतुल × तुवाप्य तपसामेकं फलं भूयसां
यो नैराश्यधनस्त्रयस्य जगतामभ्यर्हणायाः परम् ।

स्वीचक्रे सवनातिवर्तिविभवां रिद्धिश्रियं शाश्वती
मायस्तीर्थकृतां कृतिं स वृषभः श्रेयांसि पुष्णातु नः ॥

सूत्रः – आर्ये किमन्यत् ननु × × र स्वामिसूनोर्बद्धहस्तिमल्लस्य कृति नाटिका सुभद्रा ॥

End :

सर्वे ऊर्ध्वं पश्यन्ति । शमिः–
देवकिं ते भूयः मयैषा × —
भूयात्सतामकृत्रको गुणपक्षपातः
पात्रे धनानि धनिनो वितृजन्तु नित्यम् ।
भद्रं चिराय भवतः जिनशासनाय ।
नमिः– एवमस्तु । इति निष्क्रान्ताः सर्वे ॥

Colophon :

इति भाट्टरगोविन्दस्वामिनः सूनुना श्रीकुमारसत्यवाक्यदेवरवल्लभोदयभूषणा नामार्यमिश्राणामनुजेन कवेर्वर्धमानस्याग्रजेन कविना हस्तिमल्लेन विचितं सुभद्रा नाम नाटिका चतुर्थोऽङ्कः ॥

समाप्ता चेयं सुभद्रा नाम नाटिका ॥

614

Sl. No : 27919 सुभद्रापरिणयम् Ms. No : P. 2137

Beginning :

वन्दारौ नवरत्ननूत्नमकुटी बृन्दामरेन्द्रव्रते
मन्दाराप्तफलप्रवालललितौ मन्दाकिनीसंश्रितौ ।
मन्दाक्षेपमरन्दनीरजरुचा सन्दानिते सम्पदे
विन्दामो वयमिन्दिरेशचरणौ कन्दानमन्दश्रियाम् ॥

End :

अथापीदमस्तु भरतवाक्यम् ॥

सन्तस्सन्ततमन्त वदन्तरनुसन्धायासुरध्वंसिनं
सन्तुष्टा भुवि सन्तु चिन्तितपुमर्थाह्या स्वकर्माश्रितान् ॥

किञ्चासज्जनमञ्जरीपरिमलस्तद्भञ्चनाचुञ्चरः
सञ्चारं रचयन्नयैव भुवने सम्प्रीणनैस्ते मयि ॥
इति परिक्रम्य निष्क्रान्ताः सर्वे ॥
षष्ठोऽङ्कः ॥

Colophon :

इति श्रीमत्पहंस परिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्र श्रीमद्विजयीन्द्रपूज्य चरणानामन्तेवासिना कविसार्वभौमशिखामणिना सुधीन्द्रयतीन्द्रेण विरचितं सुभद्रापरिणयं नाम सकलकविकुलतिलकहृदयङ्गं नवीनं नाटकं सम्पूर्णम् ॥
ॐ रामान × × × बालभावम् ॥

615

Sl. No : 27922 सेवन्तिकापरिणयम् Ms. No : P. 1636

Beginning :

पत्या केलिगृहं चिराय बहुभिः सान्त्वोक्तिभिः प्रापिता
भाषस्वेत्यनुयाचिना शुकवचः श्रुत्वा तदुक्तिभ्रमात् ।
किं किं व्यक्तमुदीरयेति जनितोत्कण्ठेन तेनार्थिता
साचीकृत्य मुखाम्बुजं दिशतु वो गौरी हसन्ती मुदम् ॥ +
नानादेशसमागतसुमनोविततेर्मनो विनोदयितुम् ।
तस्यैव तु प्रयोगः प्रभवति सेवन्तिकापरिणयस्य ॥

End :

तथापीदमस्तु भरतवाक्यम् ।
कविं सर्वे चैनं सततमनुगृह्णन्तु सुधियः
दयालुस्तानेतानवतु बसवक्ष्मापतिरसौ ।
तमेनं सर्वस्याः परिवृढमवन्या भगवती
विधत्तामश्रान्तं वसतु कृतिरेषा हृदि सताम् ॥
इति निष्क्रान्तास्सर्वे ॥

Colophon :

इति पञ्चमोऽङ्कः ॥

616

Sl. No : 27924 **सोमवल्लीयोगानन्दीयम्** **Ms. No : P. 2155/4**

Beginning :

पूर्वं पूरितरेतसः शिखिमुखे शार्वादिराद्यस्ततः
शौरेः स्त्रीवपुषः सरोजजनुषः पश्चात्सुताकामिनः ।
स्वाराजस्तदनन्तरं मुनिवधू राजादपि प्रोद्धत-
· श्चण्डांशोश्च × हतात्स दिशतु श्रेयांसि भव्यो रवः ॥

End :

तथापीदमस्तु भरतवाक्यम्—
कालाम्भोदा युवानो झळझळनिनदाः पूरिताशावकाशैः
पाथोरेतोऽभिवर्षैर्विदधतु वसुधामुल्लसत्सस्यगर्भाम् ।
श्वश्रूवध्वोरुरस्थो स्वयमुरसिमुखे प्याचरे सामरस्या
दीर्घायुर्देवराजोऽप्यवतु वसुमतीचक्रमाचन्द्रतारम् ॥

Colophon :

इति श्रीडिण्डमसार्वभौम श्रीमदरुणगिरिनाथकृतं सोमवल्लीयोगानन्दीयं नाम प्रहसनं समाप्तम् ॥

617

Sl. No : 27926 **हनुमन्नाटकम्** **Ms No : C. 1326/1**

Beginning :

कल्याणानां निधानं कलिमलमथनं पावनं पावनानां
पाथेयं यन्मुमुक्षोस्सपदि परपदप्राप्तये प्रस्थितस्य ।
विश्रामस्थानमेकं कविवरवचसां जीवनं सज्जनानां
बीजं धर्मद्रुमस्य प्रभवतु भक्तां भूतये रामनाम ॥

End :

विश्रान्तस्तत्र हर्षात्सपदि जलधिना प्रेरितो रत्ननाभो
मैनाकः काञ्चनाङ्गस्तुहिनगिरिसुतः प्राह दूरागतस्त्वम् ।
हं हो दूराध्वखेदं जहि मम शिखरे प्राप्य तस्येति वाचं
स्पृष्ट्वाङ्गुल्या तदग्रं भुजरयपवनापूर्तिताशां जगाम ॥

वेलातटे सालतमालमालां
विलोकमानस्सहसाञ्जनेयः ।
उल्लोलयन् वालधिवल्लिमुच्चैः
कल्लोलिनीवल्लभमुल्ललङ्घे ॥

Colophon:

इति श्रीहनुमन्नाटके वालिवधो नाम पञ्चमोऽङ्कः ॥

618

Sl. No : 27927 हनुमन्नाटकव्याख्या Ms. No : C. 1326/2

Beginning:

हृदये यत्प्रेरणया समुद्यतोऽहं विमूढतरबुद्धिः ।
तत्पदकमलं वन्दे गोकुलनाथस्य वेदादेः ॥
हनुमन्नाटकसागरशब्दार्थागाधतां सुबोधत्वम् ।
नेतुं कृतसाहसतां मम सुधियः क्षन्तुमर्हन्तु ॥

End:

आञ्जनेयः अञ्जनीपुत्रः हनुमान् सहसा अनायासेन कल्लोलिनीवल्लभं समुद्रमुल्ललङ्घे लङ्घितवान् । वालधिः पुच्छं तदेव वल्ली तामुल्लालयन् उच्चैः चालयन् ॥

Colophon:

इति श्रीमिश्रमोहनदासविरचितायां हनुमन्नाटकटीकायां वालिवधो नाम पञ्चमोऽङ्कः ॥

सुभाषितम्

619

Sl. No : 27932 — अष्टरत्नम् — Ms. No: P. 9291/2

Beginning :

अर्थो व्योम तथा नित्यं ब्रह्म भोगे शशिन्यपि ।
शशी निस्स्वश्च विज्ञेयमष्टरत्नमिदं क्रमात् ॥

End :

निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो
लक्षेशः क्षितिपालतां क्षितिपतिः चक्रेशतां वाञ्छति ।
चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्राह्मं पदं वाञ्छति
ब्रह्मा शैवपदं शिवो हरिपदं ह्याशावधिं को गतः ॥

Colophon:

इत्यष्टरत्नं समाप्तम् ॥

620

Sl. No : 27933 — आर्योल्लासः — Ms. No : C. 2829

Beginning :

एकमपि विश्वसृष्ट्यै मिथुनी भवति स्म यत्युग बहुधा ।
शिवनाम वाग्विभूत्यै कलये तदुपनिषदाशयं द्वन्द्वम् ॥

End :

आशाचलप्रकृतयो दधाति जरतोऽपि रागमतिमात्रम् ।
यास्यन्नपि सविताऽस्तं स्वासन्नानपि तनोति बहुरतान् ॥

Colophon :

— — —

621

Sl. No : 27934 | आर्यैकशती | Ms. No: C. 2005/1

Beginning :

प्रज्ञान्तरङ्गकलनात्सम्पदमतुलामुपैति विकलोऽपि ।
अगुणोऽप्यार्यानुसृतेः साम्राज्यं प्राप्य मोदते स्थाणुः ॥
बिभ्रति कलङ्किनोऽपि प्रायो महिमानमाश्रयान्महताम् ॥
दोषाकरोऽपि शम्भोरवलम्बाद्विन्दते द्विजेन्द्रपदम् ॥

End :

बलवद्दुर्गुणयोगः सुगुणस्य तिरो × तिसुस्फूर्तिम् ।
स्थगयति × सदृशमपि सौरभं × सङ्गः ॥

Colophon :

— — —

622

Sl. No : 27936 | उखापञ्चकम् | Ms. No : P. 4480/9

Beginning :

भ्रमरभ्ररादिगन्तराले
क्वचिदाश्वासितमीक्षितं श्रुतं वा ।
वद सत्युमपास्य पक्षपातं
यदि जातीकुसुमानि कारिपुष्पम ॥

End :

चरन्वनान्ते नवमञ्जरीषु
न षट्पदो गन्धफलीमजिघ्रत ।
सा किं न रम्या स च किं न रन्ता
बलीयसी केवलमीश्वरेच्छा ॥

Colophon :

इत्युखापञ्चकम् ॥

623

Sl. No : 27937 **कन्तुकसप्तकम्** **Ms. No : P. 4480/8**

Beginning :

एकोऽपि त्रय इव भाति कन्तुकोऽयं
कान्तायाः करतलरागरक्तरक्तः ।
भूमौ तच्चरणनखांशुगौरगौ ×
सद्य सं × न मरीचिनीलनीलः ॥

End :

इन्दीवर दलनेत्रानन्दं
मन्दं × कन्दुकं हन्ति ।
किन्तु मनो या पुंसामादाय
करे भिनत्ति भुवि नूनम् ॥

Colophon :

इति कन्तुकसप्तकम् ॥

624

Sl. No : 27938 **कर्णावतंसः** Ms. No ; C. 2493/1

Beginning :

कर्णाटदेशे च विराजमानः
कर्णामृतान् श्लोकचयान् विलोक्य ।
कर्णावतंसं कविपुङ्गवानां
कर्णावतंसं रचयाम्यहं तु ॥

End :

यश्शिन्धुपत्तनमठाधिपशिद्धमल्ल
वंशोद्भवः सुखविराण्मल्लार्यनामा ।
तस्याग्रजः प्रविलसद्गुरुपाददेवः
यस्तत्सुतेन रचितः सुरसप्रदोऽयम् ॥
गुरुपादस्य पुत्रेण मन्त्रनाम्ना विनिर्मितः ।
कर्णावतंसग्रन्थोऽयं गृह्यतां सकलैर्बुधैः ॥

Colophon :

कर्णावतंसः समाप्तः ॥

625

Sl. No : 27940 **कलिविडम्बनम्** Ms. No : C. 2805

Beginning :

कलिविडम्बनाख्यग्रन्थः प्रारभ्यते—

न भेतव्यं न बोद्धव्यं न श्राव्यं वादिनो वचः ।
झडिति प्रतिवक्तव्यं सभासु विजिगीषुभिः ॥
उच्चैरुद्घोष्यजेतव्यं मध्यस्थश्चेदपाण्डितः ॥
पण्डितः यदि तत्रैव पक्षपातोऽधिरोप्यताम् ॥

End :

कविना नीलकण्ठेन कलेरेतद्विडंबनम् ।
रचितं विदुषां प्रीत्यै राजस्थानानुमोदनम् ॥

Colophon :

इति कलिविडम्बनम् ॥

626

Sl. No :27943 **कविकर्णभूषणम्** Ms. No: C. 1733

Beginning

लक्ष्मीं तनोतु महतीं जगतां त्रयाणां
कात्यायनीरमणमौलिशशाङ्करेखा ।
मन्दाकिनीसलिलशीकरिणीर्विधत्ते
यासौ विभिन्ननवमौक्तिकशुक्तिशङ्कम् ॥

End :

श्रेयांसि सन्तुभू यांसि यावत्कल्पं पयोमुचाम् ।
विश्वेषामपभोगाय जीवनं यैरुपार्जितम् ॥

Colophon :

— — —

627

Sl. No : 27944 **कविकौमुदी** **Ms. No : P. 6581**

Beginning :

धन्वी धुन्वीत कोप्यस्सङ्गरे य × दस्युभिः ।
च × बभूव चापोऽपि तद्गुणोऽपि शरोऽपि च ॥
अहोबलसुधीगर्भसुधाम्बुधिसुधाकरः ।
कल्यलक्ष्मीनृसिंहाख्यः × कविकौमुदीम् ॥

End :

यूयं के सत्यलोके रचितवसतयः स्वर्धुनीवीचिमाला
लीलाखेलामराला द्रुहिगरथ गतेःसाधकाः के न यूयम् ।
का सभ्या धर्मप × सहरजकमुनेराश्रमे धर्मनिष्ठाः
पूराज्ञाः तीर्थयात्राकृतिभिरहरहः × गर्दभारसभ्याः ॥

Colophon :

इति प्रथमशतकम् ॥

628

Sl. No : 27946 **कविराक्षसम्** Ms. NO : P.5790/a

Begening :

सुपार्थिवैश्च पद्मैश्च सर्वतोमुखमूतिभिः ।
प्रसारिते मित्रकरे त्यज्यन्ते कोशसंपदः ॥
हतकामं चिरं लोके प्रभोर्यस्य वीक्षणात् ।
कुर्याद्यो निजया लक्ष्म्या स कामं परमः पुमान् ॥

End :

प्रसारार्थं सुखी × × ।
× सेन कृतोऽयं सूक्तिसंग्रहः ॥
कविराक्षससंज्ञे × × ।
× × शोपकृतये कृता ॥

Colophon :

इति सुजनपद्धतिस्समाप्ता ॥

629

Sl. No : 27952 चाटुश्लोकसुधाम्बुधिः Ms. No : P. 8448

Beginning :

श्रीकृष्णापुरचन्द्रदीक्षितसुतः श्रीरामनामा कवि-
× ष्पयय वरेण्यबुधविभोः प्रीत्यै लिखत्यादरात् ।
चाटुश्लोक सुधाम्बुधिः विरचितममलात्मजेनोज्वलं
पाटेरप्रभुणा प्रणम्य तरणिं विघ्नौ × धान्त्यै ॥

End :

आयातोऽसिमतण्डुलं परिजनाश्चान्यत्र संप्रेषिताः
सा याता भवनान्तरं वयमपि प्रायेणयात्रे मुखाः ।
अद्यैव प्रविशान्यदेवभवनं भोक्तुं यदी × वे ×
चेदस्स × रैव भरतस्तत्पाय × सङ्कल्पते ॥

Colophon :

— — —

630

Sl. No :27996 ज्ञानांकुशः Ms. NO : P. 5047/7

Begening :

× सत्वव × क × स्थितिः
दृढा मना ज्ञानसमाहितात्मनाम् ।
परापवादेष्वपि माहगात्मनां
नरस्समा × ज्ञाननयानयाङ्कुशम् ॥

End :

मन्निन्दया यदि जनः परितोषमेति
नन्वप्रयत्नजनितोऽयमनुग्रहो मे ।
श्रेयोऽर्थिनो हि पुरुषाः परतुष्टिहेतोः
दुःखार्जितान्यपि धनानि परित्यजन्ति ॥

Colophon :

इति ज्ञानाङ्कुशं समाप्तम् ॥

631

Sl. No:27997 **ताम्बूलपञ्चकम्** Ms. No: P. 4480/6

Beginning

कस्तूरिमोदपूगशकलं कर्पूरसम्मिश्रितम्
मुक्ताचूर्णसमेतमिन्दुकिरणः सच्छायवल्लीदलम् ।
तत्वादङ्गदनद्दवन्मतिकर, प्रस्तावनार्कल्पितं
कल्पाकल्पकलापिना प्रियतमे ताम्बूलमानीयताम् ॥

End :

वक्त्रश्री नटनोपदेशनिपुणं वाणिविलासक्रिया
वैदग्धीजननं विहाररचनावैरस्य निद्रावणम् ।
आमोदावहनं वसैव भजतां अन्तर्बहिः प्राणिनां
नयन्तामरसाताक्षियुगले ताम्बूलमानीयताम् ॥

Colophon :

इति ताम्बूलपञ्चकम् ॥

632

Sl. No: 28001 **तिम्मराजचाटुश्लोकाः** Ms. No: P. 10023/3

Beginning :

श्रीमन्निन्द्रपुरे हरौ शितिदशा श्रीरङ्गधामा पुमान् ।
ध्यात्वा तत्पदपङ्कजं न प्रवरो ? श्रीत × त्कपालकः ॥

End :

भूयात् सर्वसुखं सुराज्यलियं मद्दम्शजालाभतः ।
श्रीमत्कोण्टपिकोण्टभूपति सतोतिम्मक्षिति य नामको
ब्रह्माण्डोऽस्य सुतस्य सन्ततिमते । श्रिगैभलार्यस्य च ॥

Colophon :

— — —

633

Sl No : 28003 नगरवर्णनास्तनकम् Ms. No : C. 2900

Beginning :

धनाधिनाथप्रणयानुरोधात्
अभग्नकैलासनिकेतनस्य ।
देवस्य कल्पान्तकपालपाणेः
वाराणसी नाम पुरी पुरासीत् ॥

End :

वल्गन्मुहुर्जय जयेति वदद्भि रुच्चैः
पौरैर्वृतो विजयडिण्डिमचण्डनादः ।
मौहूर्तिकेन विधृतश्च कथं कथंचित्
खड्गी समापतति कश्चिदुदारवे × ॥

Colophon :

इति भट वर्णना ॥

634

Sl. No : 28004 नवरत्नम् Ms. No : P. 9291/1

Beginning :

धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्पकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥

End :

उत्खातान् प्रतिरोपयन् कुसुमितांश्चिन्वन् शिशून् वर्धयन्
प्रोत्तुङ्गान् नमयन् स × समुदयन् विश्लेषयन् संहतान् ।
तीव्रान् कण्टकिनो बहिर्नियमयन् ग्लानान् मुहुः सेचयन्
मालाकार इव प्रयोगनिपुणो राजा चिरं नन्दतु ॥

Colophon :

इति नवरत्नं समाप्तम् ॥

635

Sl. No : 28005 **नानार्थरत्नाकरः** **Ms. No: P. 7782**

Beginning:

गजगमन सिन्धु चन्द्रुडु
गजमनगा गङ्ग तुङ्ग गणपति शिवुडुन् ।
गजमुनगरे ललितं गेडु
गजमुनगा गजनु पामु कमलं बय्येन् ॥

End :

अममलमृताम्बु निधि लोनियमृत रसमु वेंडिचीरलपटकम्बुकुण्डगद् चेदुको नियदरो नागसिकर कां मेरुगुमेनु पुंनल्ल मेनुवाडु ।।

Colophon:

इति वेमलवाड भीमकवि विरचितं नानार्थरत्नाकरं संपूर्णम् ॥

636

Sl. No : 28006 **निर्मलञ्जनविरोधाभास** **Ms. No 5149/4**

Beginning :

जडजनचटुलोऽप्यभिमतरसिकः
स्मरपरवशगोऽप्यवहितहृदयः ।
निजसुखकार्यं पिनद्धपरेशः
चित्रचरित्रः श्रीनिधिरवतु ॥

End :

अपिपदसफलविरोधाभासां
श्रीपदपूर्वनिवासः कविराट् ।
अजगजगदद्भुतरीतिमिमां
बहुधा विबुधा ह्यवधारयतु ॥

Colophon :

— — —

637

Sl. No : 28007 नीतिशतकम् Ms. No: P. 629/

Beginning :

लक्ष्मीचरणलाक्षिकं लक्षणं शुभलक्षणम् ।
शेषक्षितिधराध्यक्षमम्बुजाक्षमुपास्महे ॥
सदाक्षिण्यं दृशा मिलममित्रं वामया दृशा ।
वशं नयति यः श्रीमान् सत्यं स पुरुषोत्तमः ॥

End :

वराहवपुषः श्रिया वसुधया लसद्रोचिषो
वृषाचलशिखाजुषः करगतारिभूरित्विषः ।
धनाधनरुचिद्विषः प्रचुरदानवारिश्लिषः
प्रभोश्शुभदमीक्षणं प्रियमनुक्षणं प्रापये ॥

Colophon :

इत्यण्णयार्यतनूज्जः कमलानिवासतातार्य सूनुरयमग्रजलब्धशास्त्रः ।
आचार्यदीक्षितकटाक्षधनी सुनीतिपद्यानि हृद्यवचनान्यचिन्मधूनि ॥
इति नीतिशतकं सम्पूर्णम् ॥

638

Sl. No : 28009 नीतिशतकम् Ms. No : C. 2873

Beginning :

दिगन्ते श्रूयन्ते मदमलिनगण्डा करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन् अनुपमशिखानां पुनरियं
नखनां पाण्डित्यं प्रकटययति कस्मिन् मृगपतिः ॥

End :

सदानमपि सा प्रयाता सवयोहस्तं सलीलमालम्ब्य ।
कबलितवती मनो मे कपित्थसारं करेणुरिव बाला ॥

Colophon :

इति पण्डितनारयजगन्नाथविरचितं नीतिशतकं समाप्तम् ॥

639

Sl. No : 28015 | **नीतिशतकम्** | **Ms. No : P. 3870/1**

Beginning :

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्यैकमानाय नमश्शान्ताय तेजसे ॥
बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥

End :

भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनः स्वजनतामुपयाति सर्वः ।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥
इति कर्मपद्धतिः ॥

Colophon :

— — —

640

Sl. No : 28026 | **नीतिशतकव्याख्या** | **Ms. No : P. 3870/2**

Beginning :

पञ्चायुधस्य परिपन्थ्यपि वाममर्धं
भक्तानुकम्पनतया हिमवद्दुहित्रे ।
योऽदात्तमीशमभिवाद्य ददामि टीकां
ग्रन्थस्य भर्तृहरिणः शतकत्रयस्य ॥
तत्र भवान् भर्तृहरिः × × नमस्करोति — दिगित्यादिना ।

End :

कृत्स्ना च भूः शून्या भवतीति । व्यतिरेकफलमपिज्ञयाम्
उक्तं च— पृथिव्यामन्नपूर्णायां वयमन्नस्य कांक्षिणः ।
सौमित्रे नूनमस्माभिः न ब्राह्मणमुखे हुतम् इति ॥

Colophon :

इति भर्तृहरिनीतिशतकं समाप्तम् ॥

641

Sl. No : 28043 **नीतिसप्तति:** Ms. No: P. 629/10

Beginning :

श्री कृष्ण एव वामोरु सर्वदेवशिरोमणिः ।
माधवो निर्जरोत्तंस इति मामाह राधिका ॥

End :

नाशोन्मुखानां नमति स्फुरत्यतनुमङ्गळे ।
× मुइन्द्रोणो धार्तराष्ट्रगुरुः कथम् ॥
जारस्य भार्या परगा भवतीति किमद्भुतम् ।
जारासक्ते तु शशिनि रोहिणी वृषभे रता ॥
कामुकीषु कुतः सत्यं मराळललिवालते ।
भ्रमरान् सर्वदाळीके लोलास्तव मृगेक्षणे ॥

Colophon :

— — —

642

Sl. No : 28405 **पञ्चरत्नम्** Ms. No : P. 9291/5

Beginning :

पञ्चरत्नम् ।
नागः पोतस्तथा वैद्यं शान्तिः शक्यं यथाक्रमम् ।
पञ्चरत्नमिदं प्रोक्तं विदुषामपि दुर्लभम् ॥
नागो भाति मदेन कं जलरुहैः पूर्णेन्दुना शर्वरी ॥

End :

शक्यं वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन × दण्डेन गोगर्दभौ ।
व्याधिर्वैद्यकभेषजैरनुदिनं मन्त्रप्रभावाद्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥

Colophon :

इति पञ्चरत्नं समाप्तम् ॥

643

Sl. No : 28046 पद्यामृतरङ्गिणि **Ms. No : A. 884**

Beginning :

पद्मिनीमूर्तिमत्प्रेमहेमशैलावहेलनम् ।
इन्द्रादिसुरसौभाग्यं धाम तत्कामयामहे ।।
तर्कादिपर्कसन्तप्तचेतोविश्रान्तिकारिणीम् ।
नानार्थसारिणीं कुर्मः पद्यामृततरङ्गिणीम् ।।

End :

काशीक्षेत्राधिवासी हृतकठिणतरारातिषड्वर्गदम्भः
श्रीमानप्पाजिभट्टः सुरयजनरतः शुद्धधीराविरासीत् ।
तत्सुतो भास्करः काश्यां हरिरित्यपराभिधः ।
अचीकरत्सतां तुष्ट्यै पद्यामृततरङ्गिणीम् ।।

Colophon :

इति श्रीमत्काश्यपान्वयस्तारकाग्निहोत्रीकुलायमान श्रीमदप्पाजिभट्टसूनु भास्करेण हरिरित्यपरशर्मणा विरचितायां पद्यामृततरङ्गिण्यां वैराग्यतरङ्गोऽष्टमः ।।

644

Sl. No : 28048 पानीयपञ्चकम् **Ms. No : P. 4480/7**

Beginning :

नादेयं नवमुद्धटप्रणिहितं सं × मर्को ×
+ त्रौ सम्परिमृष्टमिन्दुकिरणैः मन्दानिलान्दोलितम् ।
एलोशीरलवङ्गचन्दनसकृत्कर्पूरकस्तूरिका
पाटल्युत्पलकेतकीसुरभितं पानीयमानीयताम् ॥

End :

स्वादुस्वच्छसुशैत्यलाघवसुगन्धाढ्य गुणालङ्कृतं
त्वल्लावण्यरसामृतार्णवसमानीतं रसज्ञाप्रियम् ।
एलोशीरलवङ्गचन्दनसकृत्कपुरकस्तूरिका
पाटल्युत्पलकेतकीसुरभितं पानीयमानीयताम् ।।

645

Sl. No : 28049 प्रश्नाभिन्नोत्तरावली Ms. No : P. 5149/2

Beginning :

या स्याद्विशेषगणिता सकलैर्देशाधिपैश्च दिक्पतिभिः ।
तां श्रीनिवासमुहरथ प्रश्नाभिन्नोत्तरावलीं भणति ॥
मानायकः प्रभुस्सेव्यः कामनाग्लानिरूषताम् ॥

End :

पुनरावृत्तिविरहितं पदमक्षरलक्षदैर्नृपैर्भेजे ।
अथ च कविहृदयकुशलः तावान् पुरुषोत्तमोऽस्ति कीर्तयत्येकः ॥

Colophon :

— —

646

Sl. No : 28052 प्रश्नरभिन्नोत्तरावलीव्याख्या Ms. NO : P. 5149/3

Begening :

वाग्देव्याः पदयुगलं ध्यात्वा रङ्गाख्यसूरिणा ।
गुरुभा क्रियते व्याख्या प्रश्नाभिन्नोत्तरावलेः ॥
श्रीमत्यमरसिंहभूपतौ चोळराष्ट्रमनुशासति × × श्रीनिवासनामा
महाकविः प्रश्नाभिन्नोत्तरावलिसंज्ञिकां कृतिं × × आद्यश्लोके प्रतिपाद
यति— या स्यादिति ॥

End :

श्रीनिवासकविसार्वभौमवाक्
सर्वभूमिविदिता जयत्यसौ ।
यत्समं भणितुमुत्तरावलिं
नामराश्च पटवः क्व वामराः ॥

Colophon :

— — —

647

Sl. No : 28054 प्रश्नोत्तररत्नमालिका **Ms. No : C. 3557/4**

Beginning :

कः खलु नालंक्रियते दृष्टादृष्टार्थसाधने पटीयान् ।
अमुया कण्ठस्थितया प्रश्नोत्तररत्नमालिकया ॥
भगवन् किमुपादेयं गुरुवचनं हेयमपि च किमकार्यम् ।
को गुरुरधिगततत्त्वः सत्त्वहितायोद्यततः सततम् ॥

End :

कुलशीलनिष्प्रकम्पाः के कलिकालेऽपि सत्पुरुषाः ।
चिन्तामणिरिव दुर्लभमिह किं कथमेतच्चतुर्भद्रम् ॥
दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमायुतं शौर्यम् ॥
वित्तं त्यागसमेतं दुर्लभमेच्चतुर्भद्रम् ॥

Colophon :

इति श्रीमच्छङ्कराचार्यविरचिता प्रश्नोत्तररत्नमालिका समाप्ता ॥

648

Sl. No : 28056 प्रश्नोत्तरसुभाषितम् **Ms. No : P. 2869/2**

Beginning :

त्रिलोकामोदकः कश्चित् करे कलितमोदकः ।
स्वद्दानोदको देवः पातु विघ्नापनोदकः ॥
स्वीकर्तव्यमिदं सुज्ञैः प्रश्नोत्तरसुभाषितम् ।
क्रमैश्चतुर्भिस्सरसं श्रीनिवासो नियोक्ष्यति ॥

End :

द्वात्रिंशद्वाक्यमिता ग्रथितेयं श्रीनिवाससत्कविना ।
प्रीत्यै हरेर्विजयतां प्रश्नविलोमोत्तरावलिरपूर्वा ॥

Colophon :

इति श्रीनिवासविरचिते प्रश्नोत्तरसुभाषिते प्रश्नविलोमोत्तरावलिः चतुर्थः क्रमः ॥

649

Sl No : 28058 **प्रश्नोत्तरावलिः** Ms. No । A. 706/2

Beginning ।

अगच्छतो गच्छतो द्वे प्राप्ते द्वे नैव गच्छतः ।
गतौ तु नाप्नुतः पश्चात् श्रीनिवासकृतं महत् ॥
अगच्छतो गच्छतो द्वे सर्वेषां संपदापदौ ।
कीर्तिरप्यपकीर्तिश्च प्राप्ते द्वे नैव गच्छतः ॥

End :

द्वे जानन्नस्ति पानो वा भागधेयं कवेश्च हृत् ।
वस्तुद्वयं श्रितं ज्ञेयं ज्ञेयमित्थं मनीषिभिः ॥

Colophon ।

पञ्चाशत्प्रश्निकामेतां प्रस्तापविहितोत्तराम् ।
श्रीनिवासेन कथितां स्वीकुर्वन्तु मनीषिणः ॥

650

Sl. No : 28060 **प्रसङ्गरत्नावली** Ms. No : P. 2583/1

Beginning ।

यस्य संपुटिका नास्ति पिता यस्य न पण्डितः ।
सकृदुक्तं स गृह्णाति कुतस्तस्य सुभाषितम् ॥
बोद्धारो मत्सरग्रस्ता प्रभवः मस्यदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥

End ।

इति श्रीप्रसङ्गरत्नावल्यां सभास्तुतिपद्धतिः ।
शीतं वारयितुं गजाजिनमिदं किं ते क्षमं क्षौमव-
द्वैयाघ्रं किमु चर्म कोमलतरा शय्येव मोदायते ।
किं ते संप्रति कुङ्कुमैरिव मुदे भूत्याङ्गरागो भवे-
दित्यालीपरिहाससूक्तिभिरिमा जातस्मिता पातु वः ॥

651

Sl. No : 28063 प्रसङ्गाभरणम् Ms. No : P. 4860/8

Begin ning :

आर्या यस्य नटी प्रपञ्चरचना नाट्यं सहाया हरि-
ब्रह्माद्या यमिनां मनांसि परिषद् गीतः श्रुतीनां गणः ।
वाद्यं शास्त्रपरं परावनिका कल्पान्तराणि श्रियै
भूयाद्वो भुजगाधिराजकटकः सोऽयं पुराणो नटः ॥

End :

स्याद् राजा यदि सुन्दरो न हि यदि स्यात्सुन्दरो निर्गुणः
स्याच्चेत्पूर्णगुणो बलेन रहितः स्याच्चेद्बली कातरः ।
शूरश्चेद् विनयोज्झितः सविनयः स्याच्चेभदानोत्सुकः
स्याद्दानी यदि वात्र लोकविमुखः त्वं चेद् गुणानां निधिः ॥

Colophon :

— — —

652

Sl. No : 28070 प्रस्तावसुधाम्बुनिधिः Ms. No: P. 2869/1

Beginning :

पितरि सभूषणमाप्ते यं वहो भ्रातृसंनिधिं नयति ।
पद्वैवाम्बा यमवति तं वयमाराध्नुमः कमपि बालम् ॥
यः पार्थसेवितो देवो न सेवकमपार्थयेत् ।
तस्य दाशकरः सूनुः किमपाशकरो भवेत् ॥

End :

कविसार्वभौमकथिते प्रस्तावसुधाम्बुधौ प्रबन्धेऽस्मिन् ।
प्रीतिं कलयन्तु बुधाः कविराक्षसतोऽपि गुणविशेषश्चेत् ॥

Colophon :

इति श्रीनिवासविरचिते प्रस्तावसुधाम्बुधौ चतुर्थस्तरङ्गः ॥

653

Sl. No : 28074 **भिक्षुप्रश्नोत्तराष्टकम्** Ms. No : P. 5793/1

Beginning :

कस्त्वं रे शाब्दिकोऽहं भण सकलपथैर्लोकवेदप्रसिद्धै-
वाच्ये विष्णौ शिवोऽप्यर्हति गुणिनि परब्रह्मभावादुपास्तौ ।
णत्वं नारायणे चाग्रवणशरवणस्वर्णदीवच्छास्तां
शंभुर्नारायणाख्यः प्रलपसि विषमं काठकान्माठराच्च ॥

End :

कस्त्वं शैवोऽस्त्यन × तव किमभिमतं शम्भुविद्वेषनाशः
नाक्रोशश्चोपदेशाविषमभिदधतां वैष्णवं त्वं गुरुं नः ।
हित्वा स्वेष्टं विभूत्याभरणपथमहो तत्त्वमेवोपदिष्टं
यद्वा सर्वज्ञतायां × भसितशुचिवशाद्भक्त एषोऽपि दैत्यः ॥

Colophon :

— — —

654

Sl. No : 28141 **रत्नाकराधीश्वरशतकम्** Ms. No: P. 6088

Beginning

ಶ್ರೀರಾಗಂ ಸೆರಿಗುಪ್ಪುವಾಲೆ ಮಣಿಹಾರಂ ವಸ್ತ್ರಮಂಗಕ್ಕೆ ×
× × ಮಿವಾತ್ಮ ತತ್ವರುಚಿಬೋಧೋದ್ಯಚ್ಚರಿತ್ರಂಗಳೆ
ಶ್ರೀರತ್ನಂ ಮನಸಿಂಗೆ ಸಿಂಗರಮುಪಾದೇಯಂಗಳೆಂದಿನೆ ಶೃಂ
ಗಾರ ಶ್ರೀ ಕವಿಹಂಪರಾಜನೊಡೆಯ ರತ್ನಾಕರಾಧೀಶ್ವರ ॥

End :

ತ್ರಾಹಿ ತ್ರಿಭುವನೇಂದ್ರ ಮಸ್ತಕ ಮಣಿರ್ನೀರಾಜಿತಾಂಘ್ರಿ ದ್ವಯ
ತ್ರಾಹಿ ಶ್ರೀ ರಮಣೀ ನಟಂ ನಟನರಂಗ ಶ್ರೀಪದಾಬ್ಜೋದಯ
ತ್ರಾಹಿ ತ್ರಾಹಿ ಮಹೇಶ ಮಾಂ ಪುನರಪಿ ತ್ರಾಹಿ ತ್ರಿರತ್ನತ್ರಯ
ದೇಹಿ ತ್ವಂ ಮಮ ದೀಯತಾಂ ಜಯ ಜಯಾ ರತ್ನಾಕರಾಧೀಶ್ವರ ॥

Colophon :

ವೈರಾಗ್ಯ ನೀತಿಯಾತ್ಮ ವಿಚಾರಂಗಳ್ ಬಗೆದು ನೋಡೆ ರಾಜಿಸಿಗುಂ ಶೃಂಗಾರ ಕವಿಹಂಸರಾಜಂ ಪೂರಿಸಿದ ಸಪಾದ ಶತಕ ರತ್ನಾಕರದೊಳ್ ಶ್ರೀಮದ್ದೇವೇಂದ್ರಕೀರ್ತಿ ಯೋಗೀಶ್ವರ ಪಾದಾಂಭೋಜ ಭೃಂಗಾಯಮಾನ ಶೃಂಗಾರ ಕವಿ ಹಂಸರಾಜ ವಿರಚಿತಮಪ್ಪ ರತ್ನಾಕರಾಧೀಶ್ವರ ಸಪಾದ ಶತಕಂ ಸಮಾಪ್ತಂ ॥

655

Sl. No : 28142 विदग्धमुखमण्डनम् Ms. No : P. 7275/1

Beginning :

व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।
यत्र वाक्यान्तरादर्थः कथ्यते सा प्रहेळिका ॥

End :

पूर्णचन्द्रमुखी रम्या कामिनी निर्मलाम्बरा ।
करोति कस्य न स्वान्तमेकान्ते मदानातुरम् ॥
च्युतदन्ताक्षरम् ॥

Colophon :

इति श्रीधर्मदासकृते विदग्धमुखमण्डने चतुर्थः परिच्छेदः ॥

656

Sl. No : 28143 विदग्धमुखमण्डनम् Ms. No: P. 7275/1

Beginning

सिद्धौषधानि भवदुःखमहागदानां
पुण्यात्मनां परमकर्णरसायनानि ।
प्रक्षाळनैकसलिलानि मनोमलानां
शौद्धोदनेः प्रवचनानि चिरं जयन्ति ॥

End :

एतावतापि दिङ्मात्रं प्रश्नानां दर्शितं मया ।
येन येन हि माद्यन्ति तद्विदस्तत्तदूह्यताम् ॥

Colophon :

इति श्रीधर्मदासविरचिते विदग्धमुखमण्डने तृतीयः परिच्छेदः ॥

657

Sl. No : 28144 वैराग्यवर्णनम् Ms. No: P. 10060/2

Beginning :

न संसारोत्पन्नं चरितमनुपश्यामि कुशलं
विपाकः पुण्यानां जनयति भयं मे विमृशतः ॥

महद्भिः पुण्यौघैश्चिरपरिगृहीताश्च विषयाः
महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ।।

End ।

तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभिः
क्षुधार्तः सन् शालीन् कवलयति सस्यादिफलितान् ।
प्रदीप्ते कामाग्नौ सुदृढतरमालिङ्गति वधूं
प्रतीकारो व्याधेः सुखमिव विपर्यस्यति जनः ॥

Colophon :

— — —

658

Sl. No : 28150 वैराग्यशतकम् Ms. No : P. 1642/2

Beginning :

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ।।
बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ।।

End ।

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल
भ्रातर्व्योम निबद्ध एष भवतामन्ते प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतस्फारस्फुरन्निर्मलः
ज्ञानापास्तसमस्तमोहमहिमा लीये परे ब्रह्मणि ॥

Colophon :

इति श्री भर्तृहरियोगीन्द्रकृतौ सुभाषितरत्नावल्यां वैराग्यशतके अवधूत चर्या नाम दशमं दशकम् ॥

659

Sl. No : 28152 वैराग्यशतकम् Ms. No ; C. 3870/5

Beginning :

चूडोत्तंसितचन्द्रचारुकलिका चञ्चच्छिखाभासुरः
लीलादग्धविलोलकामशलभः श्रेयो दशाग्रे स्फुरन् ।

अन्तस्फूर्जदपारमोहतिमिर प्राग्भारमुच्चाटयन् ।
चेतस्सद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥

End :

मातर्मेदिनि तात मारुत सखे तेजस्सुबन्धो जल-
भ्रातर्व्योम निबद्ध एष भवतामन्त्ये भवत्वञ्जलिः ।
युष्मत्संगवशोपजात सुकृतोद्रेक स्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमालीये परे ब्रह्मणि ॥
इति अवधूतचर्यापद्धतिः—

Coophon :

— — —

660

Sl No : 28159 वैराग्यशतकव्याख्या Ms. No : P. 3870/6

Beginning :

चूडोत्तंसितेति ॥ योगिनामष्टाङ्गयोगवतां चेतसि मनस्येव सद्मनि गृहे ज्ञानप्रदीपः— ज्ञानप्रकाशकः हरः परमेश्वरः विजयते— सर्वोत्कर्षेण स्फुरति—

End :

बोधादेव तु कैवल्यमिति वदन्ति । अन्ये तु कर्मण एव मुक्तिरिति अपरे तु ज्ञानकर्मभ्यां समुच्चिताभ्यां कैवल्यमिति तत्तन्मतानुसारेण तत्र तात्पर्यं वाक्यस्य ॥

Colophon :

इति भर्तृहरिवैराग्यशतकं टीकासहितं समाप्तम् ॥

661

Sl. No : 28166 सुभाषितपद्धतिः Ms. No : C. 2894

Beginning :

यस्मिन् बुद्बुदशङ्का × इव बहु ब्रह्माण्डखण्डाः क्वचित्
भान्ति क्वापि च शीकरा इव विरिञ्चयाद्याः स्फुरन्ति भ्रमात् ।
चिद्रूपा लहरीव विश्वजननी शक्तिः कचिद्योतते
स्वानन्दामृतनिर्भरं शिवमहापाथो निधिं तन्नु सः ॥

End :

सम्मील्य लोचने नित्यं निद्रांध इव गच्छति ॥
धीरोनुरक्तो हस्तिन्यां जितोद्वेगो जितश्रमः ।
निर्भयो मन्दबुद्धिश्च भृतिमान् मन्द्र उच्यते ॥

Colophon :

इति शार्ङ्गधरविरचितायां पद्धत्यां नीतिपरिच्छेदः ॥ (१२३पत्रे)

662

Sl. No : 28172 शृङ्गारशतकम् Ms. No : P. 3870/3

Beginning :

शंभुस्वयंभुहरयो हरिणेक्षणानां
येनाक्रियन्त सततं गृहकुम्भदासाः ।
वाचामगोचरचरित्रपवित्रिताय
तस्मै नमो भगवते मकरध्वजाय ॥

End :

केशानाकुलयन् दृशो मुकुलयन् वासो बलादाक्षिपन्
आतन्वन् पुलकोद्गमं प्रकटयन् आवेगकम्पं शनैः ।
वारं वारमुदारसीत्कृतकृतो दन्तच्छदान् पीडयन्
प्रायश्शैशिर एष संप्रति मरुत्कांतासु कान्तायते ॥

Colophon : — — —

663

Sl No 28183 षड्रत्नम् Ms. No : P. 9291/4

Beginning :

शास्त्रं कोऽर्थास्तथामूर्खो दानं धर्मं तृणं तथा ।
लोभोऽप्यस्तीति विज्ञेयं क्रमात् षड्रत्नमीरिम् ॥
शास्त्रं सुचिन्तितमथोपरि चिन्तनीयम्
आराधितोऽपि नृपतिः परिशङ्कनीयः ।
अङ्के स्थितापि युवती परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ॥

End :

लोभोऽप्यस्ति गुणेन किं पिशुनता यद्यस्ति किं पातकैः
सौजन्यं यदि किं परैः सुमहिमा यद्यस्ति किं मण्डनैः ।
सत्यं चेत्तपसा च किं शुचिमनो यद्यस्ति तीर्थेन किं
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥

Colophon:

इति षड्रत्नं समाप्तम् ॥

664

Sl. No : 28184 सज्जनचित्तचरितम् **Ms. No: P. 896/2**

Beginning :

यस्य विज्ञानकोणस्थौ लोकालोकावणूपमौ ।
तस्मै वीरजिनेन्द्राय नमस्तत्पदलब्धये ॥
नत्वा वीरजिनं जगत्त्रयगुरुं मुक्तिश्रियो वल्लभं
पुष्पेषुक्षयनीतबाणनिवहं संसारदुःखापहम् ।
वक्ष्ये भव्यजनप्रबोधजननं ग्रन्थं समासादहं
नाम्ना सज्जनचित्तवल्लभमिमं शृण्वन्तु सन्तो जनाः ॥

End :

वृत्तैर्विंशतिभिश्चतुर्भिरधिकैः सल्लक्षणेनान्वितैः
ग्रन्थं सज्जनचित्तवल्लभमिमं श्रीमल्लिषेणोदितम् ।
श्रुत्वात्मेन्द्रियकुञ्जरान् समटतो रुन्धन्तु × दुर्जयान्
विद्वांसो विषयाटवीषु सततं संसारविच्छित्तये ॥

Colophon :

सज्जनचित्तवल्लभः समाप्तः ॥

665

Sl. No : 28185 सप्तरत्नम् **Ms. No : C. 9291/3**

Beginning :

वाञ्छा राजा तथा ज्ञेयो वृक्षं वित्तेन किं तथा ।
स्वरो धनेन किं ज्ञेयं सप्तरत्नमिदं क्रमात् ॥
वाञ्छा सज्जनसङ्गमे परिजने प्रीतिर्गुरौ नम्रता ॥

End :

धनेन किं यो न ददति याचके
बलेन किं यश्च रिपून् न बाधते ।
श्रुतेन किं यो न च धर्ममाचरेत्
किमात्मना यो न जितेन्द्रियो भवेत् ॥

Colophon :

इति सप्तरत्नं समाप्तम् ॥

666

Sl. No : 28186 सप्तशतीसारपद्यानि Ms. No : ; 6217/1a

Beginning :

तण्णामह जंस वच्छळच्छळं मुहं कोन्थुम्डम्मि सङ्कत्तम् ।
दीसइ म × हीणं ससि बिम्ब सूर बिम्बव्व ॥

End :

जो होइ रसाइ सजिसुविणं ठाणं विम्पुडइज्झाणि ।
कुतो सो होइ रसो मोहासाणि अणि छूणि ॥

Colophon :

इति श्रीसप्तशतीसारपद्यानि ॥

667

Sl. No : 28817 सप्तशती Ms. No : P. 6217/1b

Beginning :

तन्नमनं यस्य वक्षसि लक्ष्मीमुखं कौस्तुभे संक्रान्तम् ।
दृश्यते मृगपरिहीनं शशिबिम्बं सूर्यबिम्ब इव ॥

End :

अन्यमन्यं कुसुमरसं यत्किल स इच्छति मधुकरः पातुम् ।
तन्नीरसानां दोषः कुसुमानां भवति भ्रमरस्य ॥
यो भवति सरसातिशयस्सुविनष्टानामपि × ण्ङ्गेणाम् ।
कुतस्सम्भवति रसो मोघाशानामनिक्षूणाम् ॥

Colophon :

इति शातवाहनप्रभुनियोजितप्राकृतसप्तशत्याः सङ्गृह्य सङ्ग्रथितानि मङ्गळ पाठकाव्यप्रशंसादुर्जनसुजनगुणभेदनीत्यन्य।पदेशरूपसारपद्यानि समाप्तानि ।।

668

Sl. No : 28189 सभ्याभरणटीका **Ms. No : P. 4655**

Beginning :

नीलकण्ठं बुधवरं नत्वा गोविन्ददैवविन् ।
खलनिन्दासमुल्लासं व्याख्याति विदुषां मुदे ।।

तत्र शिखरिण्या खलनिन्दामाह – स्वभावादिति । एतौ खलसुजनौ ततो हेतोः खलनिश्चयेन तद्धित इत्यधिकृत्य विहितयोर्थस्प्रत्यययोः तौल्यं साम्यं किं न भजतः । अपि तु भजत एव ।

End :

आकारस्य ह्रस्वो नैवस्यादिति तस्य प्रत्यावृत्तिः स्यात् सत्यम् नैव लोके न च वेदे विवृत अकारोऽस्ति । कस्यहितं विवृतः येस्ति सा भवतीति तस्मात् धातु प्रातिपदिकप्रत्ययनिपातस्थस्य आकारस्य संवृत एव प्रयोगो यथास्यादित्ये वमर्थान्प्रत्यवृत्तिरिति सिद्धान्तः ।।

Colophon :

इति श्री विद्वद्दैवज्ञमकुटहीरनीलकण्ठ ज्योतिर्वित्सूनुगोविन्ज्योतिर्विद्रचिताय सभ्याभरणटीकायां प्रकीर्णनामको नवमोल्लासः ।।

669

Sl. No : 28197 सुभाषितकौस्तुभः **Ms. No : P. 7333/3**

Begignning :

वन्दे वाञ्छितदायिवेङ्कटगिरेर्वेदस्य चौतंसकम्
पुसः कंसजितः × × नाको नदीमातृकः ।।
श्रीवेङ्कटार्यमखिना रघुनाथसूरेः
संप्राप्तजन्मयुगळेन यथामनीषम् ।
आतन्यते सुमनसामनसूयकानां
हर्षाय संप्रति सुभाषितकौस्तुभोऽयम् ।।

End :

भूयोभिर्बहुमानपूर्वमवनीपालेन विश्राणितैः
आहारैःपरिपूरितोदर इभः तृप्यत्यनायासतः ।
अत्यल्पोदर एष पश्य मशको हा हन्त नक्तंदिवं
हेयाहारलवेच्छयाऽटति दिशास्वष्टासु कष्टास्वपि ॥

Colophon :

इत्यात्रेय वेङ्कटार्यकृत सुभाषितकौस्तुभं संपूर्णम् ॥
को निर्दंग्धस्त्रिपुरजयिना + समग्रं शिवः ॥

— —

670

Sl. No : 28203 सुभाषितनीवी Ms. NO : P. 1175/2

Beginning :

प्रथमसुजनाय पुंसे मह्यमपि प्रथमदुर्जनाय नमः ।
सर्वं हतः कृतं यौ सकृदुपकारापकाराभ्याम् ॥
प्रसितिपरिष्कृति + मविभिः ।
भवति सुभाषितानीवी + अर्ह्यर्था ॥

End :

सैषा सुभाषितानां माला महनीयविप्रवृत्तगुणा ।
भावुकसंख्यारूढा प्रियपद्धतिभूषिता जयति ॥
कविकथकसिंह कथितं + सर्वलोक हितम् ॥

Colophon :

इति श्रीकवितार्किकसिंहस्य + कृतिषु सुभाषितनीव्यां परीक्षापद्धतिः द्वादशी ॥

671

Sl. No : 28213 सुभातनीवीव्याख्या Ms. No : B. 763/2

Beginning :

इह खलु भगवान् वेङ्कटनाथार्यः कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रः राज
महेन्द्रनगरस्थितशिङ्गक्षमावल्लभेन एकलव्यन्यायेन शिष्येण विशिष्टश्रीवैष्णवधर्म
विविदिषया × सुभाषितनीव्याख्यं नीतिप्रबन्धं प्रणिनाय ॥

End :

विशुद्धया सम्प्रदायपूर्वं सम्यगभ्यस्ततया सुनिश्चितार्थया एकया कलयापि कोपि यः कश्चिदपि गिरि वाचि विषये ईशतां स्वतन्त्रत्वं भजति ॥ अत्र चन्द्रश्च शिवश्च निदर्शनम् ॥

Colophon :

इति श्रीमच्छ्रीशैलकुलतिलकस्य वेङ्कटाचार्यसोमसुतस्सुतस्य श्रीनिवासविदुषः कृतिषु सुभाषितानिवीव्याख्यायां परीक्षितपद्धतिद्वीदशी ॥

672

Sl. No : 28229 सुभाषितपयोनिधिः **Ms. No : P. 3188/2**

Beginning :

आत्मनो हि × दैवं गर्हयते नरः ।
आत्मनः कर्मदोषांश्च नैव जानाति पण्डितः ॥
सुहृदां हितकामानां यो वक्यं नाभिनन्दति ।
स कूर्म इव दुर्बुद्धिः काष्ठात् भ्रष्टो विनश्यति ॥

End :

परोपकारेण तपश्च साध्याः
परोपकारेण हरिश्च तुष्टः ।
परोपकारेण च तीर्थसिद्धिः
परोपकारेण च यन्त्रसिद्धिः ॥

Colophon :

— — —

673

Sl. No : 28230 सुभाषितमुक्ताहारः **Ms. No : . 3188/3**

Beginning :

संस्थाप्याश्वत्थवृक्षं यो द्विरेकं चाभिवृद्धये ।
वर्धन्ते तद्गृहे पुत्राः वर्धन्ते च धनादयः ॥

सप्तप्रदक्षिणा येन क्रियन्ते बोधिनं प्रति ।
प्रदक्षिणीकृता भूमिः तेन व्यासवनार्णवाः ॥

End :

कुयोषितः कुत्सितसङ्गशालाः
कुदृष्टयः कुण्ठितधर्मचिन्ताः ।
उच्चैस्स्वराः स्वोदरपूरणाश्च
द्विषन्ति भर्तुर्नरकालयाः स्युः ॥

Colophon :

— — —

674

Sl. No : 28232 सुभाषितरत्नमाला Ms. No : P. 7776/1

Beginning :

सुभाषितरसं देवाः न जानन्ति हविर्भुजः ।
चौर्यक्षीरप्रियो विष्णुः विषादे गिरिजाधवः ॥
सुभाषितमहाग्रन्थं सर्वचातुर्यकारणम् ।
अध्ययनं यो न कुरुते नरो वानर एव सः ॥

End :

बीजैरंकुरितं लताभिरुदितं वल्लीभिरुज्जृम्भितं +
कन्दैः कन्दलिशजनैः प्रमुदितं धाराधरे वर्षति ।
खातक्षातकपातकं किमपि ते सौख्यं न जानीमहे
येनास्मिन्निपतन्ति चंचुपुटेने द्वित्राः पयोबिन्दवः ॥

Colophon :

इति श्री सूर्यरायवंशखन्युद्भव मणिना + कविबुधजन × णीयेन हिरियण्णमन्त्रिणा विरचित सुभाषितरत्नमालायां मतिवर्धनिकायां प्रथम गुच्छः ॥ (५० तमे पत्रे)

675

Sl No 28235 सुभाषितरत्नसन्दोहः Ms. No : B. 47

Beginning :

जनयति मुदमन्तर्भाव्य पाथोरुहाणां
हरति तिमिरराशिं या प्रभा भानवीव ।

कृतनिखिलपदार्थद्योतना भारती द्वौ
इतर तु धुतदोषा साहिती भारती वः ॥

End :

यावच्चन्द्रदिवाकरौ दिवि गतौ भिन्नस्तमश्शार्वरीं
यावन्मेरुतरङ्गिणीपरिवृढौ नो मुञ्चतः स्वस्थितिम् ।
यावद्याति तरङ्गभङ्गुरतनुः गङ्गाहिमाद्रेर्ध्रुवं
तावच्छास्त्रमिदं करोतु विदुषां पृथ्वीतले सम्मदम् ॥
समारूढे पूतत्रिदशवसतिं विक्रमनृपे
सहस्रेवर्षाणां प्रभवति हि पञ्चाशदधिके ।
समाप्तं पञ्चम्यामवति धरणीं मुञ्जनृपतौ
सिते पक्षे पौषे बुधहितमिदं शास्त्रमनघम् ॥

Colophon :

इति अमितगतिविरचितसुभाषितरत्नसन्दोहः समाप्तः ॥

676

Sl. No : 28237 सुभाषितलहरी **Ms. No : P. 3188/1**

Beginning :

लक्ष्मीलक्षणहीनेव कुलहीने सरस्वती ।
अपात्रे रमते नारी मेघो वर्षति पर्वते ॥
दूरस्थोऽपि न दूरस्थः सज्जनः साधुसङ्गमः ।
यद्वा कमलजातीनां दूरस्थोऽपि दिवाकरः ॥

End :

एकादशेन्द्रियैः पापैः यत्कृतं भवति प्रिये ।
एकादश्युपवासेन तत्सर्वं विफलं भवेत् ।
अजचर्मावनिश्वासैः दह्यते पञ्चलोहकः ।
सतां सन्तापनिःश्वासैः किमाश्चर्यं कुलक्षये ॥

Colophon :

— — —

677

Sl. No : 28286 **सुभाषितसुधानिधिः** Ms. No : P. 454/2

Beginning :

ऐश्वर्यमव्याहतमावहन्तु
हेरम्बपादाम्बुजपांसवो नः ।
ये निर्वहन्ति श्रुतिनिर्वहन्ति
श्रीमन्तसिन्धूरपरागलक्ष्मीम् ॥
उपोद्घात पद्धतिः – दन्ताग्रं दारयेत् विद्वान् ॥

End :

सोयर्थो जोहन्तेति कीङ्गिणी रौवधणे ।
तिरं वज्जम् मङ्गन्थ गुणातोविण्णाणजिहिधंमे ॥

Colophon :

इति पूर्वपश्चिमसमुद्राधीश्वरारिरायविहाळश्रीकम्पराजमहाप्रधानभारद्वाजवंश मौक्तिकमायणरत्नाकरमाधवकल्पतरुसहोदरसायणार्यविरचिते सुभाषितसुधानिधावर्थपर्व संपूर्णम् ॥

678

Sl. No : 28289 **सुभाषितसुरद्रुमः** Ms. No: P. 2554/2

Beginning

शय्योत्थायिनी ।
दोर्मूलद्वितया वरूथवमनोद्धि न्नस्तनोत्सेधया
बिभ्रत्या करपल्लवेन शिथिलां हैमं स्फुरन्मेखलाम् ।
निद्रातान्तदशानताङ्गलतया विश्लिष्टधम्मिल्लया
पर्यङ्कान्मणिपादुकाञ्चितपदं तन्व्या समुत्थीयते ॥

End :

लभ्येत पुष्पैः गृहिणी मनोज्ञा
तथा सुपुत्राः परितः पवित्राः ।
स्फीतं यशस्थैः समुदेतिनू × ॥

Colophon :

इति स्त्रीप्रशंसाकुसुमम् ॥

679

Sl. No : 28290 सुभाषितसुरद्रुमः Ms. No : P. 2583/2

Beginning :

याचकान्योक्तिः —

गतः स कालो यत्रासीद्वज्ञाकल्पशाखिनाम् ।

उदुम्बरफलेभ्योऽपि स्पृहयामोऽधुना वयम् ॥

End :

कमपि विधिवशेन प्राप्या योगयाभिमानम् ।

जगदभिभवमनिन्द्यं दुर्जनः किं करोति ॥

अभिभवति । अभिभयरहितम् । भवति × परगुणान्निन्दितुं गनमत ×

Colophon :

— — —

680

Sl No : 28291 सुभाषितसुरद्रुमः Ms. No : P. 2672

Beginning :

स्वामिन् प्रख्यातनानासहृदयहृदयाह्लादिसाहित्यविद्या

स्फायद्भूयोरहस्यप्रकटनपटुवाक्सर्वतुनाशो लोकः ।

जन्मोक्याह्लात्मकानि प्रणयपरवशेनेरितानि त्वयाम-

याकर्ण्यानन्दभूमाद्भुतरसभरितो भूरिपद्यान्यभूवन् ॥

End :

इति शत्रुषु चेन्द्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ ।

प्रसितावुदयापवर्गयोरुभयीं सिद्धिमुभाववापतुः ॥

इति राज्ञः स्वकर्तव्यालोचनकुसुमम् ।

(इति श्री सुभाषितसुरद्रुमे षष्ठः स्तबकः समाप्तः ।)

Colophon :

इती श्रीमभि × महिमोद्दाम × श्रीमत्केळदिबसवक्षितीन्द्रसंगृहीते सुभाषितसुरद्रुमे × तृतीयस्कन्धः समाप्तः ॥

681

Sl. No : 28292 सुभाषितसुरद्रुमः Ms No : P. 2785

Beginning :

नत्यादिप्रतिपादकानि भवता प्रोक्तानि पद्यान्यहं
स्कन्धे प्राथमिके निशम्य नितरां तुष्टोऽभवं श्रीगुरो ॥
कौमराभ्यासयोग्यं तदिदमिह पुनर्वर्ण्यते च द्वीतीये
स्कन्धेसम्यक् + ममाख्याहि हार्दात् ॥

End :

को देवस्वहरः पुरा भवति का कीर्त्यैं हरः कीदृशो
गोलावह्निसितां शुकं सविरविद्यो मातरिश्वाकृतिः ॥
गोत्रा + + गोत्राभूः ॥

Colophon :

— — —

682

Sl. No : 28293 सुभाषितसुरद्रुमः Ms. No: P. 4365

Beginning :

अमुकं कालवपुषं जलिङं जन्मवर्जितम् ।
नमामि नौमि वन्दामि समं सोमं सभारतीम् ॥
लता कपितरुः कोऽपि काश्यामद्भुतदम्पती ।
स चापर्णा स च स्थाणुः ददाते वाञ्छितं नृणाम् ॥

End :

साहित्यरसहीनानां सर्वशास्त्रविदामपि ।
समाजं परिपश्यन्ति समजं ज्ञातचक्षुषः ॥
समाजं समूहं । समजं पशुसमूहं । पशूनां समजोऽन्येषां समाज इत्यमरः ।

Colophon :

— — —

683

Sl. No : 28294 **सुभाषितसुरद्रुमः** **Ms. No : A. 581**

Beginning

स्फायन्नीतिकलाकलापजलधिप्रोन्माथमायतन्वते
प्रह्लादाप्तिलसत्सुभाषितसुधास्वादप्रहृष्टान्तरम् ।
सत्यादिप्रतिपादकानि भवता प्रोक्तानि पद्यान्यहं
स्कन्धे प्राथमिके निशम्य नितरां तुष्टोऽभवं श्रीगुरो ॥
स्कन्दे द्वितीय इह सम्यगुदीरयामि
स्वान्यापदेशमभितो विविधात्मकानि ॥

End :

दुर्जनं सुजनीकर्तुं उपायो नैव विद्यते ।
अङ्गारं धवळीकर्तुं अद्भिः प्रक्षाळनं यथा ॥
संपन्नोऽपि न नीचः किञ्चिदपि नतां समानतां याति ।
करिणी केन रिणावकोलः स्थूलोऽपि याति किं समताम् ॥ (?)

Colophon :

— — —

684

Sl. No : 28295 **सुभाषितसुरद्रुमः** **Ms. No : A. 582**

Beginning :

स्वामिन्प्रख्याततनानासहृदयहृदयाह्लादिसाहित्यविद्या-
स्फायद्भूयोरहस्यप्रकटनपटुवाक्तोषिताशेषलोकः ।
अन्योक्त्याद्यात्मकानि प्रणयपरवशेनेरितानि त्वया म-
याकर्ण्यानन्दभूमाद्भुतरसभरितो भूरि पद्यान्यभूवम् ॥

End :

प्रभातरतिः — प्रातरात्मशयनाद्विनिर्यतीं
सन्निरुध्य यदसाध्यमन्यदा ।
तन्मुखार्पणमुखं सुखं तवो-
जंभजित् क्षितिशचीमचीतरत् ॥

Colophon :

— — —

685

Sl. No : 28296 सुभाषितसुरद्रुमः Ms. No: C. 2897

Beginning :

राजस्त्री वर्णनम् ॥

सामन्तचक्रेश्वरसारसाक्षी
सहस्तनित्या चरितोपचारा ।
भर्तुः प्रकारं बहुमाननीया
बभूव सा प्राणसमा समाजे ॥

End :

अत्युन्नता पुरस्तात् अवगाढा जघनगौरवात् पश्चात् ।
तीरेऽस्य पाण्डुशिखरे पदपंक्तिः दृश्यतेऽभिनवा ॥

Colophon :

इति श्रीसुभाषितसुरद्रुमे तृतीयस्कन्धे राजगृहवर्णनं नाम तृतीयस्तबकः ॥
सूर्योदयकालवर्णना ।

686

Sl. No : 28334 सुभाषितामृतानिधिः Ms. No: P. 5670

Beginning

कलयन् कमलाकरान्कराग्रैः
मधुपान् सन्मदयन् मरन्दलोलान् ।
श्लथयन्निबिडान्धकारशैला-
नुदयाद्रेर्भगवानुदेति भास्वान् ॥

End :

कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥
अधना धनमिच्छन्ति धनमानौ हि मध्यमाः ॥

Colophon :

— — —

687

Sl. No : 28335 सुभाषितार्णवः Ms. NO : P. 3990/1

Beginning :

प्रणिपत्य जिनं वीरं प्रभूतसुखदायिनम् ।
सुभाषितार्णवं वक्ष्ये सुजनानन्दकारणम् ॥
सुभाषितसभारत्नमज्ञानतमनाशनम् ।
पुराणे भारते काव्ये यत्सारं तत्सुभाषितम् ॥

End :

पक्षद्वन्द्वविराजितोऽपि धवलं मीनप्रसेवी सदा
पुष्टाङ्गं सकला दिशः परिगतो चन्द्रं बको हासति ।
सर्वस्थाणुशिरोगतेन कथितं चन्द्रो मया किं समः
मात्सर्येण विराजितैश्च सुजनो दुष्टैस्सदा निन्द्यते ॥

Colophon : — — —

688

Sl. No : 28340 सूक्तिमुक्तावलिः Ms. No: P. 1828

Beginning :

अथ सुभाषितप्रशंसा —
सुभाषितरसास्वादजातरोमाञ्चकञ्चुकाः ।
विनापि कामिनीसङ्गं कवयः सुखमासते ॥
कस्यापि स्वान्तमप्ये + सुभाषितं चेतः ॥

End :

चक्षुः पश्यतु केशवं + प्राप्नोतु गात्रं मम ॥
सर्वज्ञनारायणभट्टस्येतौ इति हरिस्तुतिः + +
पृथ्वंशसत्यकुलमहसा यादवे कृष्णराजे +
प्रग्मारो भिषजां वरो विजयते श्रीभास्कराख्यः सुधीः ॥

Colophon :

इति श्रीमदारोहकभगदत्तजह्लणदेवविरचिता सूक्तिमुक्तावलिः समाप्ता ॥

689

Sl. No : 28341 सूक्तिमुक्तावलिः Ms. No : P. 2542/2

Beginning :

अथ सुभाषित प्रशंसा ।।

सुभाषितरसास्वादजातरोमाञ्चकञ्चुकाः ।

विनापि कामिनीसङ्गं कवयः सुखमासते ॥

End :

शौर्यं श्लाघाविहीनं नयविनयसमालङ्कृतं भूपतित्वं

लक्ष्मीश्चौदार्ययुक्ता वपुरनघिगतं व्याधिनाऽप्यल्पकेन ।

विद्वत्तोत्सृष्टगर्वा गुणगणसहितं रूपमुत्सेकि भाग्यं

त्वद्भक्तिः सर्वकालं भवतु भुविनृणां शङ्कर त्वत्प्रसादात् ॥

श्रीवैद्यभानुपण्डितस्यैषा ।।

Colophon :

इति सूक्तिमुक्तावल्यां ईश्वरस्तुतिः । समाप्तो ग्रन्थः ।।

690

Sl. No : 28346 सूक्तिसुधाकरः Ms. No : P.A 433

Beginning :

अद्वैतदृष्टिस्पृहणीयभावां × ।

वैनायिकां देशिकवंश लक्ष्मीम् ।।

रचयति बहुपद्धतिभिः चतुर्भिरथ मण्डितं काण्डैः ।

सूक्तिसुधाकरसंज्ञं ग्रन्थं श्रीभैरवाधीशः ।।

End :

तृणानि नोन्मूलयति प्रभञ्जनः

मृदूनि नीचैः प्रणतानि सर्वतः ।

समुच्छ्रितानेव तरून् प्रबाधते

महान् महत्स्वेव करोति विक्रमम् ।।

Colophon : — — —

691

Sl. No : 28351 | अलङ्कारकौस्तुभः | Ms. No : C. 1811/1

Beginning :

लक्ष्मीपादतलांककुंकुमकृतालंकारशृङ्गारितं
वक्षो यस्य हृदालवालभुवि सत्कारुण्यवत्यां सतः ।
रागाभोगसुरागमस्य विविनक्त्युत्पल्लवप्रक्रियां
देयादस्य स वेंकटाचलपतिःश्रेयांसि भूयांसि नः ॥

End :

श्रीमत्तिर्मलबुक्कपट्टनकुलक्षीराब्धिराकाशशी
षट्तन्त्रीनिपुणोऽण्णयार्यतनयः श्रीतातयार्यग्रणीः ।
दन्तिद्योतिदिवाप्रदीपबिरुदप्रख्यातविख्यातिकः
तर्कातर्किनिरस्तशात्रवसुधीरासीदसीमोन्नतिः ॥
यत्षट्तन्त्रीतन्त्रस्वतन्त्रैः फणिपतिफणितिप्रौढमेधासनाथैः
श्रुत्यन्तात्यन्तिकश्रीकृतिपटुमतिभिः श्रीनिवासार्यवर्यैः ।
तर्कालंकारवागीश्वर इति यदिदं मे विशिष्य स्वनाम
प्रत्तं तत्तत्कटाक्षाद्विशदयितुमयं कौस्तुभोऽभून्निबद्धः ॥

Colophon :

श्रीमत्तिर्मल बुक्कपट्टण श्रीमदण्णयाचार्यदीक्षितसुत श्रीवेंटाचार्य विरचितोऽलंकारकौस्तुभस्सम्पूर्णः ॥

692

Sl No 28357 | अलङ्कारचिन्तामणिः | Ms. No : A. 64/1

Beginning :

श्रीमते सर्वविज्ञानसाम्राज्यपदशालिने ।
धर्मचक्रेशिने सिद्धशान्तयेऽस्तु नमो नमः ॥ +
अलंकारमलंकारचिन्तामणिसमाह्वयम् ।
इष्टालंकारदं सूरिचेतोरञ्जनदं ब्रुवे ॥

End :

वक्तुमिच्छति चेद् ब्रूयात् राजसंसदि कोविदः ।
गलावलम्ब्यालङ्कारचिन्तामणिविभूषणः ।
अल्पज्ञत्वात्प्रमादाद्वा स्खलितं तत्र तत्र यत् ।
संशोध्य गृह्यतां सद्भिः श्लिष्टावक्रदृष्टिवत् ॥

Colophon :

इत्यलङ्कारचिन्तामणौ रसादिनिरूपणो नाम पञ्चमः परिच्छेदः ॥
शाकेऽब्देन गसूपभाजि विभवे माघेऽसिते चारुणि-
सप्तम्यामुरुपाद्मपण्डितिरिदं मे शान्तराजोऽलिखम् ।
शास्त्रं सत्कविचक्रवर्त्यभिधमाख्यातोऽग्रजन्मार्हतः
भारद्वाजकुलो ह्यदोपिवसतारसद्घ्रत्कुमार्गेन्दुभम् ॥

693

Sl. No : 28360 अलङ्कारचूडामणिः Ms. No : P. 992/2

Beginning :

अकृत्रिमस्वादुपदां परमार्थाभिधायिनीम् ।
सर्वभाषापरिणतां जैनीं वाचमुपास्महे ॥
शब्दानुशासनेऽस्माभिः साध्व्यो वाचो विवेचिताः ।
तासामिदानीं वाक्यत्वं यथावदनुशास्यते ॥

End :

यथोत्तरं पूर्वस्य हेतुत्वे कारणमाला । स्वातन्त्र्याङ्गत्वसंशयैकपद्यैरेषामेकत्रस्थितिः सङ्करः ॥

Colophon :

इति आचार्य श्रीहेमचन्द्रविरचिते अलङ्कारचूडामणौ काव्यानुशासने शब्दार्थालङ्कारवर्णनो नाम षष्ठोऽध्यायः ॥

694

Sl. No : 28361 अलङ्कारतिलकम् Ms. No : A. 196

Beginning :

सोऽयं मे मुदमातनोतु भगवत्क्रोडावतारो हरिः
सिन्धोः क्लेशमपास्य यस्य दशनप्रांशुस्थिताया भुवः ।

तारा हारति वारिदस्तिलकति स्वर्वाहिनी माल्यति
क्रीडादर्पणति क्षपावति रहर्देवश्च तारंकति ॥
पुरः स्फुरदलङ्कारचमत्कारपटुश्रियः ।
तनोति तिलकं भाले भारत्या भानुसत्कविः ॥
अथ रसा आत्मनः तेषां शरीरं कायं तस्य गतिः आवृतिवृत्तिदोषतदभाव गुणालङ्काराः इन्द्रियाणि ।।

End :

विबुधाः पद्यसूत्रेण गुम्फितालङ्कृतीत् या । (?)
सूत्राभ्यङ्गो यथा न स्यादेतस्याः कलयेस्तथा ॥
दण्डीयति यतो दण्डी सामनोयति वामनः ।
तदलङ्कारतिलकं धीराः कुर्वन्तु भूषणम् ॥

Colophon :

इति श्रीभानुदत्तविरचितेऽलङ्कारतिलके अर्थालङ्कार निरूपणं नाम पञ्चम परिच्छेदः ॥

695

Sl. No : 28364 **अलङ्कारनिकषः** Ms. NO : P. 507

Beginning :

पायाद्वः प्रेमकोपावसरविसृमरा × मानम्रमौळे
श्चूडाचन्द्रो मृडानीचरणनखदलात्पूरितार्थः पुरारेः ।
यस्याः लोकेन राका रजनिकरपणरीमपारीणमूर्तेः
प्रत्यासीदत्प्रसादां प्रभुरनुनयति प्रेयसीमप्रयासात् ॥
उच्चावचभेदानां कुर्वेऽलङ्कारनिकषनामानम् ।
अर्थालङ्काराणां संग्रहमभिनवमभङ्गुरप्रौढिम् ।।

End :

तथासति निरलङ्कारत्वस्य दोषतास्वीकारेण सर्वस्यापि शब्दालङ्कारवर्गस्य तदभावरूपतयानलङ्कारता प्रसज्येत तस्मात् सिद्धं दोषाभावरूपस्यापि यथा सङ्कऽलङ्कारत्वम् । अथ रत्नावली —

Colophon :

— — —

696

Sl. No: 28375 **अलङ्कारमणिदर्पणः** Ms. No: B. 558

Beginning :

यथा यस्य तु पाथोधिः पद्त्राणमहीपतिः ।
पावनैर्भक्तिभूः पयात्पङ्क्तिस्यनन्दनः ॥
गूढाहंकृतिशुष्कतार्किकवचोदुस्तर्कनिर्मूलन
प्राप्तप्राणकलां सुकाव्यललनां सम्यग्रसैः प्रोषयन् ।
शोभासज्जननैरलंकृतिशतैश्चेतोपमासंज्ञिकैः
तत्राकल्पमुकल्पमाकलयते श्री वेङ्कटार्यः कविः ॥

End :

अत्र च नालोकालोकव्यतिकृतिपरिक्रान्तिवदनमिति साभिप्रायविशेषणस्य कथं वपुर्वांगामर्दमित्यसम्भवस्य च अङ्गाङ्गिभावः । तयोश्च कविपङ्क्तेरिति मतिरित्युत्प्रेक्षायाश्च अङ्गाङ्गिभावात्संकरः । एवं त्रयाणामपि संकरणां सांकर्यात्संकीर्णालङ्कारः ॥

Colophon :

इति श्रीमत्षड्दर्शनीपरिश्रमविभवातिशयेन हम्पयार्यगर्भपयःपारावारराकासुधाकरेण वेङ्कयकविसार्वभौमेन विरचिते मणिदर्पणे अलङ्कारशास्त्रे अर्थालङ्कारस्वरूपनिरूपणं सम्पूर्णम् ॥

697

Sl. No: 28376 **अलङ्कारमणिहारः** Ms. No: B. 1166/1

Beginning

वेंकटधरणीधरशिखरालंकारमद्भुताकारम् ।
वाणी मम परितिमुता × णीयः किमपि मङ्गलं जगतां ॥
हृदयभुवं मम हयमुखलक्ष्मीनारायणावलङ्कुरुताम् ।
राजयुवराजमूर्ती पम्कालस्थानराज्यसीमनि यौ ॥

ल ॥ साधकं बाधकं वापि यत्रान्यतरसंग्रहे ।
प्रमाणं नैव दृश्येत स स्यान्देहसङ्करः ॥
(इति ६१५ तमे पत्रे)

Colophon :

इत्यलङ्कारमणिहारे संसृष्टिसर एकोनविंशत्युत्तरशततमः ॥
(इति ६१० तमे पत्रे)

698

Sl. No : 28377 अलङ्कारमणिहारव्याख्या **Ms. No : B. 1166/2**

Beginning :

अत्रालङ्कारशब्देन अस्य प्रबन्धस्य अलङ्कारविषयकत्वं सूचितम् ॥ वेद × तावेङ्कटाद्रौ वेदाद्रिर्गरूडाद्रिश्चेति तन्नामसु पाठात् ।। प्रादुर्भूतं अभिव्यक्तं सरोजभुवः श्रियः महाभारतोक्तेः ॥

End :

व्याख्या ॥
श्रुतिस्मृती तु विप्राणां चक्षुषी द्वे विनिर्मिते ।
एकेन हीनः काणः स्यात् इत्याद्युक्तेः —
इति भावः ॥ अत्र समविरोधाभासयोः एकत्रैव कविसंरम्भाविश्रान्तेः तयोः सन्देहसङ्करः ॥

Colophon :

इत्यलङ्कारमणिहारे संसृष्टिसरव्याख्याने एकोनविंशत्युत्तरशततमः ॥

699

Sl. No : 28378 अलङ्कारमुक्तावलिः **Ms. No: C. 1159**

Beginning :

सन्मूलप्रकृतिः प्रकाशितनतानन्दो दधानः क्रमां
कृत्स्नं चापि स्तुवन्तु नैकगुरुता शाली नयन् पूज्यताम् ॥ (?)

सद्वृत्तिं दधदात्मभूतनयतामारुन्धते यः सतां
आचार्यः प्रथमो गिरां विजयत विद्वांस लक्ष्मीधरः ॥

End :

तच्चाद्यो यथा ॥
तौलिस्तिग्मरुचः कैरः परिचितां सेक्तुं कपोलस्थलीं
नीराणां निकरं करेण हरता तुच्छीकृते वारिधौ ।
मैनाकं समुदीक्ष्य + लीलारसः ॥ अत्राद्भुतस्य लम्बोदर
विषयकभावाङ्गत्वम् ॥ द्वितीयो यथा ॥ पातुं न प्रथमं ॥

Colophon :

— —

700

Sl. No : 28397 अलङ्कारराघवम् Ms. No : P 736

Beginning :

स्वदक्षजानुस्थितवामपादं
पादोदराकल्पितयोगपट्टम् ।
अपस्मृतेराहितपादमङ्घ्रिं
प्रणौमि देवं प्रणिधानवन्तम् ॥
अथालङ्कारा निरूप्यन्ते—

End :

आक्षेपो द्विविधो मत इति काव्यप्रकाशकारः । वक्ष्यमाणयोः प्राकरणिकयोः
विशेषप्रतिपत्त्यर्थं निषेधाभास आक्षेप इत्यलङ्कासर्वस्वकारः ।
× मपि विशेषं वक्तुं वक्ष्यमाणस्य यत्न प्रति —

Colophon :

— — —

701

Sl. No : 28383 अलङ्कारशतकम् Ms. No : C. 2510/7

Beginning :

रसभिन्नव्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठविषयतासम्बन्धावच्छिन्न
चमत्कृतिजनकतावच्छेदकत्वमित्यलङ्कारसामान्यलक्षणम् ।

End :

अत्र प्रभुकटाक्षाणां लक्ष्मीविलासानां च जन्यजनकभावत्वेपि प्रकृते तयोर भेदप्रतिपादना तु हेतुमतोरैक्यमभिहितमिति लक्षणसमन्मयः ॥

एतेन प्रभुकटाक्षप्रसरणमात्रेण प्रभुरेव भ × ती । नान्यथेति । प्रभौ कल्पद्रुमसाजात्यं प्रतीयते ॥

Colophon :

इत्यलङ्कारशतकं संपूर्णम् ।

702

Sl. No : 28388 अलङ्कारशिरोभूषणम् **Ms. No : C. 1780**

Beginning :

इत्थं शब्दार्थौ निर्दोषाविति लक्षणे विशेषणीभूतानां दोषगुणालङ्काराण निरूपणं प्रपञ्चेन कृतम् । अधुना पूर्वं सामान्यतो लक्षितस्य विशेष्यभूतस्य काव्यस्य विशेषा निरूप्यन्ते ॥

End :

यद्यप्यस्मिन्नायिकाप्रकरणे तत्र तत्र बहु विचारणीयमस्ति । तथापि ग्रन्थां विस्तरभयाद्यद्युपयुक्ततमं तत्तदेवोपन्यस्तमस्माभिः । अन्यथा दुरवगाहोऽयं स्यात्प्रबन्ध इति । तज्जिज्ञासुभिस्त्वन्यत्सर्वं रसमञ्जर्यादिषु तन्मात्रप्रतिपादकेषु द्रष्टव्यम् । इति नायिकाप्रकरणम् ॥

श्रीरङ्गशायिप्रसादकारितत्रायमर्थवानास्ताम् ।
त्रिजगदलङ्कारशिरोभूषणनामाऽभिरोचयन् ग्रन्थः ॥

Colophon :

श्रीमत्सकलकल्याणगुण × तुङ्गभद्रामध्याधिष्ठितचोरवेल्लीनगरविहरमाण श्रीकेशवस्वामिचरणनलिनयुगल सेवाधुरीणताभिराम सोमभूमिपति ललाम गिरियमाम्बागर्भक्षीरपाथोदधिसुधाकरायमाणेन श्रीवेङ्कटक्षमाभृन्महास्थानविद्वन्महाकविना कौशिकगोत्रतिलकेन श्रीमदायलूर्यन्वयसमुद्भवेन कन्दाळयार्येण विरचिते अलङ्कारशिरोभूषणनामन्यलङ्कारशास्त्रे दशमोल्लासः ॥

703

Sl. No : 28395 अलङ्कारअंग्रहः Ms. No : A. 479

Beginning :

जगद्वैचित्र्यजननजागरूकपदद्वयम् ।
अवियोगरसाभिज्ञमाद्यं मिथुनमाश्रये ॥
\+ + + +
तत्रान्तरोदितानर्थान् वाक्यान्येव क्वचित् क्वचित् ।
संचिन्त्य क्रियते सम्यक् सर्वालङ्कारसंग्रहः ॥

End :

प्रबन्धेष्वेव लक्ष्याणि ज्ञेयानि रसकोविदैः ॥
सर्वदोषरहितं सगुणं यत् काव्यं अव्ययशःकरमुर्व्याम् ।
त्वच्चरित्रमिव साधु निषेव्यं गर्वितादियमगण्डरगण्ड ॥

Colophon :

इत्यमृतानन्दयोगिप्रवरविरचिते अलङ्कारसङ्ग्रहे दोषनिर्णयो नामः षष्ठ परिच्छेदः ॥

704

Sl. No : 28397 अलङ्कारसंग्रहः Ms. NO : P. 4080/1

Beginning :

× भवतां करोत्वभिनये प्रेङ्खोलभूषामणि-
स्फायन्मौळिमणिप्रदीपनिवहं चण्डीपतेस्ताण्डवम् ।
किञ्चित्कुञ्चितपाद × जटाव्यालोलभागीरथे
त्वं भङ्क्तुं × रङ्गशीकरकणव्याकीर्णदिङ्मण्डलम् ॥
नानाविधं ताण्डवमिन्दुमौलेः +
\+ + लोकत्रयमोहनाय ॥
अथ क्रमेण शास्त्रप्रतिपाद्यानर्थानाह आदौ प्रकरणे सम्यक् –

End :

एते दृष्टिविकाराः स्युः सम्यग्लक्षणलक्षिताः ।
महाकविप्रबन्धेषु दृश्यन्ते तद्विलोक्यताम् ॥
भावजा रसजाश्चापि तथा सञ्चार × ॥
× षट्त्रिंशद्भिरुक्तास्ता बुध्यन्तां भरते बुधैः ॥

Colophon :

इति रसिकरसायने भामहमहाकवीन्द्रविरचिते अलङ्कारसंग्रहे दृष्टि-
प्रकरणम् ॥

705

Sl. No : 28399 अलङ्कारसरणिः **Ms. No : P. 4750/1**

Beginning :

नत्वा देवौ च पितरौ लक्ष्मीवेङ्कटनायकौ ।
साहित्यसूक्ष्मसरणिः श्रीनिवासेन युज्यते ॥
प्रमेयोऽयं महक्रामत्वदालम्बान्मयेप्सितः ।
जडजन्तुस्तयोद्दिष्टो वोढुं मेरुं च शक्नुयात् ॥

End :

अलं लिप्सास्तिपूजायां देहि भक्तिं च धारणाम् ।
ग्लानिं विना जीविका मे भातु राम श्रिया भुवि ॥
को ग्रन्थकारो जल्पाकस्त्वाकृत्यन्तचरस्तुयात् ।
किमपि स्तोतृकामोऽस्मि राम × तु मनास्त्वय ॥

Colophon :

इति समासविशेषकथनं नाम पञ्चमं प्रकरणम् ॥

706

Sl. No : 28400 अलङ्कारसर्वस्वम् **Ms. No : P. 3311/1**

Beginning :

श्रीगोपालस्य हर्षार्योपाध्यायैः कथितं मम ।
तदलङ्कारसर्वस्वं सन्तः कर्णोत्पलोऽस्तु वः ॥
श्री गोपालस्य देवस्य यशो भूषयितुं कृता ।
उपाध्यायकृतिः सेयं स्वयं तेन विभूष्यते ॥

End :

प्रथमे द्वादशस्यैक्यं तुरीयाद्ये न कल्पयेत् ।
तृतीयाद्यस्तुरीयान्त्यो द्वितीयाद्येन सम्पतेत् ॥
वर्णेन खडगशिखरे खडगवन्ध उदाहृतः ।
परवीरदारणद × भामिधा
सुदाचिकरायचन्द्रे विवुधावलिस्तव ।
वसुधातलाभरणविश्रुता
विदासुतरां मुदंव्रजा भूमिवासवः ॥
मुरजवन्धो यथा —

Colophon :

— — —

707

Sl. No : 28401 अलङ्कारसर्वस्वम् Ms. No : P. 759

Beginning :

सत्यानन्दं वरत्राताादित्यमञ्जारिलक्षणम् ।
स्तुत्यं वुधैः पयोजाक्षं नित्यं गोपालकं भजे ॥
कृतं देवरकोण्डौभळार्यकृष्णाश्रयेन यत् ।
तदलङ्कारसर्वस्वं आचान्द्रार्कं प्रवर्तताम् ॥

End :

एवमाग्नेयनैर्ऋत्यपद्मरेखाश्च योजयेत् ।
रेखापश्चिमपूर्वस्थे नैर्ऋत × ययीरथ ॥
वहिस्संयोजयेदेवं वायव्यैशान्ययोर्युतिः ।
तथा नैर्ऋतवायव्योत्तरदक्षिणरेखयोः ॥
× × ×

Colophon :

— — —

708

Sl. No : 28402 अलङ्कारसर्वस्वटीका Ms. No : P. 2723/2

Beginning :

स्फुरन्मुखामोदविवृद्धगन्धं
जिघ्रन्मुहुर्मीलितरक्तनेत्रः ।
पूर्वं प्रियाचञ्चुपुटोपयुक्त
चूताङ्कुरं चुम्बति चञ्चरीकः ॥
अत्र तिर्यग्विषयकत्वात् रसस्य आभासता ॥

End :

सूक्ष्मामव्याकुलामत्र शास्त्रयुक्त्युपबृंहिताम् ।
मीमांसामुपजीवन्तु कृतिनः काव्यतान्त्रिकाः ॥
काव्यप्रकाशेऽलङ्कारसर्वस्वे च विपश्चिताम् ।
अत्यादरो जगत्यस्मिन् व्याख्यातमुभयं ततः ॥

Colophon :

इत्यलङ्कारचक्रवर्ति ध्वनिप्रस्थानपरमाचार्यकाव्यमीमांसा प्रभाकर सहजसर्वज्ञ महाकवि श्रीविद्याचक्रवर्ति विरचितायां सर्वसञ्जीविन्यां अलङ्कारसर्वस्वटीकायां अर्थालङ्कारप्रकरणं समाप्तम् ॥

709

Sl. No : 28404 अलङ्कारसारः Ms. NO : C. 704

Beginning :

अथेदानीं संलक्ष्यक्रमव्यङ्ग्यनिरूपणानन्तरमसंलक्ष्यक्रमव्यङ्ग्यभूतो रसो निरूप्यते । विभावानुभावसात्त्विकव्यभिचारिसामग्रीसमुल्लासितस्थायीभावो रसः । तदुक्तं दशरूपके—

End :

दिव्योद्दीपनभावनिर्मलवयस्यालम्बनावालके
सञ्चारो व्यभिचारिभावकुसुमस्सत्पल्लवस्सात्त्विकैः ।
उन्मीलल्ललितानुभावकुसुमस्पुस्थायिमूलस्तरा-
मिन्धे सारसि कौलिहर्षफलदः शृङ्गारकल्पद्रुमः ॥

Colophon :

प्राचीनाधुनिकाः कृतीरसततीरालोक्य सालंकृतीः
श्लोकैर्भावरसप्रमोदिनसुधीलोकैर्गुणोत्कर्षिभिः ।
शास्त्रेऽस्मिन् ग्रथिते नृसिंहसुधियाऽलङ्कारसारात्मके ।
पश्यन्तु प्रधियो रसप्रकरणं निर्मत्सरा वत्सलाः ॥

710

Sl. No : 28408 अलङ्कारसुधानिधिः Ms. No : B. 718

Beginning :

काव्यस्य रसास्वादपरतन्त्राणां कथमुपदेश इत्याशङ्कां परिहरति लौकिकदृष्टान्तप्रदर्शनेन ।

यथा वेतनवित्तस्य लाभः पुण्ड्रेक्षुभक्षिणाम् ।
तथा उपदेशलाभोऽपि रसास्वादविधायिनाम् ॥

End :

तेषु बन्धेष्वेकस्मिन् विपामत्वे एकरूपत्वं समत्वमिति त्रयाणां बन्धानां त्रिभिरद्योरुदाहरणान्याह — कोकिलेति ॥ अत्र बन्धेषु जात्मनः मध्यमत्वन्धसमत्वं वैदर्भेष्टम् ॥

Colophon :

१५९तमपत्रे —

श्रीमत्पूर्वदक्षिणपश्चिमोत्तरसमुद्राधिपति भुक्कराजप्रथमाराध्य माधवाचार्यानु सायणायणार्यस्य कृतौ अलंकारसुधानिधौ गुणभूतव्यङ्ग्यप्रतिपादनं नाम द्वितीयः उन्मेषः ॥

711

Sl. No : 28409 अलङ्कारेन्दुशेखरः Ms. No : P. 5873/1

Beginning :

कल्याणं कल्याणाचलधरोधरात्मक × मनः ।
विरचयतो च मौळिः परमहिमक्ष्माभ्यदीशलास्याङ्घ्रिः ॥

तेन श्रीशैलवंश्येन नृसिंहेण विनिर्मितः ।
आर्यानन्दकरो भूयादलङ्कारेन्दुशेखरः ॥

End :

अत्र निर्वेदशङ्काधृतिचिन्तानां शाबल्यम् ।
मुखे × सेपितेङ्गित्वं प्राप्नुवन्ति कदाचन ।
यथैव राजानुगता भृत्याः परिणयोन्मुखाः ॥
असंलक्ष्यक्रमव्यङ्ग्यः सप्रपञ्चं निरूपितः ।
हरिशाबसुधीन्द्रस्य मुदे विद्वच्छिरोमणेः ॥

Colophon :

इत्यलङ्कारेन्दुशेखरे रसप्रकरणं समाप्तम् ॥

712

Sl. No : 28413 उत्प्रेक्षामञ्जरी Ms. No: P. 2023

Beginning :

रमास्तम्बेरमाधीशरमणीरमणीमणिः ।
रमणीयगुणारामसीमारचयतान्मुदम् ॥
करुणेव रमानेतुः गुणेष्यभ्यर्हितोपमा ।
अलङ्कारेष्वथोत्प्रेक्षा तदेषाऽद्य प्रकाश्यते ।

End :

गम्योत्प्रेक्षा प्रभेदा ये चत्वारिंशत्तथाष्ट च ।
उत्प्रेक्षामञ्जरी सेयं सतनां कर्णावतंसतु ॥

Colophon :

उत्प्रेक्षामञ्जरी सम्पूर्णा ॥

713

Sl No 28414 एकावलि Ms. No : A. 96

Beginning :

प्रालेयाचलकन्यका कुचतटीपत्रावली शिल्पिनः
श्रीमत्फालविलोचनानलशिखानि × त्वचेतोभुवः ।

देवस्येन्दुविभूषणस्य रुचिरं पादारविन्दद्वयम्

युष्मान् पातु सुरासुरेश्वरशिरोरत्नांशुकिंजलिम्तम् ॥

End :

वीरनृसिंह इवाक्षा वीरनृसिंहशिरमञ्जयति ।

अत्र लाटानुप्रासेन सहानन्वयस्यैकवाचकानुप्रवेशेन सङ्करः ।

Colophon :

इति श्रीमदुमामहेश्वरस्य कवेर्विद्याधरस्य कृतावेकावल्यामलङ्कारशास्त्रे अर्था लङ्कारनिरूपणं नाम अष्टमः उन्मेषः ॥

किमन्यैरलङ्कारैरसारैर्भवदायिभिः ।

एकामेकावलीमेव कण्ठे धत्त कवीश्वराः ॥

समाप्तमिदमलङ्कारशास्त्रम् ॥

714

Sl. No : 28422 कविकल्पलता Ms. No: C. 2708

Beginning

गङ्गावारिभिरुक्षिताः फणिकणैरुत्पल्लवास्तच्छिखा-

रत्नैः कोरकिताः सुधांशुकलया स्मेरैकपुष्पश्रियः ।

आनन्दाश्रुपरिप्लुताक्षिहुतभुग्धूमैर्मिलद्दोहदाः

नित्यं कल्पलताः फलं ददतु वोऽभीष्टं जटा धूर्जटेः ॥

End :

एतद्विमर्श्य कविकल्पलतासुकाव्य

सम्पत्तये सुकविभिः सततं निषेव्या ।

आविष्कृता वसुमतीवलयेश्वरेण

देवेश्वरेण कविना कविनायकेन ।

काव्यज्ञमानसमुदे सकलार्थसूतिः

सत्सूनगुच्छकविकल्पलता विभूयात् ॥

Colophon :

इति श्रीवाग्भटसूनुमहाकवि श्री देवेद्र्चिता कविकल्पलता सम्पूर्णा ॥

715

Sl. No : 28423 कविसमयविलासः Ms. No : P. 1060

Beginning :

ईशानं सर्वविद्यानां नत्वा श्रीरेणुकं गुरुम् ।
कुर्वे कवीन्द्रसमयशतरत्नसमाहृतिं ॥

अथ कवित्वकारणं सुप्तिङन्तपदवाक्यादिलक्षणं दर्शयति अलङ्कारसर्वस्वे ।

End :

रेवणाराध्यदेवेन कृतस्सूक्तिसुधार्णवः ।
सारः श्रीमत्कविकुलकोलाहलसमाहृतिः ॥

Colophon :

इति सोसले रेवणारायदेवनामाचार्यवर्यविरचितः महासूक्तिसुधार्णवोद्धृत कविकुलकोलाहलपद्धतिसारसंग्रहस्समाप्तः ।

716

Sl. No : 28424 काकतालीयवादः Ms. No: B. 740

Beginning :

यश्चोराणामस्य च समागमो यश्च तैर्वधोऽस्य कृतः ।
उपनतमेतदकस्मादासीद्भूत काकतालीयम् ।

अत्र काकागमनमिव तालपतनमिवेत्येवं काकागमनतालपतनसदृशार्थकेवार्थ विषयात् —

End :

काकतालीयसमागमरूपार्थस्यार्थान्तरे भेदान्वयासम्भवः । सकृदुच्चरित व्युत्पत्तिभङ्गश्चेति निरस्तम् । स्वप्रत्ययप्रकृतेरर्थद्वयस्वीकारस्यैव अभावात् । तत्समानानुपूर्वीकपदान्तरस्यैव सुबन्तस्य स्मरणकल्पनादित्याहुः ।

Colophon :

शम्भुदासकृता काकतालीयार्थोऽस्वर्णना ।
पितरं बालभाषेव प्रीणात्येषा सुधीजनम् ।
सम्पूर्णः ॥

717

Sl. No : 28426 काव्यदर्पणम् Ms. No : P. 1526

Beginning :

भव्यारंभाय वो भूयात् अव्याजकलुणानिधिः ।
सव्यार्धलोकने नम्रा दिव्या या कापि देवता ॥
काव्यदर्पणाख्यग्रन्थमारभमाणो ग्रन्थकारः + अभिधत्ते —
नियत्यविषयां ह्लाद + कवेर्जयति भारती ।

End :

तस्मात्सर्वत्र सहृदयहृदयानुद्वेगकारिणो दोषाः परिहरणीया इति सर्वं सर्वं निरवद्यम् ॥

अधीत्य निखिलं शास्त्रं +
काव्यदर्पणनामासौ प्रबन्धो विदुषां मुदे ।

Colophon :

इति दन्तिद्योतिदिवाप्रदीपांकविश्वामित्रवंशमुक्ताफल + रत्नखेटश्रीनिवासदीक्षिततनयस्य + राजचूडामणिदीक्षितस्य कृतिषु काव्यदर्पणे उत्तरभागे अर्थालंकारनिरूपणं नाम दशम उल्लासः । समाप्तश्चायं प्रबन्धः ॥

718

Sl. No : 28431 काव्यप्रकाशः Ms. No : P. 369/6

Beginning :

ग्रन्थारंभे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत्परामृशति —
नियतिकृतनियमरहितां ह्लादैकमयीं अनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥

End :

इति संपूर्णमिदं काव्यलक्षणम् ।
इत्येष मार्गो विदुषां विभिन्नो
ऽप्यभिन्नरूपः प्रतिभासते यत् ।

न तद्विचित्रं यदमुत्र सम्यक्
विनिर्मिता सङ्घटनैव हेतुः ॥

Colophon :

इति काव्यप्रकाशेऽर्थालङ्कारनिर्णयो नाम दशमः उल्लासः ॥

719

Sl. No : 28434 काव्यप्रकाशतिलकम् Ms. No: C. 2382/2

Beginning :

अर्थालङ्कारः लक्षणीयाः । ते च –
उपमानान्वयस्तद्वत् उपमेयोपमा ततः ।
उत्प्रेक्षाथ ससन्देहो रूपकापह्नुती तथा ॥
× + + +
प्रधानं उपमां लक्षयति — साधर्म्यमिति ॥

End :

बद्धः श्रीजयरामेण रामेणेव महोदधेः ।
अलङ्काराम्बुधौ सेतुः सञ्चरन्तु बुधाः सुखम् ॥
अलङ्कारनिबन्धोऽयं रचितो न्यायविस्तरैः ।
न्यायालङ्कारनिपुणैः कृपया परिगृह्यताम् ॥

Colophon :

इति श्री महामहोपाध्यायश्रीजयरामन्यायपञ्चाननभट्टाचार्यरचितं काव्यप्रकाशतिलकं सम्पूर्णम् ॥

720

Sl No : 28436 काव्यप्रकाशव्याख्या Ms. No : C.2382/1

Beginning :

श्री जयरामः सुकृती नत्वा शम्भोः पदाम्भोजम् ।
काव्यप्रकाशटीकां तनुते विद्वद्विनोदाय ॥
समीहितसमारम्भे कार्ये शिष्टाचारपरम्परायातं मङ्गलं ग्रन्थकृदाचरति ॥

End :

शब्दमात्रालंकारस्य एतद्भेदस्य अत्र प्रकरणे अवश्यवाच्यतया तत्प्रसङ्गादुभयालंकारभूतोप्ययमत्रोक्तः + शशिभूषु + रित्यादौ केवलार्थाश्रयताप्यस्य बोध्या ।

Colophon :

कृतं श्रीजयरामेण नवमोल्लासदीपनम् ॥

721

Sl. No : 28437 काव्यप्रदीपः Ms No : C. 3028/2

Beginning :

सो नो देव्याः प्रथमतनयः केशवस्यात्मजन्मा
श्रीगोविन्दो रुचिकरकवेः स्नेहपात्रं कनीयान् ।
श्रीमन्नारायणचरणयोः सम्यगाधाय चित्तं
नत्वा सारस्वतमपि महः काव्यतत्त्वं व्यनक्ति ॥

End :

परिशीलयन्तु सन्तो मनसा सन्तोषशीले
× प्रदीपप्रकाशमपि यः ।
प्रकाशयति दीपकाद्विश्रयन्तु × स्वमतौ
सम्मटस्य × गोविन्दः शर्म विन्दति ॥

Colophon :

इति श्रीमहामहोपाध्याय श्रीगोविन्दविरचिते काव्यप्रदीपे अर्थालङ्कार-विवर्णनो नाम दशमः उल्लासः ॥ समाप्तः काव्यप्रदीपः ॥

722

Sl. No : 28438 काव्यप्रकाशटीका Ms. No: A. 149

Beginning

प्रियायाः पद्मायाः प्रणयकुपितायास्तुतिपरः
प्रसादं निर्मित्सुर्जलधिजनिवाणीपरिवृढः ।
परस्याः कौटिल्यात्कटुनि वचसि प्रोद्यति ततः
प्रदीप्तायां तस्यां जयति दिनमन्दस्कमलः ॥

कार्या × × पुरातनः ।
न्यायाचार्यमनङ्गीकृतपरपक्षं बहुज्ञमीशानम् ।
गुरुमिह नत्वा काव्यप्रकाशविस्तारिकां तनुमः ॥

End :

तदुक्तम् –स्थितेष्वनुप्रयोगेष्विति । विद्यमानेष्वित्यर्थः । किंच घटेन घट वद्भूतलमित्यादौ लौकिकवाक्ये यथाकथंचित्समर्थनेऽपि कार्यकारणयोर्मध्ये चेति भिन्नं पदम् । समुच्चये वा वसन्तिति चक्री । पितातव न कल्प्यत इति ।

Colophon :

— — —

723

Sl. No : 28442 काव्यप्रकाशटीका **Ms. No : P. 3302/1**

Beginning :

उल्लासपङ्क्तिं प्रतिपादयन् शब्दगतां व्यञ्जकतां प्रतिपाद्येदानीं अर्थगत प्रतिपादयितुमाह – अर्थाः प्रोक्ता इत्यादि ।। अर्थानां वाच्यलक्ष्यव्यङ्ग्यानां व्यञ्जकतोच्यते प्रतिपाद्यते ॥

End :

येन ग्रन्थसन्दर्भेण विकीर्णं प्रमेयजातं सङ्कलय्य प्रतिपाद्यते स ग्रन्थसन्दर्भः कृत इत्यर्थः । तेषु तेषु प्रकीर्णानां प्रमेयानामत्र सङ्कलनमेव ग्रन्थस्य प्रयोजन-मिति तात्पर्यार्थः ॥

Colophon :

इति श्रीभास्करमिश्रविरचितायां साहित्यदीपिकायां काव्यप्रकाशदीपिकायां दशम उल्लासः ॥

724

Sl. No : 28443 काव्यप्रकाशव्याख्या **Ms. No: B. 407**

Beginning :

भूत्योलेपनभूषितः प्रविलसन्नेत्राग्निदीपाङ्कुरः ।
कण्ठे पन्नगपुष्पदामसुभगः गङ्गाजलैः पूरितः ।

ईषत्ताम्रजटात्माषल्लवयुत: न्यस्तो जगन्मण्टपे
शम्भुर्मङ्गलकुम्भतामुपगतः भूयान्मम श्रेयसे ।
भावं काव्यप्रकाशस्य काव्यदर्पणबिम्बितम् ।
दृष्ट्वा मधुतीं टीकां कुरुते तत्सुतो रविः ।

End :

पित्रा काव्यप्रकाशस्य कृतो यः काव्यदर्पणः ।
युक्तिचूर्णेन तस्येदं मार्जनं विहितं मया ॥
मत्तोऽलंभिचिरजाता
मृदुपदविन्यासजनितजलक्कुतुका ।
भुवि मधुमतीति नाम्ना
टीका कन्याऽवगच्छतु ख्यातिम् ॥

Colophon :

इति श्रीमद्रविपाणिविरचिता मधुमत्याख्या टीका समाप्ता ॥

725

Sl. No : 28445 **काव्यप्रकाशव्याख्या** Ms. No : C. 2115

Beginning :

× वसुकृतानां लोकधात्र्याः समग्रं
विगलितमिव भूमौ नाकलोकस्य खण्डम् ।
नगरमतिगरीयः सर्वसंसारसार-
स्त्रिभुवनगिरिनाम्ना तत्र विख्यातमास्ते ॥
काश्यां सरस्वतीतीर्थयतिना तेन रच्यते ।
टीका काव्यप्रकाशस्य बालचित्तानुरञ्जनी ॥

End :

शत्रुकृत तिरस्कारः श्रवणानन्तरं कस्यचिद्राज्ञो वचनं असकृदाशत्रुणा कृत तिरस्कृतिः एत्य आगत्य यस्य मे कर्णौ तप्तसूचीव्यधकतिकरेण युनक्ति एष सोऽहं × × —

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीसरस्वतीतीर्थविरचितायां काव्यप्रकाश
. कायां चतुर्थ उल्लासः ॥

726

Sl. No : 28447 काव्यप्रकाशोदाहरणविवृतिः Ms. No : C. 1931

Beginning :

निजभक्तधुरीणस्य गिरं कर्तुं गरीयसीम् ।
स्तम्भादाविष्कृताकारं नमामि कुलदैवतम् ॥
आधाय हृदि वाग्देवी चरणाम्बुजमादरात् ।
कुर्वे प्रकाशसम्बद्धामुदाहरणचन्द्रिकाम् ॥

End :

अनल्पकविकल्पिता खिलसदर्थ मञ्जूषिका
सदन्वय विबोधिकां विबुधसंशयोच्छेदिकाम् ।
उदाहरणयोजना जनसज्जनाह्लादिकां (?)
उदाहरणचन्द्रिकां अकृत वैद्यनाथो × ताम् ॥
वियद्वेद × × अभ्यपूरयत ॥

Colophon :

इति श्रीमत्पदवाक्य प्रमाणाभिज्ञ धर्मशास्त्रपारावारीण × श्रीरामभद्र सूनुना वैद्यनाथेन रचितायां काव्यप्रकाशोदाहरणविवृतौ उदाहरणचन्द्रिकाख्यायां दशमः उल्लासः संपूर्णः ॥

727

Sl. No : 28448 काव्यप्रदीपोद्योतः Ms. No : A. 217

Beginning :

× कत्वमुक्तमिति न पौनरुक्त्यम्। सादृश्यवती चेति । उपमानोपमेययो रेव व्यतिरेकेऽपि न क्षतिरिति भावः । ब्रह्मणो निर्मितिरिति । उक्तविप्रति योग्यानुपादाने विप्रसिद्धत्वादित्यमेव तथेति भावः ॥

End :

अनेनेति । प्रकृतग्रन्थरूपमिति शिवम् ।
शृङ्गिवेरपुराधीशाद्ग्रामतोलब्ध जीविकः ।
तद्युक्तिमुक्तासन्दर्भैः विद्वत्श्रुतिमनोरमैः ॥

सेतौ नागेशबद्धेऽस्मिन् अलङ्कारमहोदधेः ।
सतां मतिस्संचरतां यावच्चन्द्रदिवाकरौ ॥
काव्यप्रदीपकोद्योतः शिवयोरर्पितो मया ॥
यन्निर्मितौ सहायो मे सा प्राप्ता प्रतिभासखी ॥

Colophon :

इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते लघुकाव्यप्रदीपोद्योते दशम उल्लासः ॥

728

Sl. No : 26449 काव्यानुशासनम् Ms. No : P. 8347/1

Beginning :

अकृत्रिमस्वादुपदां परमार्थाभिधायिनीम् ।
सर्वभाषापरिणतां जैनीं वाचमुपास्महे ॥
शब्दानुशासनेऽस्माभिस्साध्व्यो वाचो विवेचिताः ।
तासामिदानीं काव्यत्वं यथावदनुशिष्यते ॥

End :

पृष्टे पृष्टे वान्यापो × रोक्तिः परसंख्या ।
यथोत्तरपूर्वस्य हेतुत्वे कारणमाला । स्वातन्त्रा न्तगत्वसंशयैः कपद्यैरेषामेकत्र स्थितिस्संकरणः ॥

Colophon :

इत्याचार्यहेमचन्द्रविरचितेऽलङ्कारचूडामणौ काव्यानुशासने शब्दार्थालङ्कारवर्णनं नाम षष्ठोऽध्यायः ॥

729

Sl. No : 26450 काव्यादर्शः Ms. No : A. 725/1

Beginning :

चतुर्मुखमुखांभोजवनहंसवधूर्मम ।
मानसे रमतां दीर्घं सर्वशुक्ला सरस्वती ॥
पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च ।
यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम् ॥

End :

तथापि कटुवर्णानां कवयो न प्रयुञ्जते ।
ध्वजनी तस्य राज्ञः केतुदस्तजलदेत्यदः ॥
वर्णानां न्यूनताधिक्ये गुरुलघ्वयथास्थितिः ।
तत्र तत् भिन्नवृत्तं स्यात् एष दोषस्सुनिन्दितः ॥

Colophon :

— — —

730

Sl. No : 26451 काव्यादर्शव्याख्या Ms. No : P 3518

Beginning :

× स्वजिते सन्निधिं प्रार्थयते ।
चतुर्मु × वनहंस ×
× से रमतां दीर्घं सर्वशुक्ला सरस्वती ॥

End :

इति प्रथमद्वतीयपरिच्छेदोक्ताः शब्दार्थालङ्काराः तृतीयपरिच्छेदोक्ताः यमकादिविषयाः सुकरदुष्करादिमार्गाः अपार्थादयो दोषाः तद्गुणीकरणेनोक्ता गुणाश्च संक्षिप्योक्ता इति प्रबन्धस्य प्रयोजनं प्रबन्धपरिशीलफलं कवित्वं तस्य स्वर्गतिवासफलकीर्तीरिति × × यसौहित्यम् । येनेह प्राप्तस्तेन काव्यादर्शव्याख्या विनिर्मिता ॥

Colophon :

इति काकायवादर्शव्याख्या समाप्ता ॥

731

Sl. No : 26454 काव्यालङ्कारः Ms No : A. 481

Beginning :

प्रणम्य सार्वं सर्वज्ञं मनोवाक्कायकर्मभिः ।
काव्यालङ्कार इत्येष यथाबुद्धि विधास्यते ॥
धर्मार्थकाममोक्षेषु वैचक्षण्यकलासु च ।
प्रीतिं करोति की^त च साधु काव्यनिबन्धनम् ॥

End :

षष्टया शब्दस्य शुद्धिस्स्यात् इत्येवं वस्तु पञ्चकम् ।
उक्तं षड्भिः परिच्छेदैः भामहेन क्रमेण वः ॥

Colophon :

— — —

732

Sl. No : 28456 काव्यालङ्कारवृत्तिव्याख्या Ms. No : P. 3629/3

Beginning :

कल्याणानि करोतु वस्स भगवान् क्रीडावराहाकृतिः
दंष्ट्राग्रेण नवप्ररोहपुलकां देवीं धनामुद्वहन् ।
यस्याङ्गेषु वहन्ति रोमविवरालग्ना महाम्भोधयः
कान्तास्पर्शसुखादिव प्रकटितां स्वेदोदबिन्दुश्रियम् ॥

\+ \+ \+ \+

घटयति कामितमर्थं काव्यालङ्कारकामधेनुरियम् ॥

End :

पर्यालोचनं कर्तव्यमिति भद्रम् ।
इत्थं समिद्धगुण + कवीनाम् ॥
न्यायोक्ति वीचि + विचरन्तु धीराः ॥

\+ \+ \+ \+

यस्याः स्वीयगुणागुणास्सुरुचिराः शृङ्गार चेष्टादयः ।
रम्याष्टादशवर्णनाः कृतिवधूः सेयं जगन्मोहिनी ॥

Colophon :

इति गोपेन्द्रभूपति भूपालविरचितायां वामनालङ्कारसूत्रवृत्तिव्याख्यायां काव्यालङ्कारकामधेनौ प्रायोगिके पञ्चमेऽधिकरणे द्वितीयोऽध्यायः ॥
इति कृतरचनेयमिन्दुवंश + पूर्तिमेतत् ॥
समाप्तमिदं प्रायोगिकं पञ्चमधिकरणम् । समाप्ता चेयं काव्यालङ्कारकामधेनुः ॥

733

Sl. No : 28459 काव्यालङ्कारसूत्रम् Ms. No : P. 3103/2

Beginning :

काव्यं खलु ग्राह्यमलङ्कारात् ॥
सौन्दर्यमलंकारः ॥
सदोषं गुणालंकारहानादानाभ्याम् ॥
शास्त्रतस्तौ ॥

End :

कस्कादिषु पाठानियमाच्च ॥
नांगुलीसंगे सति मूर्धन्यविधेः ॥
तेनावन्तिसेनादयः प्रत्युक्ताः ॥
नेन्द्रवाहनशब्दे एत्वमाहितस्यापि × स्वात् ॥

Colophon :

इति प्रायोगिके पञ्चमे पञ्चमेऽधिकरणे द्वितीयोऽध्यायः ॥
इति वामनविरचितकाव्यालंकारसूत्रपाठः समाप्तः ।
अध्याये प्रथमे काव्यप्रयोजनपरीक्षणम् ।
+ + + +
इत्येषा द्वादशाध्यायी प्रमेयाणामनुक्रमः ॥

734

Sl. No : 28461 काव्यालङ्कारसूत्रवृत्तिः Ms. No : P. 3629/2

Beginning :

विपश्चिच्चित्तराजीववनहंससरस्वती ।
सपक्षपाता सततं मानसे रमतां मम ॥
प्रणम्य परमं ज्योतिः वामनेन कविप्रिया ।
काव्यालंकारसूत्राणां स्वेषां वृत्तिर्विधीयते ॥
काव्यं खलु ग्राह्यं — उपादेयं भवति अलंकारात् । काव्यशब्दोऽयं —

End :

स्वस्वामिभावमात्रं ह्यत्र विवक्षितम् । तेन सिद्धमिन्द्रवाहनमिति ॥
सदसन्तो मया शब्दाः विविच्यैवं निदर्शिताः ।
अनयैव दिशा कार्यं शेषाणामप्यवेक्षणम् ॥

Colophon :

इति काव्यालङ्कारवृत्तौ आचार्यवामनविरचितायां प्रायोगिके पञ्चमेऽधिकरणे द्वितीयोऽध्यायः ॥ समाप्तमिदं प्रायोगिकं पञ्चममधिकरणम् । समाप्ता चेयं काव्यालङ्कारवृत्तिः ॥

735

Sl No 28465 कृष्णालङ्कारदर्पणम् Ms. No : P. 4566

Beginning :

गौरीदृक्कैरवानन्दकारिणी सितचन्द्रिका ।
चन्द्रचूडी विमोहान्धतमसं विदधातु माम् ॥
श्रीकृष्णेन्द्रमहीपालो महीशूरपुराधिपः ।
भूदेवेन्द्रपदं यस्मिन् यौगिकं स विराजते ॥
तद्यशोवर्णनं कुर्वे शतालङ्कारसंग्रहम् ।
जिज्ञासुसुखबोधाय कृष्णालङ्कारदर्पणम् ॥

End :

इत्थं शतमलङ्कारा × मत् ।
श्रीकृष्णेन्द्रमहाराजयशोवर्णनकैतवात् ॥
दोषज्ञा एव कृतिनस्तथापि कृपया मयि ।
लालयन्तु कृतिं दृष्ट्वा × पि कुर्वे नमश्शतम् ॥
लवलीसरसापाङ्गसूचितापाङ्गसङ्गरः ।
स्वोत्कण्ठावेदकस्मेर वदनो × ॥

Colophon :

इति कोलाहल नगरवास्तव्येन लक्ष्मीपति नाम्ना विरचिता कृष्णालङ्कार दर्पणाख्या कृतिः संपूर्णा ॥

736

Sl. No : 28466 चन्द्रलोकः Ms. No : P. 1458/3

Beginning :

परस्परतप + जायापती स्तुमः ।।
अलङ्कारेषु बालानामवगाहनसिद्धये ।
ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ।।

End :

अष्टौ प्रमाणालंकाराः प्रत्यक्षप्रमुखाः क्रमात् ।
एवं पञ्चदशाप्यन्यानलङ्कारान् विदुर्बुधाः ।।

Colophon :

इति चन्द्रालोकनं नमालङ्कारशास्तं सम्पूर्णम् ।।

737

Sl. No : 28480 कुवलयानन्दः Ms. No : P. 1637

Beginning :

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ।।

End :

एवमन्यत्रापि उदाहरणान्तराण्यूह्यानि ।
अमुं कुवलयानन्दमकरोदप्पदीक्षितः ।
नियोगाद्वेङ्कटपतेर्निरुपाधिकृपानिधेः ।।
चन्द्रालोको विजयतां शरदागमसम्भवः ।
हृद्यः कुवलयानन्दो यत्प्रसादादभूदयम् ।।

Colophon :

इति श्रीमदद्वैतविद्याचार्य श्रीमद्भारद्वाजकुलजलधिकौस्तुभ श्रीरङ्गराजाध्वरीन्द्रवरसूनोः श्रीमदप्पयदीक्षितस्य कृतिः कुवलयानन्दः समाप्तः ।।

738

Sl. No : 28502 **चन्द्रालोकव्याख्या** Ms. No : C. 2234/2

Beginning :

अश्नुवः तन्मुन्दे × वस्तु वामाङ्गसुन्दरम् ।
यतस्तृतीयं विदुषां तुरीयो × महः ॥

× सिद्धये इष्टदेवतां स्तौति परस्परेति प्राञ्चौ पुरातनौ जायापती अर्था दुमामहेश्वरौ स्तुमः ॥

End :

तस्य च अङ्गाङ्गिभावेन सङ्करः इति सूक्ष्ममतिभिः विभावनीयम् ।
एवमन्यत्राप्युदाहरणान्तरण्यूह्यानीति सर्वमनवद्यम् ॥
श्रीरामकृष्णविदुषा रचिता रसज्ञ
चित्तप्रमोदजननी लघुचन्द्रिकाऽभूत् ।
इयं कुवलयानन्दचन्द्रिकाऽर्थावलम्बिनी
चन्द्रालोकलघुव्याख्या जीयादाचन्द्रतारकम् ॥

Colophon :

इति चन्द्रालोकचन्द्रिका समाप्ता ॥

739

Sl. No : 28503 **चन्द्रालोकव्याख्या** Ms. NO : P. 3554/2

Beginning :

अथार्थालङ्काराणां मध्ये प्रधानत्वात् प्रथममुपमा निरूप्यते — सा च संक्षेपतो द्विविधा पूर्णा लुप्ता चेति । उपमानोपमेयसाधारणधर्मोपमावाचकानां चतुर्णां प्रयोगे पूर्णेतेति । अत्र प्रथमार्धं लक्षणम् द्वितीयार्धमुदाहरणम् । एवमुत्तरत्रापि प्रायशः पूर्वार्धवल्लक्षणमुत्तरार्धवल्लक्ष्यमित्यवगन्तव्यम् । लक्षण वाक्यं व्याख्यायते ॥

End :

वेङ्कटप्रभोः कटाक्ष· विदुषां लक्ष्मीविलासाः सम्पत् समृद्धयो भवन्तीत्यर्थः सर्वोत्कर्षेण वर्तते । अत्र दानमहोत्सवायुष्करार्थानामवि × सहेतुत्वादि नाश्रिते राज्ञे आयुष्यविश्वासत्वादिवर्णितत्वात् हेतुहेतुमतोः वर्णनात्मकः हेत्वलङ्कारः ॥

Colophon :

इति श्रीरामभूपालसभाभूषण श्रीवेङ्कळसूरिविरचितायां चन्द्रालोकव्याख्यायां बुधरञ्जिनीसमा × लङ्कारप्रकरणं समाप्तम् ॥

740

Sl. No : 28505 चन्द्रालोकव्याख्या **Ms. No: C. 3916/2**

Beginning

वृन्दावने खेलति राधिकासमं
कर्णावतंसीकृतफुल्लपद्मे ।
रहस्समालम्ब्य शरत्सुधांशुः
कलङ्कितामाप स पातु माधवः ॥ (?)
नत्वा गुरुं वैद्यनाथः पायगुण्डेतिकीर्तितः ।
व्याख्यां रमाख्यां तनुते चन्द्रालोकविलासिनीम् ॥ +

सा प्रसिद्धा वर्णनीया वा वाग्रूपा देवता दीव्यतु सर्वोत्कर्षेण वर्तताम् । क्रीडतां द्योततां मोदतां वेत्यन्वयार्थौ ॥ भक्तवदन इति शेषः

End :

स्वादिकीर्तये आह + जयन्तीति । संज्ञापक्षेसूक्तीति बहुव्रीहिः योगस्तु स्फुट एव । गिरः उक्तरूपाः जयन्ति निर्दुष्टत्वादिति भावः ॥

Colophon :

इति श्रीमत्पायगुण्डोपाख्यवैद्यनाथविरचिते चन्द्रालोकव्याख्याने रमाभिधेये दशमो विलासः ॥

741

Sl. No : 28506 चन्द्रालोकव्याख्या **Ms. No: B. 1066/2**

Beginning :

श्रीमान् × × तम् ।
भूयान्नृसिंहो भगवान् श्रेयसे भूयसे मम ॥
अलंकृतीनामर्थानां लक्ष्यलक्षणसङ्ग्रहः ।
चन्द्रालोकानुरोधेन × करवाण्यहम् ॥

यद्यप्यप्पय्यदीक्षितैः कुवलयानन्दव्याख्यानिबन्धेन चन्द्रालोकतात्पर्यं प्रका
शितम् । तथापि केषां चिदलंक्रियाणां अप्रणयनात् तत्प्रणयनार्थमिदं—
प्रियसखी निशामध्ये भास्वानुदयशिखरिण्यस्तमयते × रजनीमिह
नित्योषःरतिं निषेध्यन्तं तं प्रत्यवदपकर्तां ×

Colophon :

— — —

742

Sl. No : 28509 चन्द्रालोकव्याख्या Ms. No : P. 5355

Beginning :

एकप्रबोधमुद्रां कलयन्नन्यत्र पुस्तकं पाणौ ।
व्याकुर्वन्निगमान्तरे वः पायाद्वटद्रुतलवासी ॥
गङ्गाधराध्वरी प्राज्ञः तनोति विदुषां मुदे ।
हृद्यां कुवलयानन्दटीकां रसिकरञ्जनीम् ॥

End :

अत एवमिदमन्वर्थं नाम भेदस्वरूपस्य सर्वथैव तिरोधानात् सामान्ये तु
व्यक्तीनां परस्परभेदापगमेऽपि व्यावर्तक × नुपलम्भमात्रं सादृश्यादुप
निबध्यते । मुखानां कमलानां च परस्परव्यावर्तक ×

Colophon :

— — —

743

Sl. No : 28518 कुवलयानन्दटीका Ms. No : C. 993

Beginning :

अनुचिन्त्यमहालक्ष्मीं हरिलोचनचन्द्रिकाम् ।
कुर्वे कुवलयानन्दसदलङ्कारचन्द्रिकाम् ॥
चिकीर्षिताविघ्नसिद्ध्यै इष्टदेवतां स्तौति — अमरीति ।

End :

विद्वद्वृन्दमहामान्यरामचन्द्रात्मजन्मना ।
विदुषा वैद्यनाथेन कृतालंकारचन्द्रिका ॥
एनां कुवलयानन्दं + तत्त्वविशारदाः ॥
असौ कुवलयानन्दः चन्द्रलोकोऽस्थितोऽपि सन् ।
प्रतिष्ठां लभते नैव विनालंकारचन्द्रिकाम् ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणतत्सद्रामभट्टात्मजवैद्यनाथकृत अलंकारचन्द्रिकाख्या कुवलयानन्दटीका समाप्ता ॥

744

Sl. No : 28521 कुवलयानन्दव्याख्या **Ms. No : C. 2510/3**

Beginning :

पञ्चब्रह्मविराजमानशमना कामेश्वरांकस्थिता
कर्पूरांचितवीटिकाकणलसद्बिम्बाधरोष्ठी मुदा ।
पायान्मां मदनारिचित्तकुमुदोल्लासक्रियाशक्तिमु-
द्रारौ चन्द्रमुखी निरंतरतपश्शिष्टा वने सम्मुखी ॥
हृद्यां कुवलयानन्दटीकां भावप्रकाशिकाम् ।
करोमि बालबोधार्थं संग्रहेणातिसादरम् ॥

End :

असंबन्धे संबन्धरूपस्येति — अत्र जलसेचनप्रक्रियागौरवविफलत्वस्या-संबन्धेऽपि संबन्धकल्पनं अतिशयोक्तिरिति तात्पर्यम् । + सन्देहेति कुत इत्यत आह – एकालंकारेति । फलितमह–तस्मादिति । समप्राधान्यसन्देह संकरव्याप्तत्वादिति भावः ।

Colophon :

इति श्रिमत्कोडूरुवंशमौक्तिकायमान श्रीमच्छांकरेण विरचितायां कुवलयानन्दटीकायां भावप्रकाशिकाख्यायां एकवाचकानुप्रवेशसंकरः । +
इति कुवलयानन्दव्याख्या भावप्रकाशिकाख्या संपूर्तिमगमत् ॥

745

Sl. No : 28524 | चित्रमीमांसा | Ms. No : P. 391

Beginning :

अभिवन्द्य चन्द्रशेखरमाद्यं गौरीसखं परंज्योतिः ।
वितनोमि विपुलविषयां विशदार्थामर्थचित्रमीमांसाम् ॥
त्रिविधं तावत्काव्यम् ध्वनिमद्गुणीभूतव्यङ्ग्यचित्रभेदात् ॥

End :

उपमान सह × पमेयोपमा यथा नन्वयस्मरणं रूपकपरिणतिसंशयभ्रान्ति मदुल्लेख × ति उत्प्रेक्षा अप्यर्थ चित्रमीमांसा × मांसला । अ × हरिवतीक्ष्णां भूर्धेन्धुरिव धूर्जटेः ॥

Colophon :

इति चित्रमीमांसा समाप्ता ॥

746

Sl. No : 28535 | चित्रमीमांसाव्याख्या | Ms. No A .800

Beginning :

यदर्धाङ्गं नारी विलसति पराकान्तिरुचिरा
परं पुंसो रूपं जयति च जटाजूटरुचिरम् ।
सदा शृङ्गारित्वं वहति वपुषैवं त्रिभुवने
नमस्तस्मै कस्मैचिदखिलविवर्ताय महसे ॥
नत्वा गुरुं कृपासिन्धुं पित्रोश्च चरणद्वयम् ।
करोमि चित्रमीमांसाव्याख्यां विद्वन्मुदे सुधाम् ॥

End :

या निशा सर्वभूतानां + सा निशा पश्यतो मुनेः ॥
इत्यादौ स्पष्टत्वादिति सर्वं शिवम् ।
धरानन्देन रचिताऽतिशयोक्त्यर्थबोधिनी ।
व्याख्यार्थचित्रमीमांसा सुधायामाप पूर्णताम् ॥

Colophon:

इति श्रीचित्रमीमांसाव्याख्या सुधाख्या पूर्णतामगमत् ॥

747

Sl. No : 28538 दशरूपकम् Ms. No : P. 1164a

Beginning :

नमस्तस्मै गणेशाय यत्कर्णः पुष्करायते ।
मदाभोगघनध्वानः नीलकण्ठस्य ताण्डवे ॥
दशरूपानुकारेण विष्णवे भरताय च ॥
उद्धृत्योद्धृत्य सारं + लक्षणं संक्षिगाभि ॥

End :

अथ करुणः—

इष्टनाशादनिष्टाप्तेः शोकात्मा करुणो रसः ।
विश्वासोच्छ्वासरुदितस्तम्भप्रलपितादयः ॥
विषादजडतोन्माद + व्यभिचारिणः ॥
विष्णोस्सुतेनापि धनञ्जयेन + दशरूपमेतत् ॥

Colophon :

— —

748

Sl. No : 28545 दशरूपकव्याख्या Ms. No : P. 1164b

Beginning :

सदाचारं प्रमाणयताऽविघ्नेन प्रकरणपरिसमाप्त्यर्थमिष्टाया देवतायाः प्रकृताभिमतयोश्च देवतयोः नमस्कारः क्रियते कृतिना श्लोकद्वयेन – नमस्तस्मै ॥

End :

उपमादिष्वलंकारेषु च हर्षोत्साहादिष्वन्तर्भावान्न पृथगुक्तानि ॥—
रम्यं जुगुप्सितमुदारमथापि नीचं +
तन्नास्ति यन्न रसभावमुपैति लोके ॥
विष्णोस्सुतेनापि धनञ्जयेन
विद्वन्मनोरागनिबन्धहेतुः ।
आविष्कृतं मुञ्जमहीशगोष्ठी-
वैदग्ध्यभाजा दशरूपमेतत् ॥

Colophon :

इति दशरूकावलोकने धनिकविरचिते चतुर्थः प्रकाशः ॥ समाप्तं-चेदं नाटकलक्षणम् पादाघातापशोकः तिलकघरणिजो दर्शनात् + + वकुलश्चन्दने × देन ॥

749

Sl. No : 28552 नञ्जराजयशोभूषणम् Ms. No P. 467/1

Beginning :

वन्देऽहं वन्दनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लिकाम् ॥ + +
शिवराममुधीसूनोर्नरसिंहकवेः कृतिः ।
नञ्जराजगुणग्रामैर्भूषिता भुवि दीव्यतु ॥

End :

बाणीयं भुवि वर्ततां बुधजनश्लाघ्यो त्रिलोकीजुषां +
नित्यं नञ्ज × महेन्द्रहृदये वासं विधत्तां मुदा ॥
अलङ्कृतिरुमलकवेरभिनवभवभूतिनामविरुदस्य ।
सुहृदा नृसिंहकविना व्यरचि कृतिर्नव्यकालिदासेन ॥

Colophon :

इति श्री परमशिवावतार शिवरामदेशिकचरणारविन्दानुसन्धानमहिमसम-साधितसहाय दैनन्दिनप्रबन्धनिर्माण साहसिक निखिलविद्वज्जनलालनीयसरस-साहितीसंप्रदायप्रवर्तक नरसिंहकविरचिते नञ्जराजयशोभूषणे अलंकारशास्त्रे अलंकारनिरूपणं नाम सप्तमोविलासः ॥

750

Sl. No : 28566 प्रतापरुद्रीयम् Ms. No : P. 542

Beginning :

विद्याकैरवकौमुदीं श्रुतिशिरस्सीमन्तमुक्तामणिं
दारान् पद्मभुवस्त्रिलोकजननीं वन्दे गिरां देवताम् ।

यत्पादाब्जनमस्क्रियास्सुकृतिनां सारस्वतप्रक्रिया
बीजन्यासभुवो भवन्ति कवितानाश्यैकजीवातवः ॥
पूर्वेभ्यो भामहादिभ्यः सादरं विहिताञ्जलिः ।
वक्ष्ये सम्यगलङ्कारशास्त्रसर्वस्वसंग्रहम् ।।
प्रतापरुद्रदेवस्य कीर्तिर्येन प्रकाश्यते ॥

End :

उपमितं व्याघ्रा + स्सामान्याप्रयोग इति अनुशासनेन सामान्यप्रयोगस्य उपमेयाबाधकत्वात् । अतः पारिशेष्यात् रूपकालङ्कारः । एवं यथासम्भवमन्येषामपि अलङ्काराणां संसृष्टिसङ्करौ बोध्यौ ।

Colophon :

इति महोध्यपायविद्यानाथकृतौ प्रतापरुद्रयशोभूषणे अलङ्कारप्रकणं समाप्तम् ॥

751

Sl. No : 28595 प्रतापरुद्रीयव्याख्या **Ms. No : P. 99?/2**

Beginning :

वन्दे वन्दारुमन्दारमिन्दुचूडस्य नन्दनम् ।। +
अमन्दानन्दसन्दोहबन्धुरं सिन्धुराननम् ॥
स्वामी विपश्चिद्वितनोति टीकां
प्रतापरुद्रीयरहस्यसेतीम् ॥ +
+ मङ्गलमादौ निबध्नाति– विद्येति ॥

End :

प्रबन्धान्तरेषु द्रष्टव्य इत्याह– एवमिति ।
विवेकिनां एतावतैव इतरदपि बोधयामः ॥ विस्तरभीरुभिः अस्माभिः उपरम्यते इति सर्वमवदातम् ॥ जगति विमृश्यम् ।।

Colophon :

इति पदवाक्यप्रमण पारावारपारीण श्रीमहोपाध्याय कोलाचल मल्लिनाथ सूरिणः विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्य अनुजेन कुमारस्वामि

सोमपीथिना विरचिते प्रतापरुद्रीय ाख्याने रत्नापणाख्याने मिश्रालङ्कार निरूपणं नाम नवमं प्रकरणम् ॥

752

Sl. No : 28628 रसगङ्गाधरः Ms. No : P. 1435

Beginning :

स्मातापितरुणातपं करुणया हरन्ती नृणां
अभंगुरतनुत्विषां वलयिताशतैर्विद्युताम् ।
कलिन्दगिरिनन्दनीतटसुरद्रुमालिङ्गिनी
मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी ॥

End :

अत्रोत्तरप्रतिपत्त्या तिरस्कृतत्वात् पूर्वत्र × रित्वं किन्तूत्रप्रतीतेरेवेति तथैव व्यपदेशो न्याय्यः । अन्यथा व्यतिरेकेप्युमापत्तेः विरोधाभासस्तु पूर्वोतर प्रतीतिद्वयोक्त इति भवति चमत्कारी ॥

Colophon :

इति श्री जगन्नाथ पण्डित विरचिते रसगङ्गाधरे सामान्यालङ्कारप्रकरणम् ।

753

Sl. No : 28611 भषालक्षणम् Ms. No P.9565/2

Beginning :

अथ द्रष्टणां प्रतिपत्तिसौकर्याय रूपकपरिभाषोक्तं भाषाणां स्वरूपं विनियोगश्च कथ्यते । भाषा द्विविधा संस्कृता प्राकृता चेतिभेदतः । कौमार पाणिनीयादिरसंस्कृता संस्कृता भवेत् ॥

End :

तद्भवा संस्कृतभवा सिद्धा साध्येति सा द्विधा ।
द्विविभाश्चा + सिध्यर्थं विकृतं लक्षणं भवेत् ॥

Colophon :

— — —

754

Sl. No : 28614 | यमकोदाहरणम् | Ms. No : C. 2879

Beginning :

विभिन्नाप्येकरूपायां या वृत्तिर्वर्णसंहतेः ।
अव्यपेतव्यपेतात्मा यमकं तन्निगद्यते ॥
तदव्यपेतयमकं व्यपेतं यमकं यथा ।
स्थानास्थानेऽपि पादाभ्यां पादभेदाच्च भिद्यते ॥

End :

तस्या विनापि हारेण निसर्गादेव हारिणौ ।
जनयामासतुः कस्य विस्मयं न पयोधरे ॥
अत्र हारिणाविति—
वि × नाममस्थान रूढव्रणकिणाकृति ।
विभाति हरिणीभूता शशिनो × छनच्छवि ॥
अत्र हरिणीभूतेति ॥

Colophon : — — —

755

Sl. No : 28615 | रघुनाथभूपालीयम् | Ms. No: P. 1665/1

Beginning :

पदवाक्यप्रमाणज्ञैर्भावो भाव्यो चमत्कृतेः ।
प्लवमानो न विन्दन्ति पारावारान्तरे मणीन् ॥
राज्ञः सन्ति गुणाः कस्य रघुनाथ × वत् ।
ओदार्यशौर्यसौन्दर्यसाम्राज्यमहिमादयः ॥

End :

श्रुतिकटुत्वादेः रसापकर्षापादनेन दोषत्वाभ्युपगमात् । न चैवं सौकुमार्या-
देरपि रसोत्कर्षापवादेन गुणत्वमभ्युपगम्येत तदा दोषाभात्वेनापि रसोत्कर्षा-
पादकत्वमिति सर्वं समञ्जसम् ॥ +
आचन्द्रं वर्ततां कीर्तिरामार्ताण्डं पराक्रमः ॥
आकल्पं गुणौदार्य रघुनाथमहीपतेः ॥

Colophon :

इति रघुनाथभूपालकृपालनातिशयसरसकवितासं × श्रीकृष्णयज्वकृतौ रघुनाथभूपालीये अलङ्कारशास्त्रे गुणनिरूपणं नामाष्टमो विलासः ॥

756

Sl. No : 28618 रघुनाथभूपालीयव्याख्या Ms. No : P. 4993/1

Beginning :

श्रीमत्कौशिकयज्ञरक्षणकृतक्षेमैकशुश्रूषया
तातै प्रेमभरात्समं पुरजनैस्तातस्सतान्वेषिणि ।
वैदेहीरघुवीरयोरुपनुता वैवाहिकी पत्रिका
तत्रादद्रघुनाथभूमिपतये दत्तां मुदं श्रेयसीम् ॥

End

आचन्द्रमिति । आचन्द्रं वर्ततां कीर्तिरामार्ताण्डं पराक्रमः ।
आकल्पं पुनरौदार्यं रघुनाथमहीपतेः ॥
तेन × × स्तन्मुदे
तत्तादृग्विजयीन्द्रसंयमिमणेः षड्दर्शिनीदर्शिनः ।
शिष्यो व्याकुरुते सुन्धीन्द्रयतिराट्कृष्णाध्वरीन्द्रादित-
द्ग्रन्थं तद्गुणबन्धुरं रसगुणालङ्कारझङ्कारितम् ॥

Colophon :

× हंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीमद्विजयीन्द्रतीर्थपूज्यचरण शिष्येण सुधीन्द्रयतिना विरचितायां साहित्यसाम्राज्यसमाख्यायां रघुनाथ भूपालीयव्याख्यायामष्टमो विलासः ॥

756a

Sl. No : 28622 रसकलिका Ms. NO : P. 5082

Beginning :

यामिनीवेन्दुना मुक्ता नारीव रमणं विना ।
लक्ष्मीरिव ऋते त्यागात् न वाणी भाति नीरसात् ॥
लोके रसमयं काव्यं ग्राह्यं नूतनमाल्यवत् ।
नीरसं तु पुनः काव्यं × × बुधः ॥

End :

शमार्जुनगतिस्तयोरिति भार्गवकार्तवीर्ययोः । अर्थे स्थाणुं भज भवच्छिदे इति हरेः प्रकरणे सर्वं जानाति देवदत्तः । एवमन्यदपि द्रष्टव्यम् । तद्युक्तो व्यञ्जनशब्दः । तद्युक्तः व्यञ्जनयुक्तः इत्यर्थः ॥

Colophon :

इति रसकलिका समाप्ता ॥

757

Sl. No : 28610 भावप्रकाशः **Ms. No: P. 3846**

Beginning

अनुभावस्य सामान्ये सत्यप्यर्थे × यथा ।
लक्षणं × भेदश्च वेपथुः ॥
वैवर्ण्यं प्रलय इत्यष्टौ सात्विका मताः ॥

End :

योजकः स्मर्यते यत्र × × ।
× × वच्छब्दः पुरुषस्तत्र योजकः ॥
यो वर्णः केन चित्ख्यातः तस्मिन्न + ।
× × सङ्केन वर्जितः ॥
सङ्केतास्तत्र मन्त्राणां तेनैव परिकीर्तिताः ॥

Colophon :

— — —

758

Sl. No : 28633 रसप्रकरणम् **Ms. No: P. 6156**

Beginning :

अस्तु वः स्वस्तिदं वस्तु वद्दायादि रसास्पदम् ।
जाया यस्य रसाख्यादिः रसयोनिश्च तत्सुतः ॥
न विस्तरो न संक्षिप्तो रसप्रकणक्रमः ।
सुखेर्ज्ञातःवाऽखिलैर्धार्यो यद्वदेवं निबध्यते ॥

End;

स्मृत्यावेगोऽपि शान्ते स्वतिधृतिरपि निर्वेद एवं क्रमेण
भावाश्चेत्तत्र तत्र स्थितमितरमिदः ते रसाः प्रस्फुरन्ति ।
पूर्वग्रन्थे रसालकाण्डनिवहात्पीड्य हृद्यन्त्रतः (?)
तत्सारै रुचितान् रसप्रकरणे संमिश्रय कांश्चित् क्रमात् ॥
× × पुस्तकं तिरुमलाचार्यप्राप्तः
ग्रन्थोऽयं लघुशर्करेव रसिकैः सानन्दमास्वाद्यताम् ॥

Colophon :

रसप्रकरणं समाप्तम् ॥

759

Sl No 28636 रसतरङ्गिणी Ms. No : C. 1158

Beginning :

लक्ष्मीमालोक्य लुभ्यन्निगममुपहसन् शोचयन्यज्ञजन्तून्
क्षत्रं शोणाक्षि पश्यन् समिति दशमुखं वीक्ष्य रोमाञ्चमञ्चत् ।
हृत्वा हैयङ्गवीनं चकितमपसरन् म्लेच्छरक्तैर्दिगन्तान्
खिंचन् दन्तेन भूमिं तिलमिव तुलयन् पातु वः पीतवासाः ॥
भारत्या श स्वकान्तारश्रान्तायाः शान्तिकारिणी ।
क्रियते भानुना भूरिरसा रसतरंगिणी ॥

End :

विद्वद्वारिधराः स्नेहं तथा वर्षन्तु सन्ततम् ।
लभते विपुलां वृद्धिं यथा रसतरंगिणी ॥
अवगाहस्व वाग्देवि दिव्यां रसतङ्गिणीम् ।
अस्मत्पद्येन यमेन रचय श्रुतिभूषणम् ॥
यावद्भानोः सुता कापि कालिन्दी भुवि वर्तते ।
तावत्तिष्ठतु मे भानोरेषा रसतरंगिणी ॥

Colophon :

इति श्रीभानुदत्तमिश्रविरचितायां रसतरंगिण्यां प्रकीर्णकं नामाष्टमस्तरङ्गः ॥

760

Sl. No : 28642 **रसतरङ्गिणीव्याख्या** **Ms. No: C. 2715/2**

Beginning :

लीलागृहीतगात्रं नवरसपात्रं सुतं यशोदायाः ।
श्रीभानुतरङ्गिण्या नौकायाः कर्णधारमहमीडे ॥
गङ्गारामेण मया यत्नात्कोपादिव बलरामेण ।
प्राक् प्रवणाप्यर्वाक् प्रवणासौ क्रियते तरङ्गिणी भानोः ॥

End :

पत्या सुस्वर्गखाभिमुख्यपदवीं यातुं समुत्कण्ठया
यस्य स्यात्स्मृतिराधया दिनकरो जीवातुरालक्षितः ।
अस्माकीनकृतिद्विदर्विविगलच्छास्त्रामृताप्यायितं
यं चामंस्त सुतेन सोऽस्य फलितं शार्दूलविक्रीडितम् ॥

Colophon :

इति श्रीजाज्जुपनामक गङ्गारामविरचितायां नौकाख्यायां रसतरङ्गिणी व्याख्यायामष्टमस्तवङ्गः । समाप्तश्चायं ग्रन्थः ॥

761

Sl. No : 28647 **रसमञ्जरी** **Ms. No : P. 4051/1**

Beginning :

आत्मीयं चरणं दधाति पुरतो निम्नोन्नतायां भुवि
स्वीयेनैव करेण कर्षति तरोः पुष्पं श्रमाशङ्कया ।
तल्पे किञ्च मृगत्वचा विरचिते निद्राति भागैर्निजैः
अन्तः प्रेममरालमां प्रियतमामङ्गे दधानो हरः ॥

End :

तातो यस्य गणेश्वरः कविकुलालङ्कारचूडामणिः
देशो यस्य विदेह भूसुरसरित्कल्लोलकिर्मीरिता ।
पद्येन स्वकृतेन कविना श्रीभानुना योजिता (?)
वग्देवी श्रुतिपारिजातकलिकास्पर्धाकरी मञ्जरी ॥

Colophon :

इति भानुदत्तमिश्रविरचिता रसमञ्जरी समाप्ता ॥

762

Sl. No : 28658

रसमञ्जरीव्याख्या

Ms. No : P. 2348/2

Beginning :

सर्वे साधुजनाः सदायतहृदः सत्संप्रदायादलं
यद्ज्ञानाय कणादगौतममतान्यालोच्य तत्त्वार्थदान् ।
वेदान्तान् परिशीलयन्ति रहसि स्वानन्दकन्दादरं
वन्दे तं जगदीश्वरं दयितया सानन्दमालिङ्गितम् ॥

विशिष्टशिष्टेष्टकर्तव्यताप्राप्तं मङ्गलमनुषङ्गतो व्याख्यातृश्रोतृमङ्गलाय निबध्नाति आत्मीयमिति ॥

End

वाग्देव्याः सरस्वत्याः श्रोत्रे यत् पारिजातकुसुमं तत्सदृशी मञ्जरीव मञ्जरी जयतु—आकल्पं तिष्ठन्तु । शार्दूलविक्रीडितं वृत्तम् ॥

Colophon :

इति श्रीमदनन्तपण्डितविरचिता व्यङ्ग्यार्थकौमुदी रसमञ्जरीव्याख्या ॥

763

Sl. No : 28662

रसमञ्जरीव्याख्या

Ms. No : P. 4051/2

Beginning :

सानन्दानन्दवक्रे स्फुटमिदरसभामल्लवर्गे सरोषाः
कंसे सभ्रातरिस्वप्रियसखिसरसिजन्मभास्वत्स्वरूपाः ।
राज्यञ्च स्त्रीषु भास्वन्निरुपममहाश्रीभरा रङ्गभूमौ
कल्याणं कल्पयन्तां हरिहलधरयोर्नैकलक्ष्याः कटाक्षाः ॥

श्रीमद्गोपालभट्टेन द × क्ष्मा सुपर्वणा ।
क्रियते रसमञ्जर्या टीका रसिकरञ्जिनी ॥

End :

वाग्देव्याः सरस्वत्याः श्रुतौ कर्णे यत्पारिजातकुसुमं कल्पतरुपुष्पं तस्य स्पर्धां करोतीति । सा तत्तुल्येत्यर्थः ॥

Colophon :

इति रसमञ्जरीटीका संपूर्णा ॥

764

Sl: No: 28663 **रसमञ्जरीव्याख्या** **Ms. No: C. 1892/2**

Beginning

सौकुमार्यप्रसादादिगुणसत्त्वं यत्र, तत्र वैदर्भीति अन्यत्र गोडीयेति । प्रकृते तु माधुर्यादिगुणसत्वेन वैदर्भीत्वमेत्यलमियता । यद्वा सालाख्याख्येयं रीतिः । तस्यास्तु शृङ्गारविधिप्रतिषेधाभावेऽपि निर्बन्धो न विरुद्धः ।

End:

तेन कविना भानुना भानुनाम्ना स्वकृतेनात्मनिर्मितेन पद्येन श्लोकेन पद्यं श्लोकस्तनौ पद्येति विश्वः ।

वाग्देवीश्रुविपारिजातकुसुमस्पर्धाकरी तत्सदृशेत्यर्थः । मञ्जरी मञ्जरी नामको ग्रन्थः योजिता सन्धिता जयत्विति षेशः ।।

Colophon:

इति रसमञ्जरीविकासो गोपालाचार्यविरचितः सोऽयम् ।

765

Sl. No: 28664 **रसमञ्जरीप्रकाशः** **Ms. No: C. 741/2**

Beginning :

प्राप्तः समाप्तिमीड्यः कुसुमैरेकादशभिर्युतो रम्यैः ॥
सामि नीलोत्पलश्यामं वपुर्यस्य विराजते ।
यामिनीदयितद्योतमानः सोऽस्तु शिवाय नः ॥
नागेशभट्टनामा शिवभट्टसुधीसुतो मुदे विदुषाम् ।
रसमञ्जरीप्रकाशं विदेधानिमितैर्वचोभिरर्थघनैः ॥ (?)

End:

बर्हं मयूपिञ्छं सोऽयं प्रसिद्धविभावः । एवं च स्पृहणीयदर्शनत्वदामोदरत्वेन व्यसनशालिता । ते दुर्लभत्वं लोचनविषयो भवतु ।

स्पन्दसन्दोहः प्रश्नवः सारसङ्ग्रहः तेन सुन्दरी तद्वतीयासौ सुन्दरीति वा ॥ पद्येनेत्येकत्वमविवक्षितम् ॥

Colophon :

इति श्री कालेपानामक शिवभट्टसुत नागेशभट्टकृतो रसमञ्जरीप्रकाशः समाप्तोऽयम् ॥

766

Sl. No : 28665 रसमञ्जरीव्याख्या Ms. No : P. 3297

Beginning :

महते महितास्मीयपदप्रणतिशालिनाम् ।
अनल्पसंकल्पकल्पतरवे गुरवे नमः ।।
श्रियमातनोत्वथविरोधिराधिका यदुनन्दनाचरितमन्मथोत्सवः ॥
रसमञ्जरीचरमिलिन्ददृश्यमुनातदोपवनकुञ्जसाक्षिकः ॥

End :

× शमानस्य साध्यत्वाद्रसाभासत्वं विज्ञेयम् ।
मुग्धमानवतीति यथा मदीयं पद्यम् ।
दृष्टिं प्रमादपतितामह्यावर्तयति × समीपगते ।
प्रचलति संकुचिताङ्गी मुग्धवैमु × मपि मनोहरी ॥

Colophon:

इति श्रीमरुजालशायि पण्डितरचितायां रसमञ्जरीव्याख्याया × यादि त्रिविधनायिकाविभागनिरूपणं नाम प्रथमं प्रकरणम् ।।

767

Sl. No : 28668 रसमञ्जरीसारः Ms. NO : P. 5151/2

Beginning :

अस्तु वः स्वस्तिकृद्वस्तु तद्वायादिरसास्पदम् ।
जाया यस्य रसाख्यादिरसयोनिश्च यत्सुतः ॥
रसेष्वभ्यर्हितत्वेन शृङ्गारस्यैव सर्वथा ।
तदालम्बविभावत्वान्निरूप्यन्तेऽथ नायिकाः ॥

End

भानुदीयरसमञ्जरीगतः सार आर्यपदसारसालिना ।
पुस्तकं तिरुमलार्यसूनुना क्षौद्रदुबुधां मुदे पृथक्कृतः ।।

Colophon :

इति रसमञ्जरीसारसंग्रहः समाप्तः ॥

768

Sl. No : 28674 **रसार्णवसुधाकरः** **Ms. No : B. 325/2**

Beginning :

श्रृङ्गारवीरसौहार्दमौग्ध्यवैयात्यसौरभम् ।
लास्यताण्डवसौजन्यं दाम्पत्यं तद्भजामहे ॥
अत्र शिंगमहीपालः पालयत्यखिलां महीम् ।

End :

चिन्तारत्नौघकल्पद्रुमततिसुरभीमण्डलैः पूरितायन्ताप्य-
त्रध्वं नीता लघिम्ना तदपि कुलशतैः पूर्यतेऽद्यापि नद्याः ॥

Colophon :

इति श्रीमन्दाध्रमण्डलाधीश्वरप्रतिगण्डभैरव श्री अन्नपोत नरेन्द्रन न्दन भुजबलभीम श्री शिंङ्गभूपालविरचिते रसार्णवसुधाकरनाम्यालंकरे भावोल्लासो नाम तृतीयो विलासः ॥

769

Sl. No : 28678 लक्षणदीपिका Ms. NO : P. 461 3/2

Beginning :

वन्दे वामस्तनन्यस्तवल्लकीवादनोत्सुकाम् ।
वक्त्राब्जवासनालोभतुङ्गीसङ्गीतमातृकाम् ॥ +
गौरणाख्य इति ख्यातस्तनयो नयकोविदः । +
समाकृष्य सतां भूत्यै वक्ष्ये लक्षणदीपिकाम् ॥ +
पदार्थदीपिका सेयं भाति लक्षणदीपिका ॥
वर्णानामुद्भवः पश्चात् व्यक्तिः संख्या ततः परम् ।

End :

मैत्रं गुरौ दैत्यगुरौ तु विश्वे
शानन्दयोगाम्बपती यम ×
इति । पपपद्वर्ग । यथा संहितासारे लिशद्भागात्मकं लग्नं—

774

Sl. No : 28693 विग्धमुखमण्डनटीका Ms. No G. 3261/2

Beginning :

श्रीगोकुलेशपदपद्ममधुव्रतेन
तारामिधेन कविना शिवराजधान्याम् ।
विद्वत्कुलोपकृतये क्रियते स्फुटार्था
टीका विदग्धमुखमण्डनसंज्ञकस्य ॥

End :

कल्याणाचारेण बलिराज्ञः
शीलेन विनोदिता प्रहर्षिता पूर्वमासीत् ।
अधुना पुनः सा पृथिवीभुजङ्गमनिभाः
सर्पवत्क्रूरा निःसत्त्वाः ये कलिकालजनाः ॥
तेषामुचिता योग्या वर्तते ॥

Colophon :

ताराचन्द्रेण टीकेयं कृता विद्वन्मनोहरा ।
व्याख्यातोऽत्र द्वितीयोऽयं परिच्छेदो यथामति ॥

775

Sl. No : 28699 व्यक्तिविवेकः Ms. No : P. 5239

Beginning :

अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम् ।
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम् ॥

End :

अन्यैरनु × --खित पूर्वमिदं ब्रुवाणो
नूनं स्मृतेर्विषयतां विदुषामुपेयाम् ।
हासैककारणगवेषणया नवार्थ-
तत्त्वावमर्शपरितोषसमीहया वा ॥

Colophon :

इति श्रीराजानकमहिमभट्टविरचिते व्यक्तिविवेकाख्ये काव्यालङ्कारे ध्वने-
रनुमाने तृतीयो विमर्शः ॥ (?)

776

Sl. No : 28700 **व्यक्तिविवेकः** **Ms. No: A. 203**

Beginning

अनुमानान्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम् ॥
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचाम् ॥

End :

अन्यैरनुल्लिखितपूर्वमिदं ब्रुवाणो
नूनं विषयतां विदुषामुपेयाम् ।
हासैककारणमेवषणाय न वार्थ
तत्त्वावमर्शपरितोषसमीहया वा ॥ (?)

Colophon :

समाप्तश्चायं व्यक्तिविवेको नामालङ्कारः ॥

777

Sl. No : 28705 **शठवैरिवैभवप्रभाकरः** **Ms. No C. 1778**

Beginning :

श्रीशेषाचलनाथस्य नाभिनामरसोदरात् ।
विरञ्चिरुदभूद्रेणुस्तदीय इव मूर्तिमान् ॥
जातस्तस्य + नृसिंहाचार्योऽनन्ताह्वयगुरुरिति ख्यातिमुर्व्यामुपेताः ॥
लक्ष्मीपक्ष्मलसत्कटाक्षलहरीसेकादिव श्यामला
स्फारगङ्गप्रकरा तनुर्मनसि मे भूयाद्वृषाद्रीशितुः ॥

End :

सौलभ्यादिगुणाकरं श्रतिसुखश्रीसूक्तियुक्ताननं
स्नेहोद्दीपकदर्शनीयवपुरं कान्तं शठद्वेषिगम् ।
संप्राप्ता विलसद्रसा गुणवती सालङ्कृतिर्मत्कृतिः
कन्या धन्यतरा निरन्तरसमुल्लासैः परं भासताम् ॥

Colophon :

इति श्रीशठवैरिवैभवप्रभाकरस्संपूर्णः ॥

770

Sl. No : 28682

वाग्भटालङ्कारः

Ms. No : C. 2774/1

Beginning :

श्रियं दिशतु मे देवो × नाभेयजिनः सदा ।
मोक्षमार्गे सतां ब्रूते यदागमपदावली ॥
साधुशाब्दार्थसन्दर्भगुणालङ्कारभूषितम् ।
स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ॥

End :

यद्यप्यमानं + धुपैर्द्विजेशः
श्लिष्यत्यसौ कैरवणीं कराग्रैः ॥
अर्थमयेनातिचमत्करोति
प्रायः कृतिस्त्वं कृतिनायकस्तु ।
अलंक्रियात्वेन स एव तस्मिन्
अभ्यूह्यतां हन्त दिशानयैव ॥

Colophon :

इति वाग्भटालङ्कारे चतुर्थः परिच्छेदः समाप्तः ॥

771

Sl. No : 28683

वाग्भटालङ्कारव्याख्या

Ms. No : . 2774/2

Beginning :

अभ्युदयनिश्रेयसोपलक्षितां लक्ष्मीं युष्मभ्यं ददात्वित्यर्थः । श्रीमांश्च श्रीमांश्चासौ नाभेयाश्च जिनश्च आदितीर्थङ्करः परमदेवः लभ्यतेत्युक्तिलेशाव काशः ॥

End :

वाक्यारम्भे विषादे च हन्तशब्दः प्रकीर्त्यते ।
अहो विद्वांसः अनयैव दिशा पूर्वोक्तरीत्या अनेन अलङ्कारप्रकारेणेत्यर्थः ॥

Colophon :

इति वाग्भटालङ्कारटीकायां चतुर्थः परिच्छेदः समाप्तः ॥

772

Sl. No : 28684 विदग्धमुखमण्डनम् **Ms. No : P. 769/1**

Beginning :

सिद्धौषधानि भवदुःखमहागदानां
पुण्यात्मानां परमकर्णरसायनानि ।
प्रक्षाळनैकसलिलानि मनोमलानां
शौद्धोदनेः प्रवचनानि चिरं जयन्ति ॥ +

इति धर्मदासकृतौ विदग्धमुखमण्डने प्रथमः परिच्छेदः ॥

End :

स्फोट इत्यक्षरं किञ्चित् पुनरन्यस्य दानतः ॥
यत्रापरो भवेदर्थश्च्युतदत्ताक्षरो हि तत् ॥
पूर्णचन्द्रमुखी रम्या कामिनी निर्मलाम्बरा ।
करोति काव्यतः स्वान्तं + मदनातुरम् ॥

Colophon :

इति चतुर्थः परिच्छेदः ॥

773

Sl. No : 28691 विदग्धमुखमण्डनटीका **Ms. NO : P. 769/2**

Beginning :

यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका ।
सा च द्विधा आर्थी च शब्दी च प्रश्नशासने ॥ +

कविवल्लभायां कविसुतस्य कृतौ विदग्धमुखमण्डनस्य टीकायां प्रथमः परिच्छेदः ॥

End :

इनः–सूर्यः अन्यत्र जिनः । व्यञ्जनच्युतम् । सदागतिः–वायुः । तमसः–तमोगुणस्य । वश्यतां अधीनतां । दीनोऽयं अन्यत्र दीपः । विदुरे–अन्यत्र विधुः । कामिनी यामिनी ॥

Colophon :

इति चतुर्थः परिच्छेदः ॥

778

Sl. No : 28707 | **शाहभूपालङ्कारः** | Ms. No : P. 143

Beginning :

दत्तान् भक्तैरसकृदभिमतान् मोदकानाननान्तः
लम्भंलम्भं श्रमविलुलितं कुण्डलीकृत्य मन्दम् ।
शुण्डादण्डं विपुलविपुलं योऽधितुन्दं निधत्ते
वन्दंवन्दं तमिभवदनं भावये भव्यवृन्दम् ॥

End :

जम्बूद्वीपादीनां रत्नादिरिति मालारूपकं कारणालङ्कारे तत एवातिशयेन जयतामित्यत्राङ्गम् । अतोऽसौ अङ्गाङ्गिभावसङ्करः । एवमत्र ग्रन्थे श्रीशाह महारजे उचिताः सर्वे अलङ्काराः सभेदलक्षणलक्ष्यं प्रतिपादिताः ॥

Colophon :

— — —

779

Sl. No : 28709 | **शृङ्गारतरङ्गिणी** | Ms. No :C. 2832

Beginning :

स्वग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमाचरितं मङ्गलं कविरादौ ग्रन्थतो निबध्नाति—स्फुरत्करतच्युतप्रचुरदानगन्धस्पृहा —

End :

प्रस्तुताप्रस्तुतार्थसंश्रयित्वात्प्रकृताप्रकृतार्थश्लेषालंकारः । फणितेरतिविदग्धत्वादुक्तिर्नाम गुणः । वैदर्भी रीतिः । भारती वृत्तिः । एवमन्यदपि यथासम्भवं सूक्ष्मया दृष्ट्या अवधातव्यम् । ग्रन्थगौरवभिया नोपपादितमिति ध्येयम् ॥

Colophon:

इति श्रीकावलवंशालङ्कारभूतस्य सकलविशारदस्य श्रीमतः श्रीनिवासपण्डितस्य तनयेन जगन्नाथकविनाथेन विरचिता शृङ्गारतरङ्गिणी सम्पूर्णा ॥

780

Sl. No : 28711 शृङ्गारतिलकम् Ms. No : P. 2223/1

Beginning :

शृंगारी गिरिजानने सकरुणो रत्यां प्रवीर :स्मरे
बीभत्सोऽस्थिभिरुत्फणी च भयकृन्मूर्त्याद्भुतस्तुङ्गया ।
रौद्रो दक्षविमर्दने च हसकृन्नग्नः प्रशान्तश्चिरात्
इत्थं सर्वरसात्मकः पशुपतिर्भूयात् सतां भूतये ॥

End :

का वा काव्यकथा कैषा वैदग्धी को रसागमः ।
किं गोष्ठीमण्डनं वा स्यात् शृङ्गारतिलकादृते ॥
त्रिपुरवधादेव गतामुल्लासमुमां समस्तविबुधानाम् ।
शृङ्गारतिलकविधिना पुनरपि रुद्रः प्रसादयति ॥

Colophon :

इति श्री रुद्रटविरचिते शृंगारतिलके काव्यालङ्कारे तृतीयः परिच्छेदः ॥

781

Sl. No : 28714 शृङ्गारतिलकव्याख्या Ms. No :C. 1833/2

Beginning :

कालिन्दीकूलकेलिः कुतुकितहृदयः पञ्चशाखाम्बुजन्म
व्यावल्गद्भृंगहंसः प्रचुर + धामाभिरामः ॥
गोपालभट्टः कुरुते टीकां रसतरंगिणीम् ।
शृंगारतिलकाख्यस्य सज्जनाह्लादकारिणीम् ॥
